DUE DATE SLIP

GOVT. COLLEGE, LIBRARY

KOTA (Raj )

Students can retain library books only for two weeks at the most

| BORROWER S No | DUE DTATE | SIGNATURE |
|---|---|---|
| | | |

# THE NĀTYASĀSTRA

ASCRIBED TO BHARATA-MUNI

Volume II (Ch XXVIII-XXXVI)

*The original Sanskrit text edited with Introduction and Various Readings from MSS and printed texts*

*by*


MANOMOHAN GHOSH,

M A, Ph D, Kāvyatīrtha







ASIATIC SOCIETY

1 Park Street, Calcutta

1956

भरतमुनि-प्रणीतम्

# नाट्यशास्त्रम्

( तस्याष्टाविंशाध्यायादारभ्य षट्त्रिंशाध्यायान्तो
द्वितीयो भाग )

एतत् पुस्तकं पाठान्तरैः संयोजितं संशोधितं च
एम ए-पी-एइच्-डि-उपाधिकेन काव्यतीर्थेन
**श्रीमनोमोहन-घोषेण**



१९५६
इशाब्दे कलिकातायाम् आसियाटिक-सोसाइटिना
प्रकाशितम्



Printed by KALIDAS MUNSHI at the Pooran Press,
21, Balaram Ghosh Street,
Calcutta-4

# PREFACE

For reasons stated in the Introduction, it has been thought advisable to bring out volume II of the text earlier The translation of the present volume is being printed Volume I will follow

The task of editing this part of the *Nāṭyaśāstra*, especially its chapters XXIX-XXXIII, has by no means been a very easy one In spite of the most patient study for a long time of different materials the preparation of this volume has been full of difficulties

The editor is now happy that this extremely difficult work has at last been completed, and a rough path has been made in the most inaccessible part of the *Nāṭyaśāstra* Volume I will contain a glossary of difficult words including all technical terms occurring in the entire text

In the preparation of this volume as in the case of volume I of the translation of the *Nāṭyaśāstra*, I have been greatly helped by Professor S K De who kindly placed his manuscript of the unpublished portion of the *Abhinavabhāratī* at my disposal The authorities of the Central Library, Baroda should also be thanked for supplying me with a copy of the manuscript of Abhinava's commentary on Chapter XXVIII of the *Nāṭyaśāstra*, In printing the present volume I have received the unfailing courtesy from the present General Secretary Dr M L Roy Chaudhuri, and the Acting Librarian Sri Sibdas Chaudhuri The co operation of the Pooran Press also, in this connection deserves to be specially mentioned

*Calcutta*
1 1 56

Manomohan Ghosh

प्रमाण ... पुस्तकालय

# निवेदनम्

इतो नवतिवर्षात् प्राग् विद्वद्भिः निश्चेतुमशक्यमासीत्—काव्य-सङ्गीत-नृत्तादि-शास्त्राणां टीकासु तत्तच्छास्त्रीय-प्रकरण-ग्रन्थेषु च उल्लिखितस्य नाट्य-शास्त्रस्य किञ्चित् पुस्तकम् उपलभ्यते न वेति। विरल-प्रचारतया हेत्वन्तरा-च्चापि भरत-प्रणीतमेतच्छास्त्रं तदानीं लुप्तकल्पमेवासीत्। १८६५ इशाब्दे दशरूपकसंस्कारको हल्-(F. Edward Hall) महोदयः सौभाग्यवशादस्य शास्त्रस्य पुस्तकमेकं लब्ध्वा तस्य अध्यायचतुष्टयं (१८-२०, ३४) स्वग्रन्थान्ते योजितवान्। किन्तु समग्रं नाट्यशास्त्रं प्रकाशयितुं निनीषोरपि सकल्पः असुलभप्रतीकान्तरस्य नवलब्धपुस्तकस्य पाठानां बहुशः खण्डिततया सिद्धिगौरवं न प्राप। पश्चात् क्रमशोऽन्यान्यपि पुस्तकानि तदन्वेषणपरैरासा-दितानि। एतान्यवलम्ब्य अस्य शास्त्रस्य कतिचिदध्याया विद्वद्भिः संस्कृताः प्रचारिताश्च। अथ १८९४ इशाब्दे मुम्बयीनगर्यां शिवदत्त-काशीनाथपाण्डुरङ्ग-परवनामानौ पण्डितवर्यौ समग्रं नाट्यशास्त्रं प्राकाश्यमनयताम्। ततो वर्षचतुष्टयादनन्तरं ग्रोसे-(J. Grosset) नाम्ना फराशी-विद्वद्वरेण अस्य शास्त्रस्य आदिममध्यायचतुर्दशकं पाठान्तरादिभिः सह संस्कृत्य रोमकाक्षर-मुद्रापितम्। सुलभेष्वपि एतादृशेषु पुस्तकेषु प्रायशो दुरूहत्वाद् एतच्छास्त्रस्या-लोचने अध्येतॄणां बह्वानुत्साहः सुचिरं न पर्यलक्ष्यत। १९२६ इशाब्दे अभिनवभारत्या समलङ्कृतस्य विद्वद्वरेण श्रीरामकृष्ण-कविना संस्कृतस्य नाट्य-शास्त्रप्रथमभागस्य प्रकाशादनन्तरम् इदं शास्त्रं प्रति विदुषां पुनरपि महत् कौतूहलं सञ्जातम्। १९२९ इशाब्दे काशी-संस्कृत-ग्रन्थ मालायां साकल्येन मुद्रितं नाट्यशास्त्रमेतत् कौतूहलं भृशमवर्धयत्। पश्चाद् १९३४ इशाब्दे वडोदायां अभिनवभारती-सवलितस्य नाट्यशास्त्रस्य द्वितीयभागः प्रकाशितोऽस्य कौतूहलस्य क्षेत्रं समधिकं प्रसारितवान्। प्रचारवैरल्येन सम्प्रदायोच्छेदाद् नाट्यशास्त्रस्य बहूनि स्थलानि कालेन तथा दुर्बोधानि जातानि यदाचार्याभिनव-गुप्तरचिता विवृतिरपि तेषां व्याख्याने प्रायशो न साहायकं भजति। नात्र अभिनवगुप्तपादा अणुमात्रमधिक्षेपमर्हन्ति। ते तु स्वकालवर्तिनं उद्दिश्य नाट्यशास्त्रस्य व्याख्यां रचयन्तो दृष्टिं नाकुर्वन् तेषु तेषु विषयेषु यत्र तेषां प्रत्यक्षदृष्टनाट्यप्रयोगानां ज्ञानाभावो न सम्भाव्यते। अत आसियाटिक-

सोसाइटिकर्तृपक्षीयैरादिष्टा वयम् आधुनिकभाषया नाट्यशास्त्रस्य अनुवादे व्याख्याने च प्रयत्नमकुर्म। अस्य प्रयत्नस्य फलभूत नाट्यशास्त्रस्य आदित सप्तविंशत्यध्यायपर्यन्तस्य आङ्गल-भाषानुवाद॰ प्रागुक्तेन सोसाइटिना प्रकाशित (१९५१ इशाब्द)। भाषान्तर सम्पादयता चानुभूतं यदेतस्मिन् शास्त्रे भूयसी पाठविप्रतिपत्तिर्वर्तते। अत एव आङ्गलानुवाद-ग्रन्थस्य प्रथमभागे पाददीकाया पाठान्तराणि विचार्य शास्त्रस्य शुद्धस्वरूपावधारणे आयास कृत.। शिष्टे भागे च पाठविप्रतिपत्तेर्बहुल्यादनुवादग्रन्थे पाददीकायां पाठान्तराणा विचारणया शास्त्रस्य शुद्धरूपावधारण न सुकरमिति मत्वा केवलं तस्य मूलं पाठान्तरादिभि सह प्रकाशितम्। तस्य आङ्गलानुवादस्तु पृथङ्मुद्रितग्रन्थान्तरविषयीभूत: कृत'।

नाट्यशास्त्रस्य द्वितीयभागस्य षट्सु अध्यायेषु केवलं (२८-३३) गीतवाद्यम् आलोचितम्। नारदीयशिक्षां विहाय एतदेव हि सङ्गीतशास्त्रविषयं प्राचीनतम-मालोचनम्। अस्य शास्त्रस्य पाठवैकल्यम् उक्ताध्यायषट्के प्रायश दुष्परिहर-मेव। तथापि केवल विद्वदाराधनबुद्ध्या अस्य पाठसंस्कारे भूयान् प्रयास: कृत.। यद्यप महानुभावाना विपश्चितां स्वल्पमपि सन्तोषं जनयति तदात्मानं कृतकृत्यं मन्य इति शम्।

१९५६ इशाब्दे
जानुयारीमासस्य
प्रथमदिवस

मनोमोहन-घोषस्य

# INTRODUCTION

The volume II of the *Nāṭyaśāstra* comprising its Chapters XXVIII-XXXVI, has been edited with the help of the following materials

B The volume III of the *Nāṭyaśāstra* published in Gaekwad's Oriental Series (no CXXIV)

C This is the text of the *Nāṭyaśāstra* published in the Kashi Sanskrit series from Chowkhamba in 1929 Though this text claims to be an edition based on five mss it does not record many variants Hence it may be assumed that the mss were all of the same type differing little from one another C has a striking resemblance to mss M and N mentioned below

H Appendix to Hall's edition of the *Daśarūpa* It includes the Chapter XXXIV

K This is the text of the *Nāṭyaśāstra* issued in the Kāvyamālā Series It is based on two mss which were fairly complete

M The mss no R 5271 of the NŚ of the Madras Government collection See the Catalogue of Triennial Collection of MSS (1925 26 to 1927-28)

N The mss no R 2930 of the NŚ of the Madras Government collection See the Catalogue of Triennial Collection of MSS (1919 20 to 1921 22)

Prakrit Verses = Prakrit Verses of the Bharata Nāṭyaśāstra published in the *Indian Historical Quarterly* Vol VIII 1932

R This is a palm leaf pothi written in Grantha character It belongs to the Royal Asiatic Society of Great Britain and Ireland. The text is complete and has substantial agreement with N but it is more corrupt

Besides these, a ms belonging to the India Office Library was also used It is a modern Devanāgari transcript from an original which seems to be closely allied to mss used in K, (the Kāvyamālā text)

We have based our edition on the text of the longer recension represented by C, M, N and R but we have disregarded unimportant variations of the last three from C Hence C will generally stand for M, N and R also

The reason for taking up the second volume of the text of the NŚ first, is that a substantial portion of its concluding chapters is so very corrupt, that it would often have been very difficult for the readers of the translation (vol II) to visualize the individual

passages from the available editions of the text with the help of the variant readings given in the footnotes of the translation in the manner of the volume I The facts which make such visualization extremely difficult are as follows

(*a*) Quite a number of passages occur in different order in the two different recensions of the text

(*b*) There are many passages which occur in one recension only But from a very close study of the entire materials, it appears that they are genuine parts of the original *NŚ* Due to these two facts some portions of Ch XXIX-XXXIII seem to be bewildering and defying all time honoured canons of critical reconstruction But fortunately for us, the passages which are in such a deplorable condition, are not great in number. For obvious reasons, the editor had to reconstruct these subjectively Judging very carefully their mutual affinity and general coherence, he put together these apparently disjointed passages to make up an integrated discussion of which they in all probablity formed a part He had to proceed in this matter like one solving a jigsaw puzzle But it may be confidently said that the results have not been unsatisfactory Except in a few cases where the editor himself remains conscious about the highly tentative nature of the reconstructed text, this edition of the NŚ Vol II (Ch XXVIII-XXXVI) may be said to represent fairly the original teaching of the author And it may even be claimed that our knowledge of the music chapters of the NŚ are much fuller than that of Śārṅgadeva (13th century) the reputed author of the *Saṅgītaratnākara* who used this text For the chapter on Tāla in this last named work, consists of 400 couplets whereas the NŚ devotes no less than 502 couplets to this subject, and in its treatment we meet with many topics, of which Śārṅgadeva takes no notice Besides this, the author of the *Saṅgītaratnākara* has only 17 couplets (Ch IV 316 332) on the Dhruvā songs, while the NŚ has on this subject one entire chapter (XXXII) consisting of 425 couplets

The passages about the reconstruction of which the editor is not fully satisfied, have been pointed out in the notes to the translation In the footnotes to the text he gives only details of their existence in different recensions and the order in which they occurred there But the cases in which doubt is permissible but may not be necessary, have not been pointed out Careful readers will however be able to make their own choice in this regard, and easily find out which passages should in their opinion deserve to be reconsidered.

## Abbreviations

Kallı. = Catura-Kallınātha's commentary on the Sangīta-ratnākara (Ānandāśrama Ed )

Matanga = Matanga's Brhaddeśī (Trivandrum Sanskrit Series)

SR = Sangītaratnākara (Ānandāśrama Ed.)

For B , C , H , K., M , N and R see the Introduction

Several topics sometimes belong to different chapters in the two recensions of the NŚ Hence the serial number of a chapter, has been mentioned in the footnotes whenever this differs from the number accepted in the present edition

# विषयसूची

## अष्टाविंशोऽध्याय आतोद्यविधि.






## ऊनत्रिंशोऽध्याये ततातोद्यविधानम्

## त्रिंशोऽध्याये सुषिरातोद्यविधानम्



## एकत्रिंशस्तालाध्यायः

## द्वात्रिंशोऽध्याये ध्रुवाविधानम्

( सूची )

| विषय | | पृष्ठा |
|---|---|---|
| अनुष्टुभ् २६५-२६६ | — | ११८ |
| बृहती २६७ | — | ११८ |
| पङ्क्ति २६८ | — | ११८ |
| त्रिष्टुभ् २६९ | — | ११८ |
| जगती २७० | — | ११८ |
| भुवाद्या नगणादिविकल्पनम् २७१-२९६ | — | ११९ |
| भुवाद्या विरामव्यवस्था २९७-३०० | — | ११९ |
| भुवाद्या सयौगा ३०१-३०२ | — | ११९ |
| दीर्घकाद्या लक्षणम् ३०३ | — | ११९ |
| श्रेणी ३०४-३०५ | — | ११९ |
| क्रीडा ३०६-३०७ | — | १२२ |
| पुष्पसमृद्धा ३०८-३०९ | — | १२२ |
| कुसुमलता ३१०-३११ | — | १२२ |
| मत्ताक्रीडा विद्युन्माला ३१२-३१३ | — | १२२ |
| स्खलितम् ३१४-३१६ | — | १२२ |
| चपला ३१७-३१८ | — | १२४ |
| वेगवती ३१९-३२० | — | १२४ |
| नर्कुटाद्या भाव ३२१-३२२ | — | १२४ |
| रथोद्धतम् ३२३-३२५ | — | १२५ |
| बुद्बुदम् ३२६-३२७ | — | १२५ |
| उद्धतम् ३२८-३३० | — | १२५ |
| भ्रमरपदपतितम् ३३१-३३२ | — | १२६ |
| प्रमिताक्षरम् ३३३-३३६ | — | १२६ |
| केतुमति ३३६-३३७ | — | १२६ |
| भ्राजिनी ३३८-३३९ | — | १२७ |
| कुलासम् ३४०-३४१ | — | १२७ |
| पुनः कुलासम् ३४२-३४४ | — | १२७ |
| तोटकम् ३४५-३४६ | — | १२७ |
| सुकुमाराद्या लक्षणम् ३४७-३४८ | — | १२८ |
| प्रमोदकम् ३४९-३५० | — | १२८ |
| मालिनी ३५१-३५२ | — | १२८ |
| मत्तचेष्टितम् ३५३-५४ | — | १२८ |
| भुवाद्या माल्यवत्या भेदा ३५५-३६० | — | १२९ |
| भुवाद्या मध्यनिकृष्टा ३६१ | — | १२९ |
| ताद्या मर्यादाख्य ३६१-३६४ | — | १२९ |

## त्रयस्त्रिंशोऽध्यायेऽवनद्धातोद्यविधानम्

## चतुस्त्रिंशोऽध्याये प्रकृतिविचार-

## पञ्चत्रिंशोऽध्याये भूमिकाविकल्पः

विषय पृष्ठ

## षट्त्रिंशोऽध्याये नाट्यावतार

भरतमुनिप्रणीतम्

# नाट्यशास्त्रम्

39303

भरतमुनि प्रणीतम्

# नाट्यशास्त्रम्

## अष्टाविंशोऽध्यायः

आतोद्यविधिमिदानीं [1]वक्ष्यामः । तद् यथा —

तत चैवावनद्धं च घनं सुषिरमेव च ।
चतुर्विधं तु विज्ञेयमातोद्यं लक्षणान्वितम् ॥ १ ॥
ततं [1]तन्त्रीगतं ज्ञेयमवनद्धं तु पौष्करम् ।
घनं तालस्तु विज्ञेयः सुषिरो [2]वंश उच्यते ॥ २ ॥
प्रयोगस्त्रिविधो ह्येषां विज्ञेयो नाटकाश्रयः ।
ततं चैवावनद्धं च तथा नाट्यकृतश्च यः ॥ ३ ॥
ततो कुतपविन्यासो गायनः सपरिग्रहः ।
वैपञ्चिको वैणिकश्च [1]वंशवादक एव च ॥ ४ ॥
मार्दङ्गिकः पाणविकस्तथा दार्दुरिको बुधैः ।
[1]अवनद्धविधावेषः कुतपः समुदाहृतः ॥ ५ ॥
उत्तमाधममध्याभिस्तथा प्रकृतिभिर्युतः ।
कुतपो नाट्ययोगे तु[1] नानादेशसमाश्रयः ॥ ६ ॥
एवं [1]गानं च [2]वाद्यं च [3]नाट्यं च विविधाश्रयम् ।
अलातचक्रप्रतिमं कर्तव्यं नाट्ययोक्तृभिः ॥ ७ ॥
यत्तु तन्त्रीकृतं प्रोक्तं नानातोद्यसमाश्रयम् ।
गान्धर्वमिति [1]तज्ज्ञेयं स्वरतालपदाश्रयम् ॥ ८ ॥
अत्यर्थमिष्टं देवानां तथा प्रीतिकरं पुनः ।
[1]गन्धर्वाणामिदं यस्मात् तस्माद् गान्धर्वमुच्यते ॥ ९ ॥

1 (C 1, K 1) [1]C व्याख्यास्यामः  2 (C 2 K 2) [1]K तन्त्रीकृतं  [2]K वंश एव च  3 (C 3, K 3)  4 (C 4, K 4) [1]K °वादकश्चैव च  5 (C 5 K 5) [1]C घनाविद्धविधा°  6 (C 6, K 6) [1]C °श्च  7 (C 7, K 7) [1]K गीतं for गानं  [2]C नाट्यं for वाद्यं  [3]C वाद्यं for नाट्यं  8 (C 8, K 8) [1]C विज्ञेयं for तज्ज्ञेयं  9 (C 9 T 9) [1]K गन्धर्वाणां च यस्माद् हि for गन्धर्वाणामिदं यस्मात्

अस्य योनिर्भवेद्[1]गात्रं वीणा वंशस्तथैव च ।
एतेषां चैव वक्ष्यामि विधिं स्वरसमुत्थितम् ॥ १० ॥
[1]गान्धर्वं त्रिविधं विद्यात् स्वरतालपदात्मकम् ।
त्रिविधस्यापि वक्ष्यामि लक्षणं [2]कर्म चैव हि ॥ ११ ॥
द्व्यधिष्ठानाः स्वरा [1]ज्ञेया वैणाः शारीरकास्तथा ।
उभाभ्यामपि वक्ष्यामि विधिं स्वरसमुत्थितम् ॥ १२ ॥
[1]स्वरा ग्रामौ मूर्च्छनाश्च [2]ताना स्थानानि वृत्तयः ।
स्वरसाधारणे वर्णा ह्यलंकारा सधातवः ॥ १३ ॥
श्रुतयो जातयश्चैव विधिस्वरसमाश्रयाः ।
दारव्यां समवायोऽयं वीणायां समुदाहृतः ॥ १४ ॥
स्वरा ग्रामावलंकारा वर्णा स्थानानि जातय ।
साधारणे च शारीर्यां वीणायामेष सग्रह ॥ १५ ॥
[1]व्यञ्जनानि स्वरा वर्णाः सन्धयोऽथ विभक्तयः ।
नामाख्यातोपसर्गाश्च निपातास्तद्धितास्तथा ॥ १६ ॥
[1]छन्दो वृत्तानि जात्यश्च नित्यं पदगतात्मकाः ।
[2]अनिबद्धं निबद्धं च द्विविधं तत् पदं स्मृतम् ॥ १७ ॥
[1]अतस्तालगतस्यापि सम्प्रवक्ष्यामि वै द्विजाः ।
आवापस्त्वथ निष्क्रामो [2]विक्षेपश्च प्रवेशकः ॥ १८ ॥
शम्या तालः सन्निपातः परिवर्तः सवस्तुकः ।
[1]मात्राविदार्यङ्गलया यतिः प्रकरणं तथा ॥ १९ ॥
गीतयोऽवयवा मार्गा पादभागाः सपाणयः ।
इत्येकविंशको ज्ञेयो विधिस्तालगतो बुधै ।
गान्धर्वसंग्रहो ह्येष [1]विस्तरं च निबोधत ॥ २० ॥

10 (C 10, K 10) [1]C गान for गात्र  11 (C 12, K 11) [1]C reads this after 12 [2]K कर्म चैव हि for C चैव कर्मभि  12 (C 11, K 12) [1]K, वैणा शारीराश्च प्रकीर्तिता for ज्ञेया etc  13-15 (C 13 14, 17 18a, K 13 15) [1]C reads 13-15 as follows स्वराश्च श्रुतयो ग्रामौ मूर्च्छना स्थानसंयुता । स्थान साधारणं चैव जातयोऽष्टादशैव च ॥ वर्णाश्चत्वार एव स्यु रलंकाराश्च धातव । अलंकाराश्च वर्णाश्च गीतयश्च शरीरजा ॥ [2]K नाना 16 (C 17, K 16) [1]C reads 16 and 17a after 20a [2]C कृता for तथा 17 (C 18a, K 17, 18a) [1]K छन्दोविधानं च तथा ज्ञेयं पदगतो विधि । [2]C omits this hem 18 (C 15a, K 18b 19a) [1]C omits this hem [2]K विक्षेपोऽथ प्रवेशनम् 19 (C 15b 16a, K 19b 20a) [1]K मात्राप्रमाणयोऽङ्गानि विदारी च यतिर्लय. 20 (C 16bc, K 20b 21) [1]C विस्तार

तत्र स्वराः —

> षड्जश्च ऋषभश्चैव गान्धारो मध्यमस्तथा ।
> पञ्चमो धैवतश्चैव [1]निषादः सप्त च स्वराः ॥ २१ ॥
> चतुर्विधत्वमेतेषां विज्ञेयं श्रुतियोगतः ।
> वादी चैवाथ संवादी [1]अनुवादी विवाद्यपि ॥ २२ ॥

तत्र यो यद्अंशः स [2]तत्र वादी ययोश्च [3]नवकत्रयोदशकश्रुत्यन्तरे [4]तावन्योन्यं संवादिनौ । यथा [5]षड्जमध्यमौ षड्जपञ्चमौ ऋषभधैवतौ गान्धारनिषादौ इति षड्जग्रामे । मध्यमग्रामेऽप्येवमेव षड्जपञ्चमवर्ज्यं पञ्चमर्षभयोश्चात्र संवाद इति । अत्र श्लोकः —

> संवादो मध्यमग्रामे पञ्चमस्यर्षभस्य च ।
> षड्जग्रामे च षड्जस्य संवादः पञ्चमस्य च ॥ २३ ॥

विवादिनस्तु ते येषां [1]स्याद् [द्विक-]विंशतिकमन्तरम् । तद् यथा– ऋषभगान्धारौ धैवतनिषादौ । एवं वादिसंवादिविवादिषु स्थापितेषु शेषा अनुवादिसंज्ञकाः । यथा– षड्जस्य ऋषभगान्धारधैवतनिषादाः, ऋषभस्य मध्यमपञ्चमनिषादाः, गान्धारस्यापि मध्यमपञ्चमधैवताः, मध्यमस्य धैवतपञ्चमनिषादाः, पञ्चमस्य [2]धैवतनिषादौ [3]धैवतस्य ऋषभपञ्चममध्यमाः षड्जग्रामे । मध्यमग्रामेऽपि मध्यमस्य पञ्चमधैवतनिषादाः, पञ्चमस्य ऋषभषड्जगान्धाराः, धैवतस्य षड्जर्षभगान्धाराः, निषादस्य षड्जर्षभगान्धाराः । वदनाद् वादी [4]संवदनात् संवादी विवदनाद् विवादी [6]अनुवदनाद् अनुवादी[7] । एतेषां च [8] स्वराणां [9]न्यूनाधिकत्वं [10]तन्त्र्युपपादनदण्डेन्द्रियवैगुण्याद् उपजायते । [11]स्वरविधानमेतत् चतुर्विधम् ।

21 (C 19, K 22) [1]K ऋषभश्च निषादवान् for निषादः etc 22 (C 20, K 23) [1]K ह्यनुवादी [2]C तत्र for तत्र [3]C नवकत्रयोदशश्रुत्यन्तरे, K नवत्रयोदशक परस्परत श्रुत्यन्तरे [4]K तावन्योन्यम्° [5]K puts षड्जमध्यमौ before इति 23 (C 21, K 24) [1]K स्यादि द्वतिकमन्तरम् C विंशतिस्वरमन्तरम् Cf Matanga, p 15 ll 11-12, Dattila 19 [2]K धैवतषड्जौ [3]K धैवतस्य ऋषभमध्यमपञ्चमाः [4]C संवादात् [5]C विवादित्वाद् [6]C अनुवादाद् [7]K adds इति after this [8]C om च [9]C मूर्च्छनाधिकारत्वं तु for न्यूनाधिकत्वं [10]C तन्त्रीवादन° [11]C इत्येतत्स्वरविधान-चतुर्विधम्, K स्वरविधानमेतत् चतुःप्रकारम्

अथ [12] द्वौ ग्रामौ [1] षड्जो मध्यमश्चेति। [13]तत्राश्रिता [15]द्वाविंशति श्रुतयः। यथा—

तिस्रो द्वे च चतस्रश्च चतस्रस्तिस्र एव च।
द्वे चतस्रश्च षड्जाख्ये ग्रामे श्रुतिनिदर्शनम् ॥ २४ ॥

मध्यमग्रामे तु श्रुत्यपकृष्टः पञ्चमः कार्यः। पञ्चमस्य [1]श्रुत्युत्कर्षादपकर्षाद्वा यदन्तरं मार्दवादायतत्वाद्वा [2]तत् प्रमाणश्रुतिः। निदर्शनं [3]त्वासाम् अभिव्याख्यास्यामः। यथा—द्वे वीणे [4]तुल्यप्रमाणतन्त्र्युपपादनदण्डमूर्छने षड्जग्रामाश्रिते कार्ये। [5]तयोरन्यतरस्यां मध्यमग्रामिकीं कुर्यात् पञ्चमस्यापकर्ष[ण] श्रुतिः। तामेव [7]पञ्चमस्य श्रुत्युत्कर्षवशात् षड्जग्रामिकीं कुर्यात्। एवं श्रुतिरपकृष्टा भवति। [8]पुनरपि तद्वेवापकर्षाद् गान्धारनिषादावपि[9] इतरस्या [10]ऋषभधैवतौ प्रविशतः द्विश्रुत्यधिकत्वात्। पुनस्तद्वेवापकर्षाद् धैवतर्षभावितरस्याः पञ्चमषड्जौ प्रविशतः [त्रि]श्रुत्यधिकत्वात्। तद्वत् पुनरपकृष्टायां तस्यां पञ्चममध्यमषड्जा इतरस्यां [11]मध्यमगान्धारनिषादवन्तः प्रवेक्ष्यन्ति चतुःश्रुत्यधिकत्वात्। एवमनेन [12]श्रुतिनिदर्शनेन द्वैग्रामिक्यो [13]द्वाविंशतिश्रुतयः प्रत्यवगन्तव्याः। अत्र श्लोकाः [14]—

षड्जश्चतुःश्रुतिर्ज्ञेय ऋषभस्त्रिश्रुतिः स्मृतः।
द्विश्रुतिश्चापि[1] गान्धारो मध्यमश्च चतुःश्रुतिः ॥ २५ ॥
चतुःश्रुतिः पञ्चमः [1]स्यात् त्रिश्रुतिर्धैवतस्तथा।
[2]द्विश्रुतिस्तु निषादः स्यात् षड्जग्रामे स्वरान्तरे ॥ २६ ॥
चतुःश्रुतिस्तु विज्ञेयो मध्यमः पञ्चमः पुनः।
त्रिश्रुतिर्धैवतस्तु स्याच्चतुःश्रुतिक एव [1]च ॥ २७ ॥
निषादषड्जौ विज्ञेयौ द्विचतुःश्रुतिसम्भवौ।
ऋषभस्त्रिश्रुतिश्च [1]स्याद् गान्धारो द्विश्रुतिस्तथा ॥ २८ ॥

[12]K om द्वौ [13]K षड्जग्रामो मध्यमग्रामश्चेति [14]K तत्र वा for तत्राश्रिता. [15]C द्वाविंशति 24 (C 22, K 25) [1]C श्रुत्युत्कर्षापकर्षाभ्यां [2]C तावत् प्रमाणश्रुतिः [3]C च सम° for त्वासाम° [4]C °तन्त्र्युपपादनदण्डमूर्च्छने C °मूर्च्छिते [5]K तयोरन्यतरस्यां [6]KC कृत्वा (C कुर्यात्) पञ्चमस्यापकर्षे श्रुतिस्तामेव [7]K पञ्चमवशात् षड्जग्रामिकी [8]K om अपि [9]K om अपि [10]K धैवतर्षभौ [11]C मध्यमगान्धार निषाद° [12]C श्रुतिदर्शनविधानेन [13]C द्वाविंशत श्रुतयः [14]K adds भवन्ति 25 (C 23, K 26) [1]K चैव for चापि 26 (C 24, K 27) [1]K स्याद्धैवतस्त्रि श्रुतिस्तथा, [2]K निषादो द्विश्रुतिश्चैव षड्जग्रामे भवन्ति हि 27 (C 25, K 28) [1]K हि for च 28 (C 26, K 29) [1]C स्यात् [2]C तद्‌ यथा for यथा

अन्तरनिदर्शनमपि व्याख्यातम् ।

अथ मूर्छना द्वैग्रामिक्यश्चतुर्दश । [2]यथा —

[1]आद्या ह्युत्तरमन्द्रा स्याद्रजनी चोत्तरायता ।
चतुर्थी शुद्धषड्जा तु पञ्चमी मत्सरीकृता ॥ २९ ॥
अश्वक्रान्ता [1]तु षष्ठी [2]स्यात् सप्तमी चाभिरुद्गता ।
षड्जग्रामाश्रिता एता विज्ञेयाः सप्त मूर्छनाः ॥ ३० ॥

आसां षड्जनिषादधैवतपञ्चममध्यमगान्धारर्षभाः आद्याः स्वराः षड्जग्रामे ।

[4]अथ मध्यमग्रामे

सौवीरी हरिणाश्वा [1]च स्यात् कलोपनता तथा ।
[2]चतुर्थी शुद्धमध्या तु मार्गवी पौरवी तथा ॥ ३१ ॥
हृष्यका [1]चैव विज्ञेया सप्तमी द्विजसत्तमाः ।
मध्यम ग्रामजा ह्येता विज्ञेयाः सप्त मूर्छनाः ॥ ३२ ॥

आसां मध्यमगान्धारर्षभषड्जनिषादधैवतपञ्चमा [2]आनुपूर्व्या[दा]द्या स्वराः ।

तत्र षड्जग्रामे— षड्जेनोत्तरमन्द्रा निषादेन रजनी धैवतेनोत्तरायता पञ्चमेन शुद्धषड्जा मध्यमेन मत्सरीकृता गान्धारेणाश्वक्रान्ता ऋषभेणाभिरुद्गता इति ।

अथ मध्यमग्रामे-मध्यमेन सौवीरी गान्धारेण हरिणाश्वा ऋषभेण कलोपनता षड्जेन शुद्धमध्यमा निषादेन मार्गी धैवतेन पौरवी पञ्चमेन हृष्यका इति । एवमेताः क्रमयुताः पूर्णाः [4]षाडवौडवितीकृताः साधारणकृताश्चेति [5]चतुर्विधाश्चतुर्दश मूर्छनाः ।

क्रमयुक्ताः स्वराः सप्त मूर्छनास्त्वभिसंज्ञिताः ।
षट्पञ्चकस्वरास्तासां [1]षाडवौडविताः स्मृताः ॥ ३३ ॥

29 (C 27, K 30) [1]K आद्यावुत्तरमन्द्रा    30 (C 28, K 31) [1]K तथा for तु [2]K om स्यात्    [3]K °षभा स्वरा इति, C °र्षभाद्या षड्जग्रामे    [4]C om अथ
31 (C 29, K 32) [1]K °थ    [2]K reads this hem as शुद्धमध्या तथा चैव मार्गी स्यात् पौरवी तथा.    32 (C 30, K 33) [1]K चेति for चैव    [2]C om आनुपूर्व्याद्या स्वरा    [3]C क्रमयुता षट्पञ्चाशत् स्वरा स्मृता । K अक्रमयुक्ता पूर्णा etc    [4]C पूर्णा षाडवौडुवितसंज्ञिता K षाडवौडवितीकृता.    [5]C चतुर्विधश्च    33 (C 31, K 34) [1]C षाडवौडुवितस्मृता, K षाडवौडविता स्मृता

साधारणकृताश्चैव काकलीसमलंकृताः ।
अन्तरस्वरसंयुक्ता मूर्छना ग्रामयोर्द्वयोः ॥ ३४ ॥

द्विविधैकमूर्छनासिद्धिः । तत्र द्विश्रुतिप्रकर्षाद्धैवतीकृते गान्धारे [1]मूर्छना-ग्रामयोरन्य[त्वं]षड्जग्रामे । [2]तद्वशान्मध्यमादयो यथासंख्येन निषादादिमत्वं प्रतिपाद्यन्ते । मध्यमग्रामेऽपि[3] धैवतमार्दवात् [4]निषादोत्कर्षाद्द्वैविध्यं भवति । तुल्यश्रुत्यन्तरत्वाच्च [5]सञ्ज्ञान्यत्वम् । [6]चतुःश्रुत्यन्तरं पञ्चमधैव-तयोस्तद्वत् गान्धारोत्कर्षाच्चतुः[7]श्रुतिकमन्तरं भवति । शेषाश्चापि [8]मध्यम-पञ्चमधैवतनिषादर्षभषड्जा मध्यमादित्वं प्राप्नुवन्ति तुल्यश्रुत्यन्तरत्वात् । [9]अन्तरनिदर्शनमपि श्रुतिनिदर्शने प्रोक्तम् ।

तत्र [10]मूर्छनासंश्रितास्तानाश्चतुरशीतिः । तत्र एकोनपञ्चाशत् षट्स्वराः पञ्चत्रिंशत् पञ्चस्वराः । लक्षणं तु [11]षट्स्वराणां सप्तविधं यथा [12]षड्जर्षभनिषाद-पञ्चमहीनाश्चत्वारस्तानाः षड्जग्रामे । मध्यमग्रामे तु [13]षड्जर्षभगान्धार-हीनास्त्रयस्तानाः । [14]एवमेते सर्वासु षाडवासु मूर्छनासु क्रियमाणा भवन्त्ये-कोनपञ्चाशत् तानाः । पञ्चस्वराणां तु पञ्चविधमेव लक्षणम् । यथा षड्ज-पञ्चमहीना ऋषभपञ्चमहीना गान्धारनिषादहीना इति त्रयस्तानाः षड्जग्रामे । मध्यमग्रामे तु [15]ऋषभधैवतहीना गान्धारनिषादहीना इति [16]द्वौ तानौ । एवं पञ्चस्वराः सर्वासु मूर्छनासु क्रियमाणास्तानाः [17]पञ्चत्रिंशद् भवन्ति । षड्जग्रामे एकविंशतिर्मध्यमग्रामे चतुर्दश । एवमेते एकत्र गम्यमानाश्चतुरशीतिर्भवन्ति ।

द्विविधास्तानक्रिया तन्त्र्यां प्रवेशो निग्रहश्च । तत्र प्रवेशो नामाधरस्वर-प्रकर्षाद् उत्तरस्वरमार्दवाद् [18]वा । निग्रहस्त्वसंस्पर्शः । मध्यमस्वरासंस्पर्शः । मध्यमस्वरेण तु वैणेन मूर्छनानिर्देशः भवत्यनाशित्वात् । मध्यमस्वरस्य [ न ] निग्रहः प्रवेशो वा । [19]इत्थं प्रयोक्तृश्रोतृसुखार्थं [20]तानमूर्छना[-नाना-]त्वम् ।

34 (C 32 K 35) [1]K मूर्छनायामयोरन्यत्व, C मूर्छनाग्रामयोरन्यतरत्वम्, [2]K om तद्वशान्मध्य-मादयो प्रतिपाद्यन्ते [3]C om °ऽपि [4]C om निषादोत्कर्षाद् [5]C om सञ्ज्ञान्यत्वम् [6]K चतुःश्रुतिकमन्तर C, श्रुत्यन्तर [7]K श्रुतिकमेव भवति [8]K °निषादषड्जर्षभा [9]C अन्तरदर्शन° [10]C मूर्छनातानाः° [11]C षाडवाणां for षट्स्वराणां [12]C om षड्ज° [13]C °हीनास्त्रयस्तानाः° [14]K एवमेते सर्वासु मूर्छनासु C षाडवासु मूर्छनासु [15]C षड्जधैवत-हीनो निषादगान्धारहीन K गान्धारनिषादषड्जहीनो ऋषभधैवतहीना विति । [16]C द्वौ स्थानाविति [17]C षट्त्रिंशत् [18]C च for वा [19]C om इत्थं [20]KC तान मूर्छनात्वं, Ag मूर्छना नानात्व (p 62)

मूर्छना [-तान-] प्रयोजनमपि [21]स्थानप्राप्ति । स्थान तु त्रिविधं पूर्वोक्तलक्षण [22]काकुविधाने ।

साधारणविधिमिदानीं वक्ष्याम । तत्र साधारणं नामाऽन्तरस्वरता । कस्मात् । [23]द्वयोरन्तरस्थं [ यत् ] तत् साधारण । [24]यथा ऋत्वन्तरे—

छायासु भवति शीतं प्रस्वेदो वा भवति चातपस्थस्य ।
न च नागतो वसन्तो न च निःशेष शिशिरकालः ॥ ३५ ॥

इति [1]कालसाधारणम् ।

द्वे साधारणे स्वरसाधारणं जातिसाधारण चेति । स्वरसाधारण काकल्यन्तरस्वरौ । तत्र द्विश्रुतिप्रकर्षान्निषादवान् काकलीसंज्ञो निषाद, न षड्जः । द्वाभ्यामन्तरस्वरत्वात् साधारणत्व प्रतिपद्यते । एव गान्धारोऽप्यन्तरस्वरसंज्ञ गान्धारो न मध्यम । तयोरन्तरस्वरत्वात् । अत एव [3]स्वरसाधारणम् । कस्मान्निषाद काकलीसंज्ञ । कलत्वात् काकली [4]कृष्टत्वाद्वा अति[5]सौक्ष्म्याद्वा अथवा [का]काक्षि[व]त्वाद् उभयसम्बन्धात् काकलीसंज्ञा । यथा षण्णां रसाना मध्ये लवण क्षारसंज्ञः एव निषाद• काकलीसंज्ञ । साधारणस्वरश्चान्तरसंज्ञो भवति । जातिसाधारणम् [7]एकग्रामाश्रयाना जातीना जात्योर्वा अन्यस्मिन् ग्रामे प्रत्यङ्गदर्शन स्वराणामवगमात् । स्वरसाधारण द्विविध द्वैग्रामिक्यम् । कस्मात् । षड्जग्रामे षड्जसाधारण मध्यमग्रामे मध्यमसाधारणम् । [8]साधारणमत्र स्वरविशेष इति [9]षड्जसाधारणम् । एव मध्यमग्रामेऽपि साधारणत्वम् । अस्य तु प्रयोगसौक्ष्म्यात् कैशिक नाम निष्पद्यते । एव स्वरसाधारणम् । अस्यापन्निषादगान्धारासु जातिषु प्रयोग । [10]अत्र श्लोकौ—

अन्तरस्वरसंयोगो नित्यमारोहिसंश्रय ।
[1]कार्यस्त्वल्पो विशेषेण नावरोही कदाचन ॥ ३६ ॥
क्रियमाणोऽवरोही स्यादल्पो वा यदि वा बहु ।
जातिराग श्रुतिश्चैव नयन्ते [1]त्वन्तरस्वरा ॥ ३७ ॥

[21]K स्थानप्राप्त्य [22]K काकुविधाविति [23]K द्वयोरन्तरे योऽर्थो भवति स साधारण [24]K यथात्वन्तरे 35 (C 33, K 36) [1]K कालसाधारणता C कालसाधारण [2]C °निषादादय । [3]C °साधारण तस्मान्निषाद, K °साधारण । कस्मात् । निषाद [4]K कटत्वाद् for कृष्टत्वाद् [5]C सौक्ष्म्यात्वाद् वा [6]K गान्धारशान्तर° for साधारणस्वरशान्तर° [7]K एकग्रामाणा विस्मिश्चातीना तु समवायात । प्रत्यङ्गेषु सज्ञा इति । स्वरसाधारण etc [8]KC साधारणोऽत्र [9]C षड्जाख्या° [10]C om अत्र श्लोकौ 36 (C 34, K 37) [1]K कार्य° स्वल्प° 37 (C 35 K 38) [1]C स्वन्तरे 38 (C 36, K 39)

जातिमिदानीं वक्ष्यामः ।

स्वरसाधारणगतास्तिस्रो ज्ञेयास्तु जातयः ।
मध्यमा पञ्चमी चैव षड्जमध्या तथैव च ॥ ३८ ॥
[1]आसामङ्गानि विज्ञेया षड्जमध्यमपञ्चमाः ।
यथास्वं दुर्बलतरा व्यक्ता सा पञ्चमी तथा [2] ॥ ३९ ॥
[1]षाड्ज्यार्षभी धैवती च नैषादी च तथा परा ।
षड्जोदीच्यवती [2]षड्जकैशिकी षड्जमध्यमा ॥ ४० ॥
[1]षड्जग्रामाश्रया ह्येता विज्ञेयाः सप्त जातयः ।
अत ऊर्ध्वं प्रवक्ष्यामि मध्यमग्रामसश्रयाः ॥ ४१ ॥
गान्धारी [1]रक्तगान्धारी गान्धारोदीच्यवा तथा ।[2]
मध्यमोदीच्यवा चैव मध्यमा पञ्चमी तथा ॥ ४२ ॥
[1]गान्धारपञ्चमी चान्ध्री नन्दयन्ती [2]तथा परा ।
कर्मारवी [3]कैशिकी च ज्ञेयास्त्वेकादशापरा ॥ ४३ ॥
जातयोऽष्टादशेत्येव याः पूर्वं गदिता मया ।
तास्त्वहं [1]सप्रवक्ष्यामि [2]न्यासापन्याससंयुताः ॥ ४४ ॥

एतासाम् अष्टादशानां सप्त स्वराख्याः । [3]जातयो द्विविधाः शुद्धा विकृताश्च । तत्र शुद्धाः षड्जग्रामे षाड्जी आर्षभी [4]धैवती निषादवती [5]च । गान्धारी मध्यमा पञ्चमी [6]चेति मध्यमग्रामे शुद्धा अन्यूनस्वराः स्वरांशग्रहन्यासाः । [7]एषाम् अन्यतमेन द्वाभ्यां बहुभिर्वा लक्षणैर्विक्रियाम् उपगता न्यासवर्जं विकृतसंज्ञा भवन्ति । [8]तेन ता एव शुद्धास्ता एव च विकृताः । न्यासविधावप्यासां मन्द्रो

39 (C 37, K 40) [1]K चासामङ्गानु [2]K reads after this 44
40 (C 38, K 42) [1]K षाड्जी चैवार्षभी चैव धैवती सनिषादिनी । C षड्जर्षभी etc [2]K चैव तथा वै षडजकैशिकी for षड्जकैशिकी etc 41 (C 39, K 43) [1]K षड्जमध्या तथा चैव षडजग्रामसमाश्रया 42 (C 40 K 44) [1]K मध्यमा चैव for रक्तगान्धारी । [2]K reads after this पञ्चमी रक्तगान्धारी तथा गान्धारपञ्चमी 43 (C, 41 K 45) [1]K मध्यमो दीच्यवा चैव for गान्धारपञ्चमी चान्ध्री [2]K तथैव च [3]K च विज्ञेया तथान्ध्री कैशिकी तथा for कैशिकी etc 44 (C 42, K 41) [1]K वर्तयिष्यामि for सप्रवक्ष्यामि [2]C न्यासपोन्यास° [3]C स्वरनामधेया सप्त स्वरा [4]K puts तत्र before जातयो [5]C सधैवती for धैवती [6]C om च [7]C om चेति and reads मध्यग्रामे [8]C एषो for एषाम् [9]C om this sentence

नियमाद्[10] भवति शुद्धासु विकृतास्वनियमात् । तत्रैकादश [11] ससर्गजा विकृता । परस्पर संयोगादेकादश निर्वर्तयन्ति । यथा —

शुद्धा विकृताश्चैव [1]हि समवायाज्जातयस्तु जायन्ते ।
ता एव [ सप्त ] [2]शुद्धा विकृता भवन्ति चैकादशान्यास्तु ॥ ४५ ॥
तासां या निर्वृत्ता स्वरेष्वथांशेषु जातिषु च जाति ।
ता वक्ष्यामि यथावत् सक्षेपेण क्रमेणेह ॥ ४६ ॥
स्यात् षड्जमध्यमाभ्या निर्वृत्ता षड्जमध्यमा जाति ।
[1]षाड्जीगान्धारीभ्या सम्भूतो षड्जकैशिकी वापि ॥ ४७ ॥
षाड्जी गान्धारीभ्या धैवत्याश्चापि या विनिष्पन्ना ।
ससर्गाद् विज्ञेया [1]सा षड्ज्योदीच्यवा जाति ॥ ४८ ॥
[1]षाड्जी गान्धारीभ्या धैवत्याश्चापि मध्यमायाश्च ।
गान्धारोदीच्यवा स्यान् निर्वृत्तो नामतो जाति ॥ ४९ ॥
[1]गान्धारपञ्चमीभ्या धैवत्याश्चापि मध्यमाया वा ।
[2]निर्वृत्ता या जाति सा मध्यमोदीच्यवा नाम्ना ॥ ५० ॥
[1]गान्धारपञ्चमीभ्या नैषादीमध्यमाभ्या च ।
रक्तगान्धारी नाम जाति स्याच् चतसृभिस्ताभि ॥ ५१ ॥
[1]गान्धारीषड्जाभ्या ससर्गाज् जायते चान्ध्री ।
[2]गान्धारीपञ्चमीभ्यामार्षभीभ्या चैव नन्दयन्ती तु ॥ ५२ ॥
[1]गान्धारीपञ्चमीभ्या जाता गान्धारपञ्चमी जाति ।
नैषाद्यार्षभीभ्या षड्ज्या चैव ससर्गात् ॥ ५३ ॥

[10]C puts fullstop after this [11]C om ससर्गजा विकृता and reads गान्धोऽविकृता
45 (C 43, K 46) [1] C om हि [2]CK शुद्धविकृता 46 (C 44, K 47)
47 (C 45a 46b K 48) [1]K गान्धारी षाड्जीभ्या संयोगात्, C षड्जगान्धारीभ्या
48 (C 45b 46 K 49) [1]C om सा 49 (C 47, K 50) [1]K reads this as षाड्जी गान्धारी पञ्चमी तथा धैवती च खलु जाति । गान्धारोदीच्यवती जाति निवर्तयन्त्येता ।
50 (C 48 K 51) [1]K गान्धारपञ्चमीभ्या मध्यमया विरचिता च धैवत्या [2]K reads this hem as जातिस्तु मध्यमोदीच्यवती सैव सदा ज्ञेया 51 (C 49, K 52) [1]K reads this hem as गान्धारपञ्चमयो सततमाश्चैव रक्तगान्धारी । गान्धारीधैवतीभ्यामान्ध्री सजायते जाति ॥
52 (C 50 K 52b 53a) [1]See above 51 note 1 [2]K reads this hem as यौगिस्तु नन्दयन्त्यान्धार्षभी पञ्चमी सगान्धारी 53 (C 51 K 54a) [1]K reads this hem as गान्धारपञ्चमयोर्योगात् गान्धारपञ्चमी जाति

[1]कर्मारवी नाम्ना जाति पूर्णा हि भवति चेयम् ।
धैवत्यार्षभहीना॰ पञ्चाद्या कैशिकी कुर्यु॑ ॥ ५४ ॥
एवं परस्परोत्पन्ना [1]ज्ञेया ह्येतास्तु जातय॰ ।
पृथग्लक्षणसयुक्ता द्वैग्रामिक्य॰ स्वराश्रया ॥ ५५ ॥
आभ्यश्चतस्रो [1]नियमाज् ज्ञेया सप्तस्वरा बुधै॰ ।
दश पञ्चस्वरा ज्ञेयाश्चतस्रश्चैव षट्स्वरा ॥ ५६ ॥
मध्यमोदीच्यवा चैव तथा [1]वै षड्जकैशिकी ।
कर्मारवी च सपूर्णास् [2]तथा गान्धारपञ्चमी ॥ ५७ ॥
[1]गान्धारी रक्तगान्धारी मध्यमा पञ्चमी तथा ।
कैशिकी [2]चेति विज्ञेया पञ्चैता मध्यमाश्रयाः ॥ ५८ ॥
[1]आर्षभी धैवती चैव नैषादी षड्जमध्यमा ।
षड्जोदीच्यवती चैव [2]षड्जग्रामसमाश्रया ॥ ५९ ॥
[1]पञ्चस्वरा दशैताश्च जातयो नित्यमेव हि ।
गान्धारोदीच्यवा चैव नन्दयन्ती च आन्ध्री च ॥ ६० ॥
[1]मध्यमग्रामसभूता षट्स्वरास्तिस्र एव च ।
षड्जग्रामे तु विज्ञेया षाड्ज्येका षट्स्वराश्रया ॥ ६१ ॥
[1]यास्ता पञ्चस्वरा प्रोक्ता याश्चैता॰ षट्स्वरा स्मृता ।
कदाचित् [2]षाडवीभूता [3]कदाचिच्चौडवीकृता ॥ ६२ ॥
सपूर्णा मध्यमग्रामे ज्ञेया कर्मारवा बुधै॰ ।
[1]मध्यमोदीच्यवा चैव तथा गान्धारपञ्चमी ॥ ६३ ॥

54 (C 52 K 53b) [1]K कर्मारवीं निषादी चार्षभी पञ्चमी कुर्यु॑  55 (C 53, K 55) [1]K विज्ञेया जातयो बुधै  56 (C 54, K 56) [1]C नियमात्  57 (C 55, K 57) [1]K च for वै  [2]K सदा for C तथा  58 (C 56, K 60) [1]C तथैव for गान्धारी [2]K चैव पञ्चैता मध्यमग्रामसश्रया  59 (C 57, K 59) [1]K reads this hem as निषादि न्यार्षभी चैव धैवती षड्जमध्यमा  [2]K षष षड्जाश्रिता ज्ञता for षड्जग्रामसमाश्रया 60 (C 58 K 58a) [1]K om this hem  [2]K reads this hem as षाड् आन्ध्री नन्दयन्ती च गान्धारोदीच्यवा तथा  61 (C 59, K 58b, 62b) [1]K reads probably this hem as चतस्र षट्स्वरा ज्ञेया पञ्चपञ्चस्वरा दश.  [2]K reads this as षट्स्वरा चैव विज्ञेया षाड्जी वै गान्धोल्भि  62 (C 60a, K 61) [1]C om this hem  [2]K °भूता for C भूता,  [3]C °कृता for K कृता  63 (C 60b, 61a, K 63) [1]K reads this hem, as गान्धारपञ्चमी चैव गान्धारीदीच्य वा तदा

षड्जग्रामे तु संपूर्णा विज्ञेया षड्जकैशिकी ।
[1]पुनश्च षट्स्वरा ज्ञेया गान्धारोदीच्यवा बुधैः ॥ ६४ ॥
[1]आन्ध्री च नन्दयन्ती च मध्यमग्रामसंश्रयाः ।
एवमेता बुधैर्ज्ञेया द्वैग्रामिक्यश्च जातयः ॥ ६५ ॥
अत ऊर्ध्वं प्रवक्ष्यामि तासामंशविकल्पनम् ।
[1]षट्स्वर्यं सप्तमांशा तु नेष्यते षड्जमध्यमा ॥ ६६ ॥
सषादिलोपात्तु गान्धारस्तत्रैव न भविष्यति ।
गान्धारी रक्तगान्धारी कैशिकीनां तु [1]पञ्चमः ॥ ६७ ॥
[1]षड्जायां चैव गान्धारमनंशं विद्धि षाडवे ।
[2]षाडवे धैवतो नास्ति षड्जोदीच्यवायां तथा ॥ ६८ ॥
सषादिलोपात् सप्तैते षाट्स्वर्ये तु विवर्जिताः ।
गान्धारी रक्तगान्धार्यौ षड्जमध्यमपञ्चमाः ॥ ६९ ॥
[1]सन्निपाताश्च विज्ञेया येषु [2]नौडवितं इमे ।
[3]द्वौ षड्जमध्यमांशेषु गान्धारोऽथनिषादवान् ॥ ७० ॥
ऋषभश्चैव [1]पञ्चम्यां [2]कैशिक्यां चैव धैवतः ।
एवं [3]च द्वादशैते वर्ज्याः पञ्चस्वरे सदा ॥ ७१ ॥
तास्वनौडविता नित्यं कर्तव्या जातयो बुधैः ।
सर्वस्वराणां [1]विहितो विनाशस्त्वथ जातिषु ॥ ७२ ॥
[1]मध्यमस्य विनाशस्तु कर्तव्यो न कदाचन ।
सर्वस्वराणां प्रवरो [2]ह्यविनाशी तु मध्यमः ॥
गान्धर्वकल्पेऽभिमतः [3]सामगैश्च महर्षिभिः ॥ ७३ ॥

64 (C 61b K 62a, 64a) [1]C om this hem 65 (C 62a, K 64b 65a) [1]C om this hem 66 (C 62b, 63a, K 65b 66a) [1]K षट्स्वरो सप्तमें त्व पि 67 (C 63b 64a K 66b 67a) [1]C पञ्चमम 68 (C 64b K 67b 68a) [1]C om this hem [2]K reads this hem as षड्जोदीच्यवत्यायां च धैवताय न षाडवम् 69 (C 65, K 68b 69a) 70 (C 66, K 69b 70a) [1]K सप्तमश्चैव for सनिषादश्च [2]K चौडवित भवेत [3]K °मध्यमाख्यो तु 71 (C 67, K 70b 71a) [1]C पञ्चम्या [2]C कैशिक्या [3]K हि द्वादशैते स्युः 72 (C 68, K 71b 72a) [1]K नाशस्तु विहितस्त्वथ जातिषु 73 (C 69, K 72b 73) [1]K न मध्यमस्य नाशस्तु कर्तव्यो हि कदाचन [2]K ह्यनाशी चैव मध्यम [3]K विहित for ऽभिमत [4]K सामगैरपि मध्यम

दशविध जातिलक्षणम् —

ग्रहांशौ तारमन्द्रौ च न्यासापन्यास[1] एव च ।
अल्पत्वं च बहुत्वं च षाडवौडविते तथा ॥ ७४ ॥

अथ ग्रहाः —

ग्रहस्तु सर्वजातीनामशवत्[2] परिकीर्तित ।
यत्प्रवृत्तौ [3]भवेद्गानं सोऽंशो ग्रहविकल्पित ॥ ७५ ॥

तत्रांशो नाम —

यस्मिन् वसति रागस्तु यस्माच्चैव प्रवर्तते ।
[1]नेता वै तारमन्द्राणां योऽत्यर्थमुपलभ्यते ॥ ७६ ॥
[1]मन्द्रतारविषया च पञ्चस्वरपरा गति ।
[2]अनेकस्वरसयोगे योऽत्यर्थमुपलभ्यते ॥ ७७ ॥
अन्यश्च बलिनो यस्य सवादी चानुवाद्यपि ।
[1]ग्रहापन्यासविन्याससंन्यासन्यासगोचर ।
[2]परिवार्य स्थितो यस्तु सोऽ ■ स्याद्दशलक्षण ॥ ७८ ॥
द्वैग्रामिकीना जातीनां सर्वासामपि नित्यश· ।
त्रिषष्टिरशा विज्ञेयास्तासा चैव तथा ग्रहा· ॥ ७९ ॥

[1]अंश ग्रहविधिमिदानीं वक्ष्याम· ।

मध्यमादीच्यवायास्तु नन्दयन्त्यास्तथैव च ।
तथा गान्धारपञ्चम्या· पञ्चमाऽशो ग्रह· [1]स्मृत· ॥ ८० ॥
धैवत्याश्च तथैवांशौ विज्ञेयौ धैवतर्षभौ ।
पञ्चम्यास्तु ग्रहावशौ भवत पञ्चमर्षभौ ॥ ८१ ॥

74 (C 70 K 74) [1]KC न्यासोपन्यास but K 115 and C 100 have अपन्यास 75 (C 71 K 75) [1]K ग्रहास्तु [2]एव हि कीर्तित [3]KC यत्प्रवृत्त [4]K भवेदय 76 (C 72 ab K 76a) [1]K रागश्च यस्मिन् वसति [2]K om this hem See Kalli on SR I 7 29 34 K नेता for C तेन 77 (C 72c 73a , K 76b 77a) [1]C मन्द्रश्च तारविषया, [2]C स्वरसयोगे 78 (C 73b-74 K 77b 78) [1]C ग्रहोपन्यास विन्यासान्यास [2]K परिवार्य, Kalli on S R I 7 32-34 reads this hem as चतुरगण दर्शेत etc. 79 (C 75 , K 66) [1]K चांशग्रहमिदानीं व्याख्यास्याम. 80 (C 76 K 67) [1]K स्मृत for मता 81 (C 77 K 68 ab)

गान्धारोदीच्यवायास्तु ग्रहांशौ षड्जमध्यमौ ।
आर्षभ्याश्च [1]तथैवांशा निषादर्षभधैवता ॥ ८२ ॥
[1]नैषादिन्या निषादस्तु गान्धारश्चर्षभस्तथा ।
अंशाश्च षड्जकैशिक्या षड्जगान्धारपञ्चमाः ॥ ८३ ॥
तिसृणामपि जातीना ग्रहास्त्वंशाश्च कीर्तिता ।
षड्जश्च मध्यमश्चैव निषादो धैवतस्तथा ॥ ८४ ॥
[1]अंशग्रहास्तु चत्वार षड्जोदीच्यवतीश्रिता ।
पञ्चमश्चर्षभश्चैव निषादो धैवतस्तथा ॥ ८५ ॥
[1]कर्मारव्यास्तथैवांशाश्चत्वारः सम्प्रकीर्तिता ।
गान्धारश्चर्षभश्चैव निषादः पञ्चमस्तथा ॥ ८६ ॥
[1]चत्वारोऽंशा भवन्त्यान्ध्र्या ग्रहाश्चैते तथैवहि ।
ऋषभश्चैव षड्जश्च मध्यम पञ्चमस्तथा ॥ ८७ ॥
[1]मध्यमाया ग्रहास्त्वंशा धैवतश्च प्रकीर्तित ।
षड्जाया षड्जगान्धारौ मध्यम पञ्चमस्तथा ॥ ८८ ॥
[1]धैवतश्चापि विज्ञेया ग्रहाश्चांशा प्रकीर्तिता ।
[2]निषादर्षभगान्धारा मध्यम पञ्चमस्तथा ॥ ८९ ॥
गान्धारी रक्तगान्धार्योर्ग्रहांशा परिकीर्तिता ।
[1]षर्जितर्षभयोगास्तु कैशिक्यांशा षडेव तु ॥ ९० ॥
[1]स्वरा सर्वे च विज्ञेया षड्जमध्याशजा ग्रहा ।
एव त्रिषष्टिर्विज्ञेया ग्रहाश्चांशाश्च जातिषु ॥ ९१ ॥

82 (C 78 K 88c 89a` [1]K तु निषादस्तु तथा चषभ धैवतौ for तथैवांशा etc 83 (C 79 K 89b 90a) [1]K निषाद्या च निषादस्तु गान्धारश्चर्षभस्तथा । तथा च षड्जकैशिक्या षड्जगान्धारपञ्चमा ॥ 84 (C 80, K 90b 91a) 85 (C 81 K 91b-92a) [1]K reads this hem as षड्जोदीच्यवती जातिय शाम्ल ग्राश कीर्तिता [2]K पञ्चनिषभर्यैव 86 (C 82, K 92b-93a) [1]K reads this as कर्मारव्या वुधैरंशा ग्रहाय परिकीर्तिता । गान्धारषभश्चैव पञ्चमोऽथ निषादवान 87 (C 83a, K 93b-94a) [1]C om this hem 88 (C 83b 84a, K 94b, 96a) [1]K reads this as मध्यमाया ग्रहा ज्ञेया च ग्रांशैव सधैवता । निषादषड्जगान्धारा मध्यम पञ्चमस्तथा ॥ 89 (C 84b 85a K 96b, 95a) [1]C धैवतश्चापि [2]K निषादषड्जगान्धारा 90 (C 85b 86a, K 95b, 97a) [1]K reads this hem as कैशिक्या चर्षभहीना ग्रहांशा षट्स्वरा स्मृता 91 (C 86b 87a, K 97b 98a) [1]K सर्वस्वरा ग्रहांशाय विज्ञेया षड्जमध्यमा

[1]अंशवच्च ग्रहास्तासां सर्वासामेव नित्यशः ।
सर्वासामेव जातीनां त्रिजातिस्तु [2]गणः स्मृतः ॥ ९२ ॥
सर्वथा चैव विज्ञेया [3]वर्धमानस्वरास्तथा ॥
एकस्वरो द्विस्वरश्च त्रिस्वरोऽथ चतुःस्वरः ।
पञ्चस्वरो षट्स्वरश्च तथा सप्तस्वरोऽपि वा' ॥ ९३ ॥

[4]अथ पञ्चस्वरपरा [5]तारगतिः ।
अंशात्तारगतिं विद्याद् था चतुर्थस्वरादिह ।
[1]पञ्चमं त्वथवा गच्छेत्ततोऽंशविहितं त्विह ।
आ पञ्चमात् [2]सप्तमाद् वा नातः परमिहेष्यते ॥ ९४ ॥

त्रिविधा मन्द्रगतिः —अंशपरा न्यासपरा[3] अपन्यासपरा चेति ।
[1]मन्द्रस्त्वंशात् परो नास्ति न्यासे तु द्वौ व्यवस्थितौ ।
[2]गान्धारे च ग्रहे न्यासे [3]दृष्टमार्षभधैवतम् ॥ ९५ ॥

द्विविधमल्पत्वं लङ्घनाद् अनभ्यासाच्च । [4]तत्र षाडवौडवितकरणार्थम् [5]अंशानां गीतानाम् आन्तरमार्गम् उपगतानां स्वराणां लङ्घनात् । अनभ्यासाच्च सकृदुच्चारणं यथाजाति । तद्वत् बहुत्वम् अल्पत्वविपर्ययाद् [7]द्विविधमेवा-न्येषामपि बलिनां सञ्चारः ।

[1]अल्पत्वं च बहुत्वं च [2]तथा पूर्वविनिश्चयात् ।
जातिस्वरैश्च नित्यं स्यात् [3]आत्यल्पत्वं द्विधा च तत् ॥ ९६ ॥

92 (C 87b 88a K 98b 99a) [1]C च ग्रहाश्च यहास्तासां K दृशास्तासां [2]K गणा स्मृता [illegible] गुण स्मृत 93 (C 88b 89, K 99b-100) [1]K वर्धमानस्वरा यदा [2]K adds after this, 11 couplets (101 113) which seem to be spurious [3]K om अथ [4]C adds षड्ग्रामात् after स्वरपरा 94 (C 92b 93, K 78 prose 79) [1]K om this hem [2]Kalli on SR I 7 35 36 reads सप्तमाद्, Matanga p 58 so, but CK पञ्चमाद् [3]C adds चेति after न्यासपरा 95 (C 94 89 prose, K 79 prose 80 81 prose) [1]C मन्द्रो द्वा ग्रपरा K मन्द्र स्त ग्रपरो but Kalli (SR I 7 37 39) reads मन्द्रस्त्वंशात् परो [2]K गान्धारे न्यासलिङ्गेन, Kalli (*loc cit*) गान्धार न्यासनिर्दिष्ट [3]K ऋषभ धैवतम् Kalli (*loc cit*) ऋषभ धैवतम [4]C om तत्र [5]C puts गीतानाम् आन्तरमार्गम् before षाडवौ° [6]C च अंशानां गीतानामान्तरमार्गम् उपगतानां स्वराणां [7]C द्विविधमेवामन्येषामपि 96 (C 90, K 82) [1]K अल्पत्वे च बहुत्वे च [2]C यथापूर्वं विनिश्चयात् [3]C अन्यल्पत्व द्विधागत

सञ्चारोऽ श वलस्थानामल्पत्व दुर्बलेषु च ।
[1]द्विविधोऽन्तरमार्गस्तु जातीना व्यक्तिकारक ॥ ९७ ॥

[2]षट्स्वरं षाडवित चतुर्दशविध सप्तचत्वारिंशत्प्रकारम् । पूर्वोक्तविधानं यथा जात्यशप्रकारैरिति ।

पञ्चस्वरमौडवित विज्ञेयं दशविध प्रयोगज्ञै ।
त्रि शत्प्रकारविहित पूर्वोक्त लक्षण [1]चास्य ॥ ९८ ॥
षट्स्वरस्य [1]प्रयोगोऽस्ति तथा पञ्चस्वरस्य च ।
चतु स्वरप्रयोगोऽस्ति ह्यवकृष्ट ध्रुवास्वथ ॥ ९९ ॥

अथ न्यास — [3]अंशसमाप्तौ स चैकविंशतिविध । [4]तद्वदपन्यासोऽपि अ शमध्ये षट्पञ्चाशतसख्य ।

[1]न्यासो ह्यं[शा]समाप्तौ स चैकवि शतिविधो विधातव्य ।
षट्पञ्चाशत्सख्योऽ[श]मध्येऽपन्यास एव स्यात् ॥ १०० ॥
एवमुक्तमिद सम्यग् जातीनां लक्षण मया ।
अत ऊर्ध्वं प्रवक्ष्यामि न्यासोपन्यासकल्पनम् ॥ १०१ ॥
अंशा स्यु पञ्च षड्जाद्या निषादर्षभवर्जिता ।
[1]अपन्यासो भवेदत्र गान्धार पञ्चमस्तथा ॥ १०२ ॥
[1]न्यासश्चात्र भवेत् षड्जो लोप्य सप्तम एव तु ।
षाडव [2]सप्तमापेतम् अल्पौ वै सप्तमर्षभौ ॥ १०३ ॥
षड्जगान्धारसञ्चारस्तथा धैवतषड्जयो ।
गान्धारस्य [1]च बाहुल्य त्वत्र कार्यं प्रयोक्तृभि ॥ १०४ ॥

97 (C 91 K 83) [1]C विविधो for द्विविधो [2]C om this prose passage
98 (C 94 *ka*, K 84) [1]K लक्ष 99 (C 95 K 85, 60 prose) [1]C प्रयोगोऽ,
[2]C चतुःस्वरप्रयोगोऽपि दृश्यपेष प्रयुज्यते [3]K च गमसामौ K reads this after एकविंशतिविध and om च [4]C reads स च कदाचित् आन्दन्तरोपन्यास स for तद्वदपन्यासोऽपि च गमध्ये
100 (K 81) [1]C om this च ग in this couplet has been emended to च अ
101 (C 96 100a) [1]K om this [2]C wrongly repeats here 62b 102 (C 97a, K 112) [1]C om this hem 103 (C 97b 98a K 113) [1]C as न्यास सर्व उपन्यासो स्याता गान्धारपञ्चमौ [2]CK सप्तमोपेत 104 (C 98b 99a, K 114) [1]K तु for च

[1]अंशजातास्तथार्षभ्यान्निषादर्षभधैवता ।
एत एव ह्यपन्यासा न्यासश्च ऋषभः स्मृतः[2] ॥ १०५ ॥
अल्पत्वं च विशेषेण भवेत् षाडवकारिणः ।
लङ्घनं पञ्चमस्यैव स्यादारोहणसंश्रयात् ॥ १०६ ॥
षट्स्वरं सप्तमहीने पञ्चस्वर्यं च पञ्चमम् ।
विवादिनां स्वराणां च संचारोऽत्र विधीयते ॥ १०७ ॥
[1]धैवत्यां धैवतो न्यासः स्यादंशौ धैवतर्षभौ ।
अपन्यासा भवन्त्यत्र धैवतर्षभमध्यमाः ॥ १०८ ॥
षड्जपञ्चमहीनं च पञ्चस्वर्यं विधीयते ।
[1]पञ्चमेन विना चैव षाडवं परिकीर्तितम् ॥ १०९ ॥
आरोहिणौ च कर्तव्यौ लङ्घनीयौ [1]तथैव च
[2]निषादश्चर्षभश्चैव गान्धारो बलवांस्तथा ॥ ११० ॥
[1]निषादिन्यां नैषादोऽंशो गान्धारस्त्वर्षभः स्मृतः ।
एत एव ह्यपन्यासा न्यासश्चैवात्र सप्तमः ॥ १११ ॥
[1]धैवत्या इव कर्तव्यौ षाडवौडविते तथा ।
तद्वच्च लङ्घनीयौ तु बलवन्तौ तथैव च ॥ ११२ ॥
[1]अंशास्तु षड्जकैशिक्या षड्जगान्धारपञ्चमाः ।
अपन्यासा भवन्त्यत्र षड्जसप्तमपञ्चमाः ॥ ११३ ॥
[1]गान्धारश्च भवेन्न्यासो [2]हीनस्वर्यं न चात्र तु ।
हीनस्वरस्याभावात् तु सम्पूर्णा चेयमिष्यते ।
दौर्बल्यं चात्र कर्तव्यं धैवतस्यर्षभस्य च ॥ ११४ ॥
षड्जश्च मध्यमश्चैव निषादो [1]धैवतस्तथा ।
स्युः षड्जोदीच्यवत्यंशा [2]न्यासश्चैव तु मध्यमः ॥ ११५ ॥

105 (C 99b 100b K 115) [1]K चार्षभ्यां तु भवन्त्यंशा धैवतर्षभसप्तमाः 106 (C 101 K 116) 107 (C 102 K 117) 108 (C 103, K 118) [1]K धैवत्यां धैवतर्षभावंशौ न्यासः स्याद्धैवतः 109 (C 104a K 119) [1]C om this hem 110 (C 104b, K 120) [1]C om this hem 111 (K 121) [1]C om this couplet 112 (K 122) [1]C om this couplet 113 (K 123) [1]C om this couplet 114 (K 124) [1]C om this couplet [2]C हीनस्वरस्य [1] भावात् सम्पूर्णा चेयमिष्यते for हीनस्वर्यं न चात्र तु 115 (C 105b 106a, K 125) [1]C धैवत ऋत [2]C न्यासो मध्यम इष्यते

[1]अपन्यासो भवत्यस्या धैवत षड्ज एव च ।
परस्परमिहांशाना संचारश्च विधीयते ॥ ११६ ॥
[1]पञ्चमर्षभहीन तु पञ्चस्वर्यं विधीयते ।
ऋषभ षाडवे हीनो [2]गान्धारश्च बलीभवेत् ॥ ११७ ॥
[1]सर्वेऽशा षड्जमध्याया [2]अपन्यासास्तु एव च ।
[3]षड्जो वा मध्यमो वापि न्यास कार्य प्रयोक्तृभि ॥ ११८ ॥
[1]गान्धारसप्तमापेतं पञ्चस्वर्यं विधीयते ।
षाडव [2]सप्तमापेत चात्र कार्यं प्रयोगत ॥ ११९ ॥
सर्वस्वराणा सञ्चार [1]इष्टस्तस्या प्रयोक्तृभि ।
षड्जग्रामाश्रिता ह्येता विज्ञेया सप्त जातय ॥ १२० ॥
अत [1]ऊर्ध्वं प्रवक्ष्यामि मध्यमग्रामसंश्रिता
[2]अंशा स्यु पञ्च गान्धार्या धैवतर्षभवर्जिता ॥ १२१ ॥
[1]अपन्यासस्तथमस्यास्तु षड्जपञ्चमयोरपि ।
[2]गान्धारश्च भवेन्न्यास षाडव चर्षभं विना ॥ १२२ ॥
ऋषभधैवतापेत तथा चौडवित भवेत् ।
लङ्घनीयौ च तौ नित्यमृषभो धैवत व्रजेत् ॥
षड्जमध्यमयोरत्र बाहुल्य सविधीयते ॥ १२३ ॥
[1]गान्धारोविहितं न्यास हीनस्वर्यं च लक्षणम् ।
सर्वं च रक्तपूर्वाया गान्धार्याश्च विनिर्दिशेत् ॥ १२४ ॥

116 (C 106b-107a, K 126) [1]C उपन्यासाविह स्याता धैवतर्षभ एव च [2]C परस्परं षाडवमे गान्धारीनुषभो भवेत् 117 (C 107b 108a, K 127) [1]C पञ्चमस्वरहीन [2]K तु तत्र वै [3]C षड्जे च तयो भवेत् 118 (C 108b 109a K 128) [1]C सर्वेषा for सर्वेंऽशा [2]C अपन्यासा त [3]C षड्जश्च मध्यमश्चैव न्यासौ कार्यौ 119 (C 109b-110a, K 129) [1]C K. गान्धारसप्तमीपेत [2]K तु तत्र वै [3]C ऋषभ षाडवे हीनो दुर्बल स विधीयत [4]K सप्तमीपेत 120 (C 110b 111a, K 130) K इष्टस्तस्या 121 (C 111b 112a, K. 131) [1]K पर for ऊर्ध्वं, K गान्धार्या पञ्चधारम्या धैवतर्षभवर्जिता 122 (C 112b-113a, K 132) [1]K अपन्यासो भवेदत्र षड्ज पञ्चम एव च [2]K गान्धारीऽत्र 123 (K 133) [1]C om this couplet, but reads in its place the following धैवतर्षभ गान्धाया कर्तव्य सप्रयोगत ॥ and प्रयोक्तृभि प्रयोक्तव्य गान्धारस्य च लङ्घनम् (C 113b, 114a) 124 (C 115, K 134 135a) [1]C गान्धारो विहित

¹बलवन्तौ विधातव्यौ धैवत सप्तमस्तथा ।
गान्धारषड्जयोरत्र सञ्चारस्त्वृषभं विना ॥ १२५ ॥
¹अपन्यासस्तु कार्य स्यादेक एवात्र मध्यम. ।
²गान्धारोदीच्यवायां तु तावंशौ षड्जमध्यमौ ॥ १२६ ॥
पञ्चस्वर्यं ¹भवेच्चात्र ²षाट्स्वर्यमृषभं विना ।
³अस्यास्त्वल्पबहुत्वस्य न्यासापन्यासयोस्तथा ।
य षड्जोदीच्यवायास्तु सर्वोऽत्र स विधि स्मृत ³ ॥ १२७ ॥
¹मध्यमायां भवन्त्यंशा ²सषड्जर्षभमध्यमा. ।
³पञ्चमो धैवतश्चैवापन्यासस्तत्र एव तु ॥ १२८ ॥
¹न्यासो मध्यम एवात्र द्विश्रुत्योर्हीनता भवेत् ।
²गान्धारो सप्तमापेत पञ्चस्वर्यं विधीयते ॥ १२९ ॥
¹गान्धारहीनं षट्स्वर्यं बाहुल्यं षड्जमध्ययो ।
²गान्धारस्य च दौर्बल्यं मध्यमाया विधीयते ॥ १३० ॥
मध्यमोदीच्यवायास्तु ¹पञ्चमोंऽशो प्रकीर्तित ।
शेषो विधिस्तु कर्तव्यो² गान्धारोदीच्यवा गत ॥ १३१ ॥
¹द्वावंशावपि पञ्चम्या भवत॰ पञ्चमर्षभौ ।
²अपन्यासो निषादश्च पञ्चमर्षभसंयुत ॥ १३२ ॥
¹न्यास पञ्चम एव स्यात् मध्यमर्षभहीनता ।
²मध्यमायां तु कर्तव्ये षाडवौडविते ³यथा ॥ १३३ ॥

125 (C 116, K 135b-136a) [1]K बलिनौ भवतश्चात्र धैवत सप्तमस्तदा  126 (C 117, K 136b-137a) [1]K अपन्यासस्तदा चात्र एको वै मध्यम स्मृत  [2]K गान्धारोदीच्यवायां च विज्ञेयौ षड्जमध्यमौ  127 (C 118, K 137b 138) [1]K न चात्र for भवेच्चात्र  [2]C षाट्स्वर्यं चर्षभं  [3]C adds कार्योऽप्यावर्तमार्गेषु न्यासे पन्यास एव तु । तथाल्पत्वात् द्विविधौ षड्जोदीच्यवतीसमा (C 118b 119a)  128 (C 119b-120a, K 139) [1]C मध्यमाया [2]K विना गान्धारसप्तमौ  [3]K एत एव ह्यपन्यासा न्यास एव हि मध्यम for this hem  129 (C 120b K 140a)  [1]K om this hem  [2]C om this hem  130 (C 121, K 140b-141) [1]C गान्धारहीन बाहुल्य षट्स्वर्यं षड्जमध्ययो  [2]K for this the following षाट्स्वर्यं चाप्यगान्धारं कर्तव्य तु प्रयोगत । षड्जमध्यमयोश्चात्र कार्यं बाहुल्यमेव च । गान्धारन्यूनं चात्र नित्य कार्यं प्रयोगवित् ॥  131 (C 122, K 142) [1]K पञ्चमांशो न कीर्तिते  [2]C °दीच्यवांशत.  132 (C 123, 124a, K 143) [1]K for this couplet द्वावंशावत्र पञ्चम्या ऋषभ पञ्चमस्तथा । सनिषादावपन्यासौ न्यासश्चात्र पञ्चम ॥  133 (C 124a, K 144a) [1]K om this hem  [2]C, om this hem  [3]Emend तदा into यथा

[1]दुर्बलास्त्वात्र कर्तव्या षड्जगान्धारमध्यमाः ।
[2]कुर्याच्चाप्यत्र सञ्चारं मध्यमस्यर्षभस्य च ॥
[3]गान्धारगमनं चात्र संसप्तम्यां संप्रयोजयेत् ॥ १३४ ॥
अथ गान्धारपञ्चम्याः, [1]पञ्चमोऽंशः प्रकीर्तितः ।
[2]पञ्चमश्चर्षभश्चैव अपन्यासौ प्रकीर्तितौ ॥ १३५ ॥
[1]गान्धारोऽत्र भवेन्न्यासो हीनस्वर्यं च नेष्यते ।
पञ्चम्यास्त्वथ गान्धार्यां सञ्चरश्च विधीयते ॥ १३६ ॥
ऋषभः पञ्चमश्चैव गान्धारोऽथ निषादवान् ।
चत्वारोऽंशा [1]भवन्त्यान्ध्र्या अपन्यासास्त एव [2]च ॥ १३७ ॥
गान्धारश्च भवेन्न्यासो [1]षड्जापेतञ्च षाडवम् ।
[2]गान्धारषड्जयोरत्र सञ्चारः स्यात्परस्परम् ॥ १३८ ॥
[1]षट्सप्तमयोश्चात्र [2]न्यासो गत्यनुपूर्वशः ।
षड्जस्य लङ्घनं [3]चात्र नास्ति चौडवितं [4]तथा ॥ १३९ ॥
[1]नन्दयन्त्या भवत्यंशः पञ्चमो नित्यमेव तु ।
स्यातामस्यामुपन्यासौ मध्यमः पञ्चमस्तथा ॥ १४० ॥
[1]षाडवं षड्जहीनं तु लङ्घनीयः स एव तु ।
आन्ध्रीवत्सञ्चारो नित्यमृषभस्य च लङ्घनम् ॥ १४१ ॥
[1]तत्र मन्द्रगतिः प्रोक्ता नित्यं गानप्रयोक्तृभिः ।
[2]तारगत्याथ षड्जस्तु कदाचिन्नातिवर्तते ॥ १४२ ॥
[1]गान्धारश्च ग्रहः कार्यस्तथा [2]न्यासश्च नित्यशः ।
[3]कर्मारव्या भवन्त्यंशाः पञ्चमर्षभधैवताः ॥ १४३ ॥

134 (C 124b, 125a, K 144b 145) [1]K दौर्बल्यं चात्र विज्ञेयं षड्जगान्धारपञ्चमैः [2]K कुर्यादस्या ■ सञ्चारं पञ्चमस्यर्षभस्य च, [3]K गान्धारगमनं चैव कार्यमन्यत्र सप्तम 135 (C 125, K 146) [1]C पञ्चमाश्च [2]C पञ्चमश्चर्षभश्चैव 136 (C 127 K 147) [1]K न्यासश्चात्र तु गान्धारः स च पूर्वस्वरोभवेत्, गान्धारपञ्चमाख्या च सञ्चारोऽत्र विधीयते 137 (C 128, K 148) [1]K, भवन्त्यान्ध्र्याम् [2]K तु for च 138 (C 129 K 149) [1]K षड्जोपेतं [2]K °जयोश्चापि 139 (C 130, K 150) [1]K सप्तमस्य ■ षड्जस्य [2]C न्यासगत्यापूर्वश [3]K कार्ये for चात्र, [4]K सदा for तथा 140 (C 131, K 151) [1]K नन्दयन्त्या क्रमाच्चास्तस्यन्यासौऽश एव च। गान्धारी मध्यमश्चैव पञ्चमश्चेति नित्यशः। 141 (C 132, K 152) [1]K षड्जेनाशो लङ्घनीयः चान्ध्रीसञ्चारं इष्यते। लङ्घनमृषभस्यात्र तत्र मन्द्रगतं स्मृतम्। 142 (C 133, K 153a) [1] See above note 1 to 141 [2]K तारगत्याथ षड्ज स्यात् 143 (C 134, K 153b-154a) [1]C गान्धारे च, [2]C नाशश्च [3]K कर्मारव्या भूता ■ शः

¹निषादश्चेति चत्वारो ग्रहाश्च परिकीर्तिताः ।
एत एव ह्यपन्यासा न्यासः पञ्चम इष्यते ॥ १४४ ॥
हीनस्वर्यं न चात्र स्याद्नशा बलिनस्तथा ।
गान्धारस्य विशेषेण सर्वतो गमनं भवेत् ॥ १४५ ॥
¹कैशिक्यास्तु भवेन्त्यंशाः सर्वे चर्षभवर्जिताः ।
एत एव अपन्यासा न्यासौ गान्धारसप्तमौ ॥ १४६ ॥
धैवतेऽशे निषादे च न्यासः पञ्चम इष्यते ।
¹दौर्बल्यमृषभस्यात्र लङ्घनं च विशेषतः ॥ १४७ ॥
¹अपन्यासः कदाचित्तु ऋषभोऽपि भवेदिह ।
²ऋषभं षाडवं हीनो धैवतश्चर्षभं विना ॥ १४८ ॥
¹तथा चौडवितं कार्यं बलिनौ चात्र पञ्चमौ ।
²षड्जमध्यावदत्रापि सञ्चारस्तु विधीयते ॥ १४९ ॥
एवमेता बुधैर्ज्ञेया जातयो दशलक्षणाः ।
¹स्वैः स्वैश्च करणैर्योज्या पदेष्वभिनयैरपि ॥ १५० ॥
¹आसामिदानीं वक्ष्यामि रसभावविकल्पनम् ।
²कार्या यस्मिन् रसे याश्च ताश्च मे सन्निबोधत ॥ १५१ ॥

इति भारतीये नाट्यशास्त्रे धातोद्यविधिर्नाम अष्टाविंशोऽध्यायः ॥ २८ ॥

144 45 (C 135 136 K 154b, 155) ¹K reads for 144 145 the following धैवतस्य निषादस्याप्यन्यासास्त एव तु । पञ्चमश्च भवेन्न्यासो हीनस्वर्यं न चात्र तु । गान्धारस्य विशेषेण सर्वतो गमनं भवेत् । 146 (C 137 K 156) ¹K. कैशिक्यांशास्तु विज्ञेयाः स्वराः सर्वर्षभं विना. 147 (C 138 K 157a, 159a) ¹C दौर्बल्यमृषभस्यास्य 148 (C 139a, 140a, K 157b, 158a) ¹C अपन्यास लङ्घनं बाहुल्यं च कदाचन ²K षाडवं षाडवं चात्र (भाव) धैवतर्षभवर्जितम् 149 (C 140b 141a K 158b, 159b) ¹K तथा चौडवितं कार्यं बलिनौ षड्जपञ्चमौ, C कार्यश्चौडवितो भाव बलिनौ चात्र पञ्चमौ ²C भवेदल्पस्य संचारः षड्जमध्यवदिष्यते (C 139b) 150 (C 141b C 160) ¹C om this hem K. स्वैः स्वैश्च 151 (C 141 c, K 161) ¹C om. this hem ²K reads यस्य यस्मिन् रसे यद् यत् तत्त्व मे सन्निबोधत ।

# एकोनत्रिंशोऽध्यायः

[1]षड्जोदीच्यवती चैव [2]षड्जमध्या तथैव च।
[3]मध्यमपञ्चमबाहुल्यात् कार्यं शृङ्गारहास्ययोः ॥ १ ॥
[1]षाड्जी त्वथार्षभी चैव [2]षड्जर्षभग्रहस्वरात्।
वीररौद्राद्भुतेष्वेते [3]प्रयोज्या गानयोक्तृभिः ॥ २ ॥
[1]निषादांशे च नैषादी गान्धारे षड्जकैशिकी।
करुणे च रसे कार्या जातिर्गानविशारदैः ॥ ३ ॥[2]
धैवती [1]धैवतांशा च बीभत्से सभयानके।
[2]धैवती करुणे योज्या चोन्मादे षड्जमध्यमा ॥ ४ ॥
ध्रुवाविधाने कर्तव्या [1]जातिर्गा[न[2]प्रयोक्तृभिः]।
[3]रसं कार्यमवस्थां च ज्ञात्वा [नाट्ये प्रयत्नतः] ॥ ५ ॥
षड्जग्रामाश्रिता ह्येता विज्ञेया जातयो बुधैः।

अत ऊर्ध्वं प्रवक्ष्यामि [1]मध्यमग्रामसंश्रयाः ॥ ६ ॥
[1]गान्धारीरक्तगान्धार्यौ गान्धारांशोपपत्तितः।
करुणे तु रसे [2]कार्ये [3]निषादेंऽशे तथैव च ॥ ७ ॥
मध्यमा पञ्चमी चैव नन्दयन्ती तथैव च।
[1]गान्धारपञ्चमी चैव मध्यमोदीच्यवा तथा ॥ ८ ॥

यत्राधिपतिमूर्त्तं चन्द्रव्योमाख्या यष्टी मुनिभिर्यस्य [7]कार्या प्रोक्ता त्रैलोक्यगुरुं तमचिन्त्यमजं विद्यानिलयं भैरवरूपं [8]षट्त्यागधरं [9]विद्युत्पत्तिप्रत्ययनिलिसं [10]सूक्ष्मासन मचिन्त्य चन्द्रार्धधरम् [11]तिलकार्धधरं नेत्रार्धधरम् [12]भुजार्धधरम् कान्तार्धधरं । [13]बहुलैर्विविधैर्गिरिशृङ्गैर्विकटैर्मुण्डैर्विपुलैर्निर्मलै प्रमथैः परिवृतमीशं [14]सततं प्रणत ।

आसारितानां सर्वेषां [1]त्रयो भेदाः प्रकीर्तिता ।
यथाक्षरं [2]द्विसंख्यातं त्रिसंख्यातमथापि वा ॥ ११९ ॥
[1]तालच्छेदद्विगुणितैः [2]समवर्णैर्गणैः कृतम् ।
अनिवृत्ताक्षरपदं यथाक्षरमिति स्मृतम् ॥ १२० ॥
निवृत्त्या यत्समायुक्तं द्विसंख्यातं [1]तदुच्यते ।
निवृत्तिद्वयसम्पन्नं त्रिसंख्यातमितीष्यते ॥ १२१ ॥
चतुष्पादी चतुर्मात्रा यथोक्तगुरुलाघवा ।
यथायोगं [1]गणाः कार्या गीतेष्वासारितेषु च ॥ १२२ ॥
अक्षरैर्या चतुर्मात्रा द्विमात्रा वर्णतस्तथा ।
चित्रे कला भवेद्या तु वृत्तौ सा द्विगुणा स्मृता ॥ १२३ ॥
वृत्तौ या वर्णमात्रा [1]तु चतुर्मात्रा प्रकीर्तिता ।
द्विगुणा दक्षिणे [2]सा तु कला ज्ञेया प्रयोक्तृभिः ॥ १२४ ॥
न मार्गभेदोऽक्षरेषु कश्चिदप्युपपद्यते ।
[1]वर्णमात्रा द्विगुणिताद्वर्णभेदः प्रकीर्तितः ॥ १२५ ॥
यथाक्षरेषु भूयिष्ठं गीतेष्वासारितेषु च ।
विधिरेष समुद्दिष्टो [1]वर्णतालसमाश्रयः ॥ १२६ ॥

[7] C. om. [illegible] [8] K [illegible] [9] C [illegible] [10] K [illegible] [11] C [illegible] [12] K om. this [13] K [illegible]. [14] K puts before this [illegible] 119 (C 208, K 108) [1] K [illegible]. [2] C [illegible]. 120 (C 209, K 109) [1] K [illegible] [2] C [illegible] K [illegible]. 121 (C 210, K 110) [1] K [illegible] [2] C [illegible] K [illegible]. 122 (C 211, K 111) [1] C. [illegible] [2] C [illegible] 123 (C. 212, K 112) [1] K [illegible] 124 (C 213, K 113) [1] K [illegible] [2] K [illegible]. [3] C. [illegible] 125 (C. 214, K. 114) [1] C. [illegible]. 126 (C. 215, K 115) [1] K [illegible].

द्विसंख्याते निवृत्तिस्तु [1]कार्यास्यादर्धयोगत ।
[2]द्विसख्यातार्धयोगेन [3]त्रिसख्यातेऽपि चेष्यते ॥ १२७ ॥
[1]न च चित्रे द्विसख्यात कदाचिदपि योजयेत् ।
[2]न च वृत्तौ त्रिसख्यात गीतेष्वासारितेषु च ॥ १२८ ॥
दक्षिणे स्यात् त्रिसंख्यात द्विसख्यातं च वार्तिके ।
[1]चित्रे यथाक्षरं [2]प्रोक्तमिति मार्गविनिश्चय ॥ १२९ ॥
दक्षिणेनैव गत्यादौ निवृत्तौ वृत्तिवद्व्रजेत् ।
चित्रवच्च यथान्यायं [1]त्रिसंख्याते विधि स्मृत ॥ १३० ॥
अनेनैव विधानेन द्विसंख्यातमपीष्यते ।
वृत्तौ वा दक्षिणे वापि [1]प्रयोगोऽस्यैव चेष्यते ॥ १३१ ॥
वस्त्वादौ वस्तुमध्ये च वस्त्वन्ते वा निवृत्तय ।
प्रयोक्तव्या प्रयोगज्ञैर्विचार्याङ्गबलाबलम् ॥ १३२ ॥
निवृत्तौ तु कला न्यूना यदा [1]वस्तुवशाद्भवेत् ।
[2]आ कलापतनात्तस्या वर्ण कार्य निवृत्तिमान् ॥ १३३ ॥
वर्णालंकारसौभाग्यं [1]विच्छेद करणस्य च ।
तत्त्वादीना प्रयोगश्च निवृत्तीना प्रयोजनम् ॥ १३४ ॥
वर्णतालाक्षराणा च सयोगोऽय मया स्मृत ।
आसारितेषु गीतेषु वर्धमानेषु चैव हि ॥ १३५ ॥

[1]चतस्र कण्डिका ज्ञेया वर्धमाने प्रयोक्तृभि ।
विशाला [2]सगता चैव [3]सुनन्दा सुमुखी तथा ॥ १३६ ॥
[1]तत पूर्वा नवकला द्वितीयाष्ट[2]कला स्मृता ।
तृतीया षोडशकला द्वात्रिंशच्च तथोत्तरा ॥ १३७ ॥

127 (C 216, K 116) [1]CK कार्याद्यथार्धयोगत कार्या चार्ध वियोगत [2]C द्विसख्यात-वर्धयोगेन, [3]CK त्रिसख्यातेऽपि 128 (C 217, K 117) [1]C न च वृत्तौ K न चित्रे द्विवि [2]K ■ च इतित्रिसख्यात 129 (C 218, K 118) [1]C चित्रौ [2]C प्रोक्त एवं 130 (C 219, K 119) [1]C त्रिसख्याते 131 (C 220, K 120) [1]K प्रयोगोऽस्य सदैव तु 132 (C 221 K 121) 133 (C 222, K 122) [1]C, वस्तुवदभवेत् [2]K चकालपातनात्तस्या 134 (C 223, K 123ab) [1]C विच्छेद करणस्य 135 (C 224, K 123c, 124a) [1]C तु for च 136 (C 231, K, 124b, 125a) [1]K वर्धमाने तु विज्ञेय चतस्र कण्डिका बुधै [2]C कण्डिका [3]C समता [4]K, सुतदा, 137 (C 232) [1]K om 137

'उपोहनविधिरेतासामनुना च मयोच्यते ।
उपोहनं विशाल्या विशालाया कलापञ्चकमेव हि ।
षट्कला संगतायाश्च सुनन्दायाश्च सप्तकम् ॥ १३८ ॥
सुमुख्याश्चोपवहनं नित्यमष्टकलं भवेत् ।
'एतेषां चैव वक्ष्यामि गुरुलघ्वक्षरक्रमम् ॥ १३९ ॥
आदौ गुरुद्वयं कार्यं चतुर्दश 'लघून्यपि ।
उपोहनं विशालाया पुनरन्ते गुरु स्मृतं ॥ १४० ॥

यथा—'झं' टुं जगति अवलितक दिगिनिदुचरनतिति या ।

'चतुर्भिरधिकै हस्वैर् गुरुत्रयसमन्वितम् ।
संगतायाश्च मुनिभिरुपोहनमिति स्मृतं ॥ १४१ ॥

[ यथा ]—

चतुर्भिरधिकैरेवं 'लघुभिर् गुरुसंयुतैः ।
सुनन्दायाश्च विज्ञेया ह्युपोहनविधिर्बुधैः ॥ १४२ ॥

यथा—झं टु जगति अवलितक दिगिति झल्लुचल्लति विभो ।

'अष्टाविंशल्लघूनि स्युः सुमुख्याश्च गुरूणि च ।
'उपोहनविधानेन तु ज्ञेयानि मुनिसत्तमाः ॥ १४३ ॥

यथा—'झं' टु जगति अवलितकदिगिविगिगिति ति झल्ल झं च गुल्लिति झग तिति या ।

138 (C. 234b, 235 K. 12-b 12-a) [1]K om 138a [2]K [illegible] [3]K [illegible] 139 (C 236 K 124) [1]K om 139b 140 (C 237 K 127) [1]K [illegible] [2]C [illegible] [3]C has nothing in its place 141 (C 238) [1]K om 141 142 (C 239 K 12-) [1]K [illegible] C [illegible] [2]C [illegible] [3]C [illegible] K [illegible] [4]C om the example 143 (C 240 K 129) [1]K [illegible] [2]C [illegible] [3]K [illegible] [illegible] [4]C om this example

उपोह्यन्ते स्वरा [1]यस्मात् [2]यस्माद्‌ गीतं प्रवर्तते ।
तस्मादुपोहनं ज्ञेयं [3]शुष्काक्षरसमन्वितम् ॥ १४४ ॥
[1]अथवोपोह्यते यस्मात् प्रयोगः सूचनादिभिः ।
तस्मादुपोहनं [2]ह्येतद् गानं भाण्डसमाश्रयम् ॥ १४५ ॥
शम्यातालौ द्विरभ्यस्तौ सन्निपातान्त्य एव च ।
उपोहने विशालायास्तालोऽयं परिकीर्तितः ॥ १४६ ॥
द्विकलः संगतायास्तु [1]तालश्चापपुटः स्मृतः ।
[2]तस्यैव सन्निपातोऽन्त्ये सुनन्दायास्तथैव च ॥ १४७ ॥
[1]चच्चत्पुटस्तु द्विकलः [2]सुमुख्याः स्यादुपोहने ।
उपोहने द्विरभ्यस्तैस्ततः कार्या तु कण्डिका ॥ १४८ ॥
एतान्युपोहनानीह चत्वारि गदितानि [1]तु ।
आनुपूर्व्या प्रयोगश्च कण्डिकानां निबोधत ॥ १४९ ॥
[1]शम्या तालस्तथा शम्या पुनस्तालो यथाक्रमम् ।
त्रिकलः सन्निपातश्च विशालाया प्रकीर्तितः ॥ १५० ॥
[1]चच्चत्पुटस्तु द्विकलः संगताया अपि स्मृतः ।
[2]चतुष्कलः सुनन्दाया स एव गदितो बुधैः ॥ १५१ ॥
सन्निपातद्वयोपेतो द्विचित्रस्तु प्रयोक्तृभिः ।
कार्यश्चतुष्कलो युग्मः सुमुख्याश्च यथाक्रमम् ॥ १५२ ॥
वर्धमानस्य तालोऽयं कण्डिकानां पृथक् पृथक् ।
मया प्रोक्तः पुनश्चैव [1]सहतानां निबोधत ॥ १५३ ॥
पूर्वा विशाला कर्तव्या [1]वालतालप्रयोजिता ।
[2]अन्तिमा त्रिकलोपेता वालमासारितन्तु तत् ॥ १५४ ॥

144 (C 241, K 130) [1]K यत्र for यस्मात् [2]K येन C तस्मात् [3]C स्यादि स्वरसमाश्रयम् for शुष्काक्षर समन्वितम् 145 (C 242 K 131) [1]K यस्मा मोह्यते प्रयोगसूचना° [2]K ह्येतज्ज्ञानभाण्ड° C ह्येतद्गानमाण्ड° 146 (C 243, K 132) 147 (C 244ab, K 133) [1]C तालश्चापुट, K तालयच्च पुट [2]K त्रिकलीयुक्त तालादि for तस्यैव etc 148 (C 244c 245a K 134) [1]CK चचत्पुटस्तु [2]K समुख्या 149 (C 245c 246a K 135) [1]K ह for तु 150 (C 233, K 136) [1]K शम्या तालो पुन शम्या ततस्तालो यथाक्रमम् 151 (C 234a, K 137) [1]CK चचत्पुटस्तु त्रिकल [2]C om 151b 152 (K 138) [1]C om 152 153 (KC 250 K 139) [1]C सहतानां for सहतान 154 (C 246, K 140a) [1]K सगता तदनन्तरम् for वालताल etc [2]K om 154b

संगतायां [1]ग्रहं कृत्वा विशाला सङ्गता यदि ।
[2]सुनन्दे पूर्णकाले तु तदा स्यादङ्गुलान्तरम् ॥ १५५ ॥
सुनन्दा च ततः कार्या संगता पुनरेव हि ।
विशालायां पुनश्चैव सुमुखीं च प्रयोजयेत् ॥ १५६ ॥
काण्डिकायास्तु तालो यो मया परिकीर्तितः ।
स एव सर्वः कर्तव्यः प्रयत्ने [1]काण्डिकोद्भवे ॥ १५७ ॥
सुनन्दा संगता चैव विशाला च प्रयोजिता ।
सुनन्दायां ग्रहं कृत्वा ततश्चैव प्रयोजयेत् ॥ १५८ ॥
नन्दनायास्तु तालो यो मया परिकीर्तितः ।
[1]तस्यावयव कर्तव्यः सुनन्दायाश्च पण्डितैः ॥ १५९ ॥
सुमुखी च सुनन्दा च [1]संगता पुनरिष्यते ।
सुमुख्यादौ ग्रहं कृत्वा यथोक्तं संप्रयोजयेत् ॥ १६० ॥
विशालायाः कलानान्तु द्वे वा अथ [2]त्रिवृद्धव ।
[3]उपेष्टे स्थानयोस्तालो निःशङ्कः शब्दलया ॥ १६१ ॥
स सर्व एव कर्तव्यो द्विपञ्चाशदनन्तरे ।
संयोगे काण्डिकानां तु तालोऽयं परिकीर्तितः ।
[1]एतासां तत्प्रयोगात्तु वर्धमानकमिष्यते ॥ १६२ ॥
[1]तालं नवकलं ज्ञेयं [2]कृतालनवकल्पनम् ।
पञ्चपाणिकलं ज्ञेयं पञ्चविंशत्तु नन्दनम् ॥ १६३ ॥
[1]एतत्तालविधानं तु सर्वेष्वासारितेषु च ।
[1]कलानां वृद्धिनाशाय [2]कलपानां तु वर्तनात् ।
तथा च वर्धमानानि वर्धमानकमुच्यते ॥ १६४ ॥
आसारितेषु [1]गीतेषु वर्धमानेषु चैव हि ।
[2]द्विगुणस्तालयोगेन कार्यो [3]हेलस्त्रो विधिः ॥ १६५ ॥

155 (C. 247; K. 149) [1]C ग्रह. [2]K. om. 155b. 156 (C. 248) [1]K om. 156. 157 (C. 255b, 256a; K. 141) [1]C. काण्डिकायाः 158 (K. 142) [1]C. om. 158. 159 (C. 257; K. 143) [1]C. [illegible] 160 (C. 249a; K. 144) [1]C. [illegible] [2]C. om. 160b. 161 (C. 249b, 250a; K. 145a) [1]K. om. 161a. [2]MN [illegible] [3]C. [illegible] 162 (C. 252a, 253a; K. 145b, 146) [1]K. [illegible] [2]C [illegible] [3]C. om. [illegible] [4]C. om. 162a. 163 (C. 251b, 252a; K. 147) [1]K. [illegible] [2]K. [illegible] 164 (C. 253b, K. 148) [1]K. om. 164a. C. om. 164c. 165 (C. 255; K. 149) [1]C. [illegible] [2]C. [illegible] [3]C. [illegible]

[1]समाप्तावन्तरहित सन्निपातो यदा भवेत् ।
अन्त्या कला द्विमात्रा तु [2]तदा ज्ञेया प्रयोक्तृभिः ॥ १६६ ॥
एवमेतन्मया प्रोक्त [1]वर्धमानस्य लक्षणम् ।

आसारितानां वक्ष्यामि [2]प्रस्तार लघुलक्षणम् ॥ १६७ ॥
अन्यूनायां कलाया तु ध्रुव प्राज्ञो निवेदयेत् ।
अथ तालाक्षरवशाच्छेषानन्ताश्च योजयेत् ॥ १६८ ॥
प्लुते लघ्वक्षरे चैव ध्रुवे साम्य न विद्यते ।
न विद्यते त्रिभि पाते समत्वमुपदिश्यते ॥ १६९ ॥
तालैश्च सन्निपातैश्च शम्याभिश्च ध्रुवेण च ।
कनिष्ठासारित कार्य मध्यमं ज्येष्ठमेव च ॥ १७० ॥

* * *

[1]द्विगुणोत्तरया वृद्धया ह्रस्वैव तु मध्यम विधातव्यम् ।
प्रस्तारे [ चैव ] कलाना शम्या तालान्तरोपेतम् ॥ १७१ ॥
[1]उत्तरताल प्रथमे वस्तुन्याद्यौ कलाद्वय त्यक्त्वा ।
कार्यौ मध्ये नित्य द्वौ परिवृत्तौ च सपूर्णौ ॥ १७२ ॥
पूर्व शम्या कार्या द्विकलस्ताल [1]कलाद्वय शम्या ।
पुनरेककलस्तालस्त्रिकल स्यात् [2]सन्निपातश्च ॥ १७३ ॥
[1]त्रिकलोऽथ पुनस्ताल शम्यैककलाद्वये [2]ताल ।
द्विकला च पुन शम्या [3]ताल [4]द्विकलश्च कर्तव्य ॥ १७४ ॥
त्रिकलश्च सन्निपातो [1]भूयो विधिरेष [2]एव कर्तव्य ।
[3]द्वादशकलस्तृतीये तस्यान्ते सन्निपातश्च ॥ १७५ ॥
प्रथमस्त्वष्टकल स्याद् द्वादशकलिकौ [1]तथापरौ ज्ञेयौ ।
अन्त्यश्च [2]सन्निपातो मध्यस्यासारितस्योक्त ॥ १७६ ॥

166 (C 266 K 150) [1]K समाप्तावान्तरहित [2]C तदा कार्या 167 (C 267a, 151b, K 151) [1]C वधमानक [2]K विस्तार for प्रस्तार 168 (K 152) 169 (K 153) 170 (K 154) 171 (C 72 K 155b, 156a) [1]C द्विगुणान्तरतया 172 (C 73) [1]K *om* 172 173 (*C* 74, K *156b*, *157a*) [1]*C* कान्तद्वये शम्या [2]C om स्यात 174 (C 75, 169b K 157b, 158a) [1]K त्रिकलोऽथपि ताल [2]C तालम् [3]C द्विताल [4]K om द्विकलश्च कर्तव्य 175 (C 170, K 159) [1]C भूत्वथौ for भूयो [2]C om एव [3]K द्वादशकला° 176 (C 171, K 160) [1]C तथा स्मृतौ द्वौ च [2]C सन्निपाते (N °तेऽस्या) मध्य स्यात सारितस्योक्तम

ये पूर्वमङ्गुलिकृता[1] प्रवेशविक्षेपनिष्क्रमा गदिता ।
ते सर्वे कर्तव्या मध्ये त्वासारिते तज्ज्ञैः ॥ १७७ ॥
[1]अथ ज्येष्ठे तु कर्तव्य [2]शम्यातालल्यात्मकम् ।
[3]शरीर हि बुधैर्नित्य पञ्चपाणिकलान्वितम् ॥ १७८ ॥
[1]तस्यावापोऽथ निष्क्रामो [2]विक्षेपोऽथ प्रवेशनम् ।
अङ्गुलीनां [3]तु कर्तव्य कलामान चतुष्कलम् ॥ १७९ ॥
ज्येष्ठे चतुष्कलं स्यादावापे संयुक्तं सविक्षेपे ।
वस्त्वन्यत्र स्यात् सप्तदशकल तु शम्यादि ॥ १८० ॥
पूर्वं शम्या कार्या चतुष्कलो वै [1]भवेत् ततस्ताल ।
शम्या चतुष्कला स्याद् [2]द्विकलस्ततस्तालस्तत कार्य ॥ १८१ ॥
कार्यश्च सन्निपात [1]षट्कलिक. षट्कलश्च ताल. स्यात् ।
द्विकला च पुनश्शम्या चतुष्कल. स्यात् पुनस्तालः ॥ १८२ ॥
शम्या चतुष्कला [1]स्यात् तालो द्विकलश्च कर्तव्य. ।
पुनरेव [2]सन्निपातश्च षट्कल. संविधातव्य ॥ १८३ ॥
विधिरेष एव कृत्स्न पुनस्तृतीये [1]सन्निपातेऽन्ते तु ।
[2]पुनरेषामङ्गुलिविक्षेपं सम्प्रवक्ष्यामि ॥ १८४ ॥
[1]आवाप. सह शम्यया निष्क्रामश्च तत परम् ।
विक्षेपश्च ततस्ताल कार्य पुनरावाप इष्यते ॥ १८५ ॥
[1]अनामिकाया निष्क्रामो विक्षेपोऽनन्तर स्मृत ।
[2]शम्यया सह आवापस्तालो विक्षेपण पुन ॥ १८६ ॥
[1]कार्यश्च मध्यमयाङ्गुल्या प्रवेशश्च [2]तत परम् ।
आवापश्च तत कार्यस्तर्जनीनिष्क्रमस्तथा ॥ १८७ ॥

177 (C 172, K 161) [1]K प्रवेशाविक्षेपनिष्क्रमश्च गदिता 178 (C 173, K 162a) [1]K, च य [2]K शम्यातालकलान्वितम् [3]K om 178b 179 (C 174 K 162b 162c) [1]K ततश्चापोऽथ for तस्यावापोऽथ [2]C विक्षेपश्च निर्गमनम् [3]C प्र° for तु 180 (C 175) 181 (C 176, K 163) [1]C भवेत् ताल [2]K द्विकलस्ताव कर्तव्य 182 (C 177, K 164) [1]C षट्कलिकश्चतुष्कश्च K षट्कश्च षट्कलश्च 183 (C 178, K 165) [1]K स्याद्द्विकलतालश्च [2]C सन्निपात 184 (C 179 K 166) [1]C सन्निपातान्ते N पातेऽन्ते [2]K पुनरेव वेधमङ्गुलिविवेरात् 185 (C 180, K 167) [1]K पूर्वे शम्या तथावापो निष्क्रमश्च तत पुन । विक्षेपोऽथ पुनस्ताल पुनरावाप इष्यते ॥ [2]C शम्यायां 186 (C 181, K 168) [1]K अनामिकां कनीयस्याश्चिष्क्रमश्च पुनस्तत । ताभ्यामेव हि विक्षेप शम्यायां चापि एव वा ॥ [2]C, शम्यया for शम्या वा, 187 (C 182 K, 169) [1]C, om, कार्यश्च [2]C, om, तत परम् ॥

[1]विक्षेपश्च पुन कार्य. सन्निपातस्तथैव च ।
कला [2]सप्तदशैवैता [3]सन्निपाते तदन्तरम्[4] ॥ १८८ ॥
आवापश्च पुन कार्य [1]कनीयस्याथ निर्गम ।
[2]विक्षेपश्च प्रदेशश्च आवापश्च तत पुन ॥ १८९ ॥
[1]अनामिकाकनीयस्योस्ततस्तालो भवेत् पुन ।
विक्षेपश्च पुनस्ताभ्यां तत शम्या प्रकीर्तिता ॥ १९० ॥
[1]आवापश्च कनीयस्या तत स्तालं नियोजयेत् ।
आवापश्च तत कार्यस्तर्जनीनिष्क्रमस्तथा ।
[2]विक्षेप पञ्चदशक शम्यया सह कीर्तित ॥ १९१ ॥
[1]आवापश्चैव कर्तव्य पुनस्ताल प्रयोक्तृभि ।
विक्षेपश्च प्रदेशश्च पुनरावाप एव च ॥ १९२ ॥
प्रदेशिन्या च निष्क्रामो विक्षेपश्च पुन स्मृत ।
[1]सन्निपातस्तथान्त्ये च चतुर्विंशतिको भवेत् ॥ १९३ ॥
[1]तृतीयसन्निपातस्य एप एव विधि स्मृत ।
एष ज्येष्ठस्य [2]विज्ञेयस्तालाङ्गुलिविकल्पित ॥ १९४ ॥
प्रथम षोडशकलश्चतुर्विंशतिकस्तथा[1] ।
द्वितीयश्च तृतीयश्च [2]सन्निपात[3] कलाधिक ॥ १९५ ॥
[1]प्रत्येक पातनं येषु दश सप्त भवन्ति हि ।
शम्यातालकृतानीह सन्निपातकृतानि च ॥ १९६ ॥
[1]पत्तुन्याद्यं ह्यज्येष्ठेषु द्वे चान्ये पूर्ववद् योज्ये ।
[2]षट्कशम्याष्टताल त्रिसन्निपात त्रिवस्तु चाप्येवम् ॥ १९७ ॥

188 (C 182b 183a, K 170) [1]C om 188a [2]C सप्तदश दैता [3]K सन्निपाती तदन्तरम [4]C repeats after this 187 incorrectly 189 (C 183b, K 171) [1]C मध्यमाङ्गुल्या पुन प्रदेशश्च [2]C om 189 190 (K 172) [1]C om 190 191 (C 184, K 173a) [1]C om 191a [2]K om 191b 192 (C 185, K 173b) [1]K om 192a [2]C °ताल° 193 (C 186, K 174) [1]C सन्निपातस्तथा यश्च, MN °स्तथान्त्ये च 194 (C 187a, 189a K 175) [1]C तृतीये सन्निपात स्यात् K तृतीय सन्निपातस्य, [2]C विज्ञेयस्तालोऽङ्गुलि विकल्पत 195 (C 189b, 190a, K 176) [1]C °शतिक स्मृत [2]K सन्निपातकलाधिक 196 (C 190b, 191, K 177) [1]C प्रतीक पतन K प्रतीक पातनानीषु [2]K दशा for दश 197 (C 187b, 188a, K 178a) [1]K om 197a N वस्तन्यादौ (?) C वस्तथा द्वे, [2] इन्ध मष्टताल C षट्कम्प (N °म्रस्र°) मष्टपात

सप्तदशपातनयुक्तं विद्यादासारितं [1]सम्यक् ॥
अष्टौ तालास्तु षट् शम्या सन्निपातास्त्रयस्तथा ॥ १९८ ॥
[1]आसारिते विधौ ज्ञेय एकैकस्मिन् प्रकीर्तितः ।
[2]आसारितानामित्येवं गदितं लक्षणं मया ॥ १९९ ॥
[1]गीतानां वस्तुकानां च प्रयोगः परिकल्प्यते ।
अत ऊर्ध्वं प्रवक्ष्यामि [2]गीताकानां तु लक्षणं ॥ २०० ॥
[1]सर्वेषामेव गीतानां वस्तुष्ववयवेषु च ।
[2]विवधैककवृत्तानि त्रीण्यङ्गानि [3]भवन्ति हि ॥ २०१ ॥
[1]एककं तु विदार्येका [2]ह्रे चापि विवधः स्मृतः ।
पद्पदं त्र्यक्षरं वृत्तं [3]विदार्यं परिकीर्तिता ॥ २०२ ॥
[1]पदवर्णसमाप्तस्तु विदारीत्यभिसंज्ञिता ।
न्यासापन्यासमध्यान्तं वस्तु तत्परिकीर्तितम् ॥ २०३ ॥
[1]विदारयन्ति यस्माद्धि [2]पदमध्यस्वरा यतः ।
तदा विदारी विज्ञेया गुरुवर्णानुकारिणी ॥ २०४ ॥
[1]विवधैककयोः प्रायः मद्रके तु प्रयोजनम् ।
[2]प्रकर्याश्चापि वस्त्वर्धे पादे रोविन्दकस्य च ॥ २०५ ॥
रोविन्दकोत्तराभ्यां तु वृत्तम् [1]उल्लोप्यके तथा ।
पाणिकाया [2]बहिर्गीते लास्ये [3]चैव प्रकीर्तितम् ॥ २०६ ॥
प्रवृत्तमवगाढं च द्विविधं [1]वृत्तमुच्यते ।
आरोहित्वादवगाढं [2]प्रवृत्तमवरोहत ॥ २०७ ॥

198 (C 188b, 191b K 178b) [1]K सम्यक् C सर्वम् 199 (C 192a, K 179a) [1]K om 199a [2]C om 199b 200 (C 267b, K 179b, 180a) [1]C om 200a [2]K गीतानां वस्तुकेष्वपि 201 (C 268a, K 180b) [1]K om 201a [2]C विविधैककवाणि [3]K समासत for भवन्ति हि 202 (C 269, K 181) [1]C एककन्तु K एकैक तु [2]C द्वे चापि विविधं स्मृतं K ते तु मर्दविधं स्मृतं, [3]K त्र्यङ्ग सहस्रं च ततं for विदार्यं परिकीर्तिता 203 (C 270) [1]K om 203 204 (C 271) [1]K om 204 [2]C पदमध्यस्वरो, NM °मध्येऽस्वरा 205 (C 272, K, 182) [1]C विविधैक° M om °कयो, and N reads तयो for it [2]K प्रवर्तोशापि, C मनुर्याशापि 206 (C 273 K. 183) [1]C मुद्रुलपकस्य हि [2]K बहिर्गीता [3]C चैव प्रकीर्तितम् 207 (C 274 K 184) [1]K वृत्त ( हस्त ) मुच्यते, [2]C प्रवृत्तमवरोहित

आरोहण तु द्विविध तथा चैवावरोहणम् ।
न्यासापन्यासविहित [1]मार्गान्तरकृत तथा ॥ २०८ ॥
त्र्यवरैकादशपरा विदार्य परिकीर्तिता ।
चतुर्विंशतिरेतासां प्रमाण परमं स्मृतम् ॥ २०९ ॥
[1]अध्यर्धा च [2]तृतीया च [3]सन्निपात[तु] प्रमाणत ।
[4]उल्लोप्यके विदारी तु स्मृता [5]वैहायसे तथा ॥ २१० ॥
[1]विवधेन च ता कार्या [2]युग्मवृत्तेन चैव हि ।
नहार्ये [3]संनिपाते तु भवेदङ्गसमापनम् ॥ २११ ॥

[1]विवधस्त्रिविधो ज्ञेय कीर्त्यमानान् निबोधत ।
सामुद्रश्चार्धसामुद्रो विवृत्तश्चेति कीर्तित ॥ २१२ ॥[2]
[1]न्यासातो विवधो ज्ञेया मुक्ता वै गेयक सदा ।
[2]आद्यौ तु मद्रके चैव सामुद्र परिकीर्तित ॥ २१३ ॥[3]
लघुवर्णसम गेय सामुद्रं तु विधीयते ।
[1]तत्त्वन्ते च तृतीये च तद् वै गेयकसंज्ञित ॥ २१४ ॥[2]
विदार्यङ्गसमोऽर्ध [1]स्याद् अर्ध विसदृश यथा ।
योगे [2]तु अर्धसामुद्रस्तथा ज्ञेय प्रयोक्तृभि ॥ २१५ ॥[3]
विदारी विषमा ज्ञेया न्यासापन्यास एव च ।
[तन्-]सम्प्रयोगबाहुल्य विवृत्त परिकीर्तितम् ॥ २१६ ॥[1]
[1]विवधश्चैकक [2]चापि [वृत्त चैव] यथाक्रमम् ।
न्यासापन्यासमंशान्त सदा ज्ञेय प्रयोक्तृभि ॥ २१७ ॥[3]
सन्न्यासश्चैव विन्यासो ह्यङ्गमध्यो यथाक्रमम् ।
विन्यास स तु विज्ञेयो विदारीमध्यमास्थित ॥ २१८ ॥[1]

208 (C 275 K 185) [1]C मार्गान्तरकृतं 209 (C 276, K 186) 210 (C 277; K 187) [1]K अध्यर्धाद्वि [2]K तृतीयाश्च [3]C सन्निपात प्रमाणत [4]C उल्लोप्यके, [5]C वैहायसं 211 (C 278 K 188) [1]C त्रिविधेन [2]C युग्मवृत्तेषु [3]C सन्निपातेषु 212 (C 279, [1]Cf SR V 71a C सामुद्रश्च समुद्रोऽपि विभौ [2]K om 212 213 (C 280) [1]न्यासतोऽपि विधौ, cf SR V 73a) [2]C चाद्या [3]K om 213 214 (C 281) [1]C तत्त्वन्ते [2]K om 214 215 (C 282) [1]C स्यात् [2]N त्व for तु च° K om 215 216 (C 283) [1]C चत्र° [2]K om 216 217 (C 284) [1]C विविधश्चैकतो, [2]C चापि विज्ञेय तु यथाक्रमम् [3]K om 217 218 (C 285) [1]K om 218

विदारी वज्रविन्यासः पदान्ते क्वचिदेव हि ।
न तद् बाहुल्यमुद्दिष्टं प्रयोगस्य प्रयोक्तृभिः ॥ २१९ ॥[1]

[1]गीतानि सप्त मद्रकोल्लोप्यके चापरान्तकम् ।
[2]प्रकर्योवेणके चैव [3]रोविन्दकमथोत्तरम् ॥ २२० ॥
द्विविधं [1]मद्रकं तत्र चतुर्वस्तु त्रिवस्तु च ।
शीर्षकेण समायुक्तं [2]तत्तु ज्ञेयं त्रिवस्तुकम् ॥ २२१ ॥
पञ्च षट् सप्त [1]चापि स्युः [2]शीर्ष[कान्य]परान्तके ।
प्रकर्यामथ चत्वारि स्युस्त्रिण्यर्धाधिकानि च ॥ २२२ ॥
रोविन्दकं तु [1]सप्ताङ्गं षोडशाङ्गं परं स्मृतम् ।
द्वौ पादौ [2]समवर्णौ तु [3]एकके तत्र [4]कीर्तितौ ॥ २२३ ॥
प्रवृत्तं [1]विविधश्चापि [2]तस्य त्वादौ प्रयोजयेत् ।
[3]ततो देहं ततोऽङ्गानि यथायोगं निवेशयेत् ॥ २२४ ॥
[1]आकारश्चास्य मध्ये स्यादाकारश्चान्ततः स्मृतः ।
अधिकल्पकमन्तेऽस्य शीर्षकं संप्रयोजयेत् ॥ २२५ ॥
सप्ताङ्गं द्वादशाङ्गं वा [1]प्रोक्तमोवेणकं बुधैः ।
तत्र [2]द्व्यङ्गं तु सप्ताङ्गं [3]त्र्यङ्गं द्वादशाकं स्मृतम् ॥ २२६ ॥
[1]पादः सन्धिर्मार्षघातो वज्रं सपिष्टकं तथा ।
[2]शीर्षकं चतुरस्रञ्च [3]तथा चैवोपवर्तनम् ॥ २२७ ॥
उपपातः [1]प्रवेण्यौ च [2]द्व्यङ्गं संहरणं तथा ।
अङ्गानि द्वादशाङ्गस्य [3]स्मृतान्योवेणकस्य तु ॥ २२८ ॥

219 (C 286) [1] K om 219    220 (C 287, K 189) [1]C प्रोक्तानि सप्तगीतानि मन्द्रकोऽर्थोऽपरान्तत    K गीतानि सप्त मद्रकोल्लोप्यके च परान्तकम्    [2]K प्रकर्यो वेणके चैव C प्रकर्योविणकौ विद्यात्    [3]रोविन्दकमथोत्तरम्    C ह्यष्टौ तु रोत्तर तथा    221 (C 288, K 190) [1]C मन्द्रकं    [2]K तथ    222 (C 289, K 191) [1]K तानि    [2]CK शीर्षक चाप°    223 (C 290, K 192) [1]K वस्तूनां for सप्ताङ्ग    [2]C समवर्णेन K समवर्णौ तु    [3]C एकैक स्मृतं    M एकका वाव    [4]C कीर्तित 224 (C 291, K 193a) [1]M विवध चापि    CN विविधं चापि    B विवध चापि, [2]K तस्मात्    [3]K om 224b    225 (C 292) [1]B om 225    226 (C 293, K. 193b, 194a) [1]C प्रोक्तमविणक    B प्रावर्गोविणकं    [2]K द्यस्त    [3]K त्र्यस्त 227 (C 294, K 194b-195a) [1]C प्रस्तारसन्धिमार्षोष्थवज्रसविष्टक    [2]K एककं    [3]K काष्ठापवर्तनमेव च    228 (C, 295, K 195b 196a) [1]M प्रवण्यौ    KC प्रवेणी [2]C. द्वयङ्गं    [3]C स्मृतान्या°.

संपिष्टकोपपाताभ्यां [1]प्रवेणीभ्यां विवर्जितम् ।
उपवर्तनहीनश्च सप्ताङ्गमपि कीर्तितम् ॥ २२९ ॥
[1]विवर्तनं तु सप्ताङ्गं तुल्यवर्णपदं स्मृतम् ।
अनयोर्द्वादशाङ्गे तु तथान्यपदमिष्यते ॥ २३० ॥
[1]उल्लोप्यकेऽपि चाङ्गानाम् एष एव विधिः स्मृतः ।
[2]अवगाढं प्रवृत्तं च महाजनिकमेव च ॥ २३१ ॥
[1]त्र्यङ्गस्तु स्यात्तथा द्व्यङ्गो महाजनिकवर्जितः ।
[2]स्थितं प्रवृत्तसंयोगादेकाङ्गो वापि कीर्त्यते ॥ २३२ ॥
एकाङ्गे सविधातव्यं महाजनिकमेव च ।
[1]द्व्यङ्गं स्थितं प्रवृत्तं वाप्येकाङ्गं प्रकीर्तितम् ॥ २३३ ॥
[1]द्व्यङ्गे व्याससमासाभ्यां ध्रुवाधातुविधिः स्मृतः ।
[2]स्थितं प्रवृत्तं च तथा महाजनिकमेव च ॥ २३४ ॥
[1]त्र्यङ्गस्तु स्यादथ द्व्यङ्गो महाजनिकवर्जितः ।
एकाङ्गोऽपि विधातव्यो महाजनिकसंयुतः ॥ २३५ ॥
[1]एवं व्याससमासाभ्यां बहुधाङ्गविधिः स्मृतः ।
चतुरस्रस्तथा त्र्यस्रो विस्र(?)श्चान्तः प्रकीर्तितः ॥ २३६ ॥
[1]ओवेणकस्य संहारो [2]द्व्यङ्गं एकाङ्ग एव वा ।
[3]नादौ न मध्ये संहारो नित्यं चैव प्रयुज्यते ॥ २३७ ॥
[1]एकको विविधो वापि कार्यो ह्यन्ते युगे सदा ।
उल्लोप्यकं षडवरं विंशत्यङ्गपरं स्मृतम् ॥ २३८ ॥

229 (C 296, K 196b 197a) [1]MN प्रवेण्या च C प्रवेण्या पीरवर्जितम 230 (C 297 K 197b-198a) [1]K निवतन [2]K सप्ताङ्गी [3]C यथान्य° 231 (C 298a, K 198b 199a) [1]C om 231b [2]See below note 3 on 233 232 (C 298c 299a K 199b, 200a) [1]K त्र्यङ्गं, (त्र्यस्तु) स्यादथ, C त्र्यङ्गान्स स्यात्तथा [2]K स्थितिप्रवृत्त, C स्थितप्रवृत्तसंयोगादिकाङ्ग 233 (C 299b 300a K 200b 201a) [1]K द्व्यङ्ग चितप्रवृत्त C द्व्यङ्ग सितप्रवृत्त [2]K वा चैकाङ्ग वापि कीर्तितम [3]MN repeats 231a after this 234 (C 298b, K 201b 202a) [1]C om 234a [2]C सित 235 (K 202b, 203a) [1]C om 235 236 (K 203b 204a) [1]C om 236 237 (C 300b K 204b 205a) [1]K उवेणक° C पावेणकस्य [2]C द्व्यङ्गे ऽप्येकाङ्ग [3]C om 237b 238 (C 301, K 205b 206a) [1]K एकके [2]K विवधायापि N द्विविधो वापि [3]K अन्त्य चैव पर स्मृतम्

[1]तत संहरणं ज्ञेयं मुखप्रतिमुखान्वितम् ।
[2]वैहायसकसंयुक्तं तेनापि च विवर्जितम् ॥ २३९ ॥
[1]त्रिष्वङ्गेष्ववर ज्ञेयं परं स्याद् द्वादशस्वपि ।
[2]एकाङ्गं पट्पर ज्ञेयं वैहायसकमेव तु ॥ २४० ॥
[1]अस्य चाङ्गत्रयेऽतीते प्रयोगमुपपादयेत् ।
उल्लोप्यकोत्तराभ्या तु [2]मुखप्रतिमुखे स्मृते ॥ २४१ ॥
ततोऽङ्गानां समासो वा विस्तारो वा विधीयते ।
मुखप्रतिमुखे चैव ज्ञेये [1]विविधसंश्रिते ॥ २४२ ॥
[1]वृत्त प्रतिमुखे च स्याद् अन्यायास्तु समासत ।
उल्लोप्यके [2]तु शाखाख्य सोत्तरे सापरान्तके ॥ २४३ ॥
प्रतिशाखा तथा चैषा [1]समवर्णपदा स्मृता ।
उत्तरं द्वादशपर पडङ्गावरमिष्यते ॥ २४४ ॥
[1]आकारपादहीनेन [2]सह रोविन्दकेन तु ।
अन्ते [3]चाथ विशेषेण स्थाप्यमस्य हि शीर्षकम् ॥ २४५ ॥
एवमङ्गविधि कार्यं सप्तरूपे प्रयोक्तृभि ।
अत ऊर्ध्वं प्रवक्ष्यामि गीताना वस्तुकल्पनम् ॥ २४६ ॥
[1]कला षोडश विज्ञेया मात्रा [2]सर्वेषु वस्तुषु ।
तस्याश्चैव चतुर्भाग पादभाग प्रकीर्तित ॥ २४७ ॥
[1]आदौ गुर्वष्टकं कृत्वा न्यसेल्लघ्वष्टक तथा ।
तत्रोपवहनं कार्यं प्रथमे तु गुरुद्वये ॥ २४८ ॥
गुर्वक्षरे तृतीये तु तत स्यात् प्रत्युपोहनम् ।
गुर्वक्षरे चतुर्थे तु शम्या कार्या तु पञ्चमे ॥ २४९ ॥

239 (C 302a, K 206b 207a) [1]K तत्र संहरणं कार्यं [2]C om 239b 240 (C 302b, K 207b 208a) [1]C om, 240a, [2]K एकाङ्गमवर 241 (C 303a, K 208b 209a) [1]C om 241a [2]C मुखप्रतिमुख स्मृत 242 (C 303b-304a, K 209b 210a) [1]K विविधे 243 (C 304b 305a, K 210b 211a) [1]K वृत्तप्रतिमुख स्यादन्यायान्तु [2]K तथा शाखा 244 (C 305b 306a, K 211b 212a) [1]सवर्णान्यपदा स्मृता 245 (C 306b 307a, K 212b 213a) [1]C आकारवाद°, [2]K तुल्य [3]C चास्याविशेषेण स्थाप्य मथो च, N चाथा विशेषेण स्थाप्यते मध्य 246 (C 307b-308a, K 213b 214a) 247 (C 308b 309a) [1]K om 247 [2]C सर्वश्ववस्तुषु 248 (C 309b 310a, K 214b 215a) [1]N आदौ गुर्वष्टकं K गुरुवैदाष्टक, C आदौ गुर्वंधर 249 (C 310b 311a, K 215b 216a).

षष्ठसप्तमयोस्ताल· शम्या गुर्वक्षरेऽष्टमे ।
[1]ततोऽर्धकलिकान् पादान् कुर्याल्लघ्वक्षरेषु च ॥ २५० ॥
गुर्वक्षरे [1]तालगते पादास्तु [2]कलिका स्मृता· ।
शम्यातालौ तालशम्ये [3]कुर्याद् द्वे चानुपूर्वश ॥ २५१ ॥
ताल शम्यां च ताल च सन्निपात तथैव च ।
[1]शीर्षकश्चास्य कर्तव्य बुधैश्चापपुटेन तु ॥ २५२ ॥
एवमेककलो [1]ज्ञेयस्तालयोगस्तु [2]मद्रके ।
[3]गुरुर्विश्लेषपादेन द्विकल परिचक्षते ॥ २५३ ॥
[1]विश्लेषेण [2]कलाश्चात्र यथा[3]पूर्वं निवेशयेत् ।
द्विकले [4]मद्रके चैव त्रिकल स्यादुपोहनम् ॥ २५४ ॥
[1]कलिका द्विकल [2]चापि भवेच्च प्रत्युपोहनम् ।
द्विकलैर्गुर्वक्षरकृते पादभागैर्यथाक्रमम् ॥ २५५ ॥
चतुर्भिस्तु भवेन्मात्रा त्रिमात्र वस्तु सज्ञितम् ।
त्रिवस्तु द्विकल ज्ञेय [1]पाते पादविधिस्त्वयम् ॥ २५६ ॥
गुर्वक्षरेषु ये पाता शम्यातालादय स्मृता ।
तानेव पादभागेषु [1]द्विकलेष्वत्र योजयेत् ॥ २५७ ॥
अष्टमी षोडशी शम्या दशमी च यथाक्रमम् ।
चतुर्दश्यां कलाया तु [1]तालं न द्वादशीयुतम् ॥ २५८ ॥
[1]लघ्वष्टके [2]पातविधिर्यथापूर्वं प्रकीर्तितम् ।
वस्तुत्रयेऽपि द्विकले एव पातान् प्रयोजयेत् ।
शीर्षक चैव कर्तव्य प [3]कल पञ्चपाणिना ॥ २५९ ॥

250 (C 311b 312a , K 216b 217a) [1]C र्धकलिताम 251 (C 312b 313a , K 217b-218a) [1]C तालगीते K तालगीत, [2]C कलिता [3]K तेषु कुर्यात् क्रमेण तु 252 (C 313b 314a K 218b) [1]K om 252b 253 (C 314b-315a , K 219) [1]K ज्ञेय कलायोगस्तु [2]C मन्द्रके [3]CK गुरुविश्लेषपादेन N षपादिश्च K (foot note) गुरुर्विश्लेषणादेत 254 (C 315b 316a K 220) [1]K विश्लेष [2]K कलाश्चात्र [3]K पूर्वे पूर्वे [4]C मन्द्रके 255 (C 316b 317a K 221) [1]K कलिक [2]C चापि न वा स्यात् प्रत्युपो° 256 (C 317b 318a K 222) [1]K भवेत् पाती विधीयते पादे पादविधि°. 257 (C 318b 319a , K 222) [1]C त्रिकलोऽत्र 258 (C 319b 320a ; K 224) [1]K ताम्बे दा 259 (C 320b 321 , K 225) [1]C लघुचरे [2]C पादविधि [3]C चैव.

[1]फ्रंड फ्रड शैलेन्द्रराजसंस्थितमीश शान्तं शिवं पन्नगेन्द्रपरिवद्धजटम् ।
मुनिगणनमितं ध्यानाभिरत ज्ञानमय मदनाङ्गहर विभुं प्रभुम् ।
शरणागतोऽहं दैत्यैर्नागैः संस्तुतमीशं त्वा वेदमय त्वा कर्तारं
भुवनपतिं सर्वलोकनमस्कृतम् ।
ऋग्यजु परिपठितं गङ्गाधर शूलधरं भुजगेन्द्रधरं प्रणतोऽस्मि
शिव मृगराजचर्मपरिवद्धतनुम् ।
विपुलगतिं वृषभगति ज्वलनशिखिसदृशकपिलजटं तमहं नमामि
शिवं शिरसा ॥

समाप्तं द्विकलमद्रकम् ।

देवं विमल प्रणतार्तिहरं मायाधारं मायारूपं जटिल नमामि
शिवं शिरसा ।

शीर्षकं षट्कलं समाप्तम् । द्विकलमद्रकम्[1] ।

चतुष्कलं प्रवक्ष्यामि यथावद् द्विजसत्तमा ।
चतुष्कले पादभागैर्यथापूर्वमुदाहृते ॥ २६० ॥
चतुर्भिस्तु भवेन्मात्रा त्रिमात्र [1]वस्तु सञ्ज्ञितम् ।
पातांश्चैव प्रवक्ष्यामि पादभागे यथाक्रमम् ॥ २६१ ॥
चतुर्थे पञ्चमेऽन्त्ये च शम्या कार्याऽष्टमे तथा ।
दशमैकादशे शम्या द्वितीया नवमे स्मृता ॥ २६२ ॥
षष्ठे च सप्तमे [1]ताल अन्त्ये च नवमेऽस्य हि ।
[1]दशमैकादशे चैव द्वितीयः समुदाहृत ॥ २६३ ॥
[1]आद्य तु द्वादशे प्रोक्तं सन्निपातोऽवसानत ।
एव पातविधानं स्यात् सर्वं वस्तु प्रयोजयेत् ॥ २६४ ॥
[1]प्रथमे वस्तुके ह्यादौ कलाष्टकमुपोहनम् ।
प्रत्युपोहनमित्युक्त द्वितीये द्विकलं भवेत् ॥ २६५ ॥
[1]तृतीये त्रिकल ज्ञेय चतुर्थे तु चतुष्कलम् ।
अस्यान्ते शीर्षकं कार्यं षट्पितापुत्रकेण तु ॥ २६६ ॥

[1-1]This portion is wanting in C 260 (C 322, K 226) 261 (C. 323, K 227) [1]C स तु सञ्ज्ञित 262 (C 324, K 228) [1]C नवमैकादशे 263 (C 325, K 229) [1]C तान्त K ताश्चा 264 (C 326 K 230) [1]K आद्य' तु द्वादशे [2]K सर्ववस्तु 265 (C 327) [1]C तृतीयं 266 (C 328).

द्विकले तु यथापात पञ्चपाणिचतुष्ट[यम्] ।
'द्विगेयक तृतीये च चतुर्थे च यथाक्रमम् ॥ २६७ ॥
परिवर्तसमाप्तिस्तु चतुर्थे 'सविधीयते ।
'मद्राशोपोहन वस्तु प्रथम च द्वितीयकम् ॥ २६८ ॥
'चतुर्थस्तु त्रिप्रमाणं ऽत्र्यश्रतालसमुद्भवम्' ।
'द्विर्भावाद् द्विकलस्यैव विज्ञेय च चतुष्कलम् ॥ २६९ ॥
सप्तमे 'लघूनि त्वन्त्ये द्विर्भावोऽस्मिन् विधीयते ।
चतुष्कलोऽत्र विहित कलाष्टकमुपोहनम् ॥ २७० ॥
एका द्वे च चतुष्कश्च तथा स्यात् प्रत्युपोहनम् ।
यथाक्षरस्य कर्तव्य मद्रकस्य तु शीर्षकम् ॥ २७१ ॥
चतुष्कल पञ्चपाणिर्द्विकले द्विकल· स्मृत· ।
चतुष्कलस्तु कर्तव्यो मद्रके तु चतुष्कले ॥ २७२ ॥
'त्रिपस्तु त्रिप्रमाण तु ऽत्र्यश्रतालसमुद्भवम ।
इत्युक्त मद्रक पातैस्त्रयोदशभिरन्वितम् ॥ २७३ ॥
गुर्वक्षराणि चत्वारि चत्वारि स्युर्लघूनि च ।
'द्वितीये गुरुके शम्या तृतीये ताल एव च ॥ २७४ ॥'
तृतीये च चतुर्थे च शम्यातालौ लघून्यपि ।
ताल शम्या च ताले च सन्निपात च योजयेत् ।
'लघ्वक्षरैकऽष्टकलिकान पातानेतान् प्रयोजयेत् ॥ २७५ ॥
ताल· शम्या च तालश्च सन्निपातोऽन्त्य एव च ।
त्र्यश्रतालसमुद्भूत 'विज्ञेयमपरान्तकम ॥ २७६ ॥
गुर्वक्षराणि विश्लिष्य ['द्वि]कल सम्प्रयोजयेत ।
पादभागैस्तथा षड्भि· द्विकल च चतुष्कलम् ॥ २७७ ॥

267 (C 329) [1]C द्विकैथक M द्विगेयक N द्विर्गेयक 268 (C 330) [1]C स 269a [2]C मन्द्रा गोपहन 269 (C 331a, K 231a) [1]K त्रिवस्तु त्रिप्रमाण तु [2]K om [3]C om 269b 270 (K 231b 232a) [1]K लघुनि त्वन्त्यौ 271 (K 232b 233a) 272 (K 233b 234a) 273 (C 331b, K 234b 235a) [1]C चतुवस्तु त्रिप्रमार्ण 274 (C 332, K 235b) [1]K om 274b 275 (C 333, K 236 237a) [1]C लघ्वक्षरैरष्टकलिमितान 276 (C 333b 334a K 237) [1]C °रवसान्तकम् 277 (C. 334b-335a) [1]C त्रिकल.

[शम्यातालौ तालौ] शम्या ताल॰ पष्ठो यथाक्रमम् ।
पूर्ववत् पातविन्यास॰ षष्ठपञ्चमयोः स्मृत ॥ २७८ ॥
आवाप[वि]क्षेपयुत पातैरेभिश्चतुष्कलम् ।
चतुष्कलै॰ पादभागैः षड्भिस्तु समलकृतम् ॥ २७९ ॥
वस्तुसंख्यश्च षट्पश्चसत्त[का]न् सम्प्रयोजयेत् ।
द्वितीये पञ्चमेऽन्त्ये च द्वे शम्ये समुदाहृते ॥ २८० ॥
तृतीये तु भवेद्न्त्य द्वितीये पञ्चमे स्मृत॰ ।
आद्यौ षष्ठे तु तालः स्यात् सन्निपातस्ततोऽन्तिमः ॥ २८१ ॥
पूर्ववस्तुसमुद्दिष्टा पाता ह्येताश्चतुष्कले ।
[एव चतुष्कले] योगो गदित[1]स्त्वपरान्तके ॥ २८२ ॥
[1]यथाक्षर[पाते]ष्वेतद्द् विज्ञेय चापरान्तकम् ।
आद्यौ कलोपग्रहनं विश्लेपाद् द्विगुणं भवेत् ॥ २८३ ॥
द्विकले कलिक ज्ञेय द्विकलं चाप्युपोहनम् ।
[1]कलिके कलिक चेष्ट' तथैव चाप्युपोहनम् ॥ २८४ ॥
एतदेव द्विगुणित विज्ञेयं तु चतुष्कलम् ।
लघ्वक्षरे तृतीये तु द्विर्भावेऽन्त्या कला स्मृता ॥ २८५ ॥
[1]त्र्यस्रतालसमुद्भूतं पातै॰ षड्भिर्विभूषितम् ।
वस्तुशाखाख्यमित्येतद्द् गदितं त्वपरान्तकम् ॥ २८६ ॥
यथा शाखा तथैवास्य प्रतिशाखा विधीयते ।
पश्चिमार्धसमा सा तु तथैवान्यपक्षा [1]स्मृता ।
[2]शिरश्चैककलेनास्य कर्तव्यं पञ्चपाणिना ॥ २८७ ॥
वृत्तौ निवृत्तयोगश्च गते वस्तुचतुष्टये ।
शाखाया प्रतिशाखायां विशेष पश्चिमे त्वयम् ॥ २८८ ॥
षट्कलापातसंयुक्ते तालिके तु तत स्मृते ।
तथैककलयुक्तेऽस्ति विधिवत् पञ्चपाणिना ॥ २८९ ॥

278 (C 335b, 336a) 279 (C 336b, 337a) 280 (C 337b, 338a)
281 (C 338b-339a) 282 (C 339b 340a) [1]C ॰स्त्वपरान्तके MN ॰स्तवरान्तके
283 (K 237b-238a) [1]K यथाक्षर ॰पातेष्वेतद् 284 (K 238b 239a). [1]K. कलिके
286 (K 240b 241a) [1]K त्र्यस्रताल॰ 287 (C 340b 341, K 241b-242)
[1]K स्मृता [2]K ॰कलेनापि 288 (K 243) 289 (K 244)

[1]यथाक्षरेण तु भवेदनयोरुपवर्तनम् ।
उपोहन तु वस्त्वर्धं द्विकल प्रत्युपोहनम् ॥ २९० ॥
[1]द्विकलं दक्षिणे कार्यं वृत्तौ चैव चतुष्कलम् ।
न चास्रोपोहनं कार्यं शेषाणा तु कदाचन ॥ २९१ ॥
[1]एवं चतुष्कले योगो मया प्रोक्तोऽपरान्तके ।
उल्लोप्यक तु द्विगुरु द्विलघ्वन्ते गुरु स्मृतम् ॥ २९२ ॥
शम्यातालौ द्विरभ्यस्तौ सन्निपातोऽन्त्य एव च ।
प्रत्यक्षरकृतै. पानै पञ्चभि समलङ्कृतम् ।
[1]चतुरस्रं सम चेद् यत्तु ज्ञेयं यथाक्षरम् ॥ २९३ ॥
पूर्वोक्तेन विधानेन द्विचतुष्कलमिष्यते ।
[1]अस्य चाङ्गतये गीते वैहायसिकमिष्यते ॥ २९४ ॥
[1]तदेकाङ्ग[व]र ज्ञेय द्वादशाङ्गपर तथा ।
प्रमाण द्वादशकल सप्तपातमथापि वा ॥ २९५ ॥
अस्य तु द्विकला शम्या तालश्च द्विकलस्तथा ।
द्विकला च पुन शम्या [1]तालश्चैककल स्मृत [1] ॥ २९६ ॥
तत शम्या ततस्ताल [1]सन्निपातस्तत परम् ।
[2]शाखेय प्रतिशाखा तु नित्यमन्त्यपदा स्मृता ॥ २९७ ॥
[1]पदा त्वस्य भवेदन्त्ये तदन्ताहरणं बुधै [1] ।
यथाक्षरेण [2]नियमात् संहार्य पञ्चपाणिना ॥ २९८ ॥
[1]स्वतालेनान्तहीनस्य [2]संहार परिकीर्त्यते ।
[3]द्विप्रकार निवृत्तश्च [4]व्यशोऽथ विविधः स्मृत. ॥ २९९ ॥

290 (C 342, K 245) [1]K यथाधरीणैव [2]C वस्त्वर्धं 291 (C 343, K 246a) [1]K दक्षिणे तु तथा वृत्तौ चतुष्कलमपीष्यते 292 (C 344, K 246b) [1]K. om 292a [2]K गुरुर्यथा 293 (C 345 K 247 248a) [1]K चतुरस्रन्तु विच्छेदमेव 294 (C 346, K 248b-249a) [1]C चन्ते चाङ्गवगतीते 295 (C 347ab, K 249b 250a) [1]CK °वपर [2]K तथापातम° 296 (C 347c 348a K 250b 251a) [1]C तालश्च द्विकलस्तथा 297 (C 348b 349c, K 251b 252a) [1]सन्निपातमत [2]K शाखेयन्वशिखा C शाखेयं प्रतिशाखे 298 (C 349b 350a K 252b 253a) [1]K यदा ह्यस्य भवेदन्तस्तद° [2]C संहार्य 299 (C 350b 351a K 253b 254a) [1]K स्वतालेनात° [2]C संहार्य परिवर्तते [3]CK द्विप्रकारनिवृत्तश्च [4]C व्यङ्गोऽन्त°. K व्यङ्गोऽथ

त्र्यस्रश्च चतुरस्रश्च [1]मिश्रश्च त्रिविध स्मृतः ।
[2]स्थितप्रवृत्ते तस्याङ्गे महाजनिकमेव च ॥ ३०० ॥
स्यात् पञ्चपाणितालेन तदन्ताहरण [1]तथा ।
[2]तथास्थितं भवेद् युग्म [3]तस्यपातविधिस्त्वयम् ॥ ३०१ ॥
शम्या तु द्विकला कार्या तालश्च द्विकल स्मृत ।
चतुष्कलः सन्निपात· [1]प्रवृत्तमत इष्यते ॥ ३०२ ॥
[1]तस्यापि द्विकला शम्या [2]तालश्चैककलः पुन· ।
[3]चश्चत्पुटश्च तालादि· सन्निपातस्तत परम् ॥ ३०३ ॥
[1]स्थित तालेन कर्तव्य महाजनिकमस्य तु ।
निवृत्ततालः कर्तव्यो निवृत्तस्यापि तत्त्वत· ॥ ३०४ ॥
[1]स्थितमहाजनिकयो· प्राय· [2]समुपवर्तनम् ।
आद्यावुद्घट्टक कार्य परिवर्तक एव च ॥ ३०५ ॥
युग्मे [1]हि मिश्रतालत्वाद् [2]युग्मे ह्यन्तः प्रयुज्यते ।
[3]विधयैककसयुक्त· सर्वश्चान्तविधि· स्मृत ॥ ३०६ ॥
यथावदन्ततालोऽय [4]युग्मो मिश्रश्च कीर्तित· ।
अत पर प्रवक्ष्यामि [1]त्र्यस्रतालविधिं प्रति ॥ ३०७ ॥
शम्या तु द्विकला पूर्वं ततस्तालो विधीयते ।
त्रिकल सन्निपातश्च [1]प्रवृत्तश्चाप्यत परम् ॥ ३०८ ॥[2]
[1]प्रवृत्तमत्र कर्तव्यं यथावत् परिवर्तनम् ।
यथाक्षरप्रयुक्तेन [2]समासात् पञ्चपाणिना ॥ ३०९ ॥

300 (C 351b-352a K 254b 255a) [1]K मिश्रयापि प्रकीर्तित C मिश्रश्च त्रिविध· [2]KMN स्थितप्रवृत्ते C स्थित प्रविश्य 301 (C 352b 353a K 255b 256a) [1]M. यथा CN तथा K यदा [2]K यदा [3]C प्रथमस्य विधिस्त्वयम् 302 (C 353b-354a, K. 256b-257a) [1]K प्रवृत्तमथ 303 (C 354b 355a, K 257b 258a) [1]K चश्च तु [2]K सर्वैवैककला [3]C चचत्पुटश्च 304 (C 355b 356a, K 258b 259a) [1]C स्थिततालो तु कतव्यो 305 (C 356b 357a K 259b 260a) [1]K reads here अथ तालविधि यो ह प्राय: समुपवर्तनम् [2]C MN स्यात्° 306 (C 357b 358a K 260b 261a) [1]C तु [2]K युग्मे ध्रुव C युग्मोऽप्यन्त [3]C त्रिविधैकैक° [4]K पुर्व यथादृविधि 307 (C. 358b 359a, K 261b 262a) [1]C युग्मे मिश्रे च [2]C त्र्यस्रमन्तविधि 308 (359b-360a · K 262b 263a) [1]K प्रवृत्त चाप्यत परम् [2]C repeat after this 307b-308a. 309 (C 361b 362a, K 263b 264a) [1]K प्रवृत्तमस्य [2]K विधिवत्

[1]अस्यापि स्थिततालेन महाजनिकमिष्यते ।
[2]निवृत्त॰ ताल॰ कर्तव्य तथास्यान्तनिवर्तिते ॥ ३१० ॥
युग्मौजमिश्रतालत्वान्मिश्रोऽप्यन्त प्रवर्तनम् ।
विवर्त्तैककसंयुक्त सर्वश्चान्तविधे स्मृत॰ ॥ ३११ ॥[1]
द्व्यङ्गमेकाङ्गमपि वा स्थितं कार्यं समासत ।
तत्र युग्म भवेद् द्व्यङ्ग [1]ञ्यत्रमेकाङ्गमिष्यते ॥ ३१२ ॥
प्रवृत्तमपि विज्ञेय द्व्यङ्गमेकाङ्गमेव वा ।
महाजनिकमेकाङ्ग द्व्यङ्ग स्मरण स्मृतम् ॥ ३१३ ॥
स्थितादिक॰ प्रवृत्तान्त [1]एवमन्त विदुर्बुधा॰ ।
उल्लोप्यके सदा [2]योज्यमूहापोहविशारदै ॥ ३१४ ॥
प्रकरीवस्तु [1]पण्मात्रा पाताश्चैकान्नविंशति॰ ॥
[2]वस्तु प्रमाण कर्तव्य तथैव च चतुष्कलम् ॥ ३१५ ॥
[1]न यथाक्षरयोगोऽत्र न चात्र द्विकलो भवेत् ।
[2]आद्यमात्रात्रयस्यान्ते शम्यातालौ प्रकीर्तितौ ॥ ३१६ ॥
[1]षण्मात्र पातसयुक्त वस्तु कार्य यथाक्रमम् ।
उपोहन तु वस्त्वर्धे प्रथमे च द्विजोत्तमा ॥ ३१७ ॥
शम्या अस्य तु मात्रा स्याद् द्वितीया तालसयुता ।
मात्रात्रयस्य [1]चान्त्या स्यात् शम्यैका च पुनस्तथा ॥ ३१८ ॥
चतुर्थ्यां द्वादशस्ताल पञ्चम्या चाष्टम स्मृत ।
षष्ठ्या तु द्विकला शम्या तालश्च द्विकलो भवेत् ॥ ३१९ ॥
पुनश्च द्विकलस्ताल॰ शम्या च द्विकला पुन ।
शम्यातालश्च [1]तालश्च शम्यातालस्तथैव च ॥ ३२० ॥

310 (C 362b 363a K 264b 265a) [1]C यस्यापि [2]C प्रवृत्त कार्य [3]C यथास्यान्तनिवर्तिते MN निवर्तते K [0]न्यथात्र विनिवर्तितान् 311 (K 265b-266a) [1]C om this 312 (C 363b 364a K 266b 267a) [1]K त्र्यङ्गमेव च 313 (C. 364b 365a K 267b 268a) [1]K भवेत 314 (C 365b 366a ; K 268b 269a) [1]K एवमन्तविध बुधै [2]K योज्य 315 (C 366b K 269b-270a) [1]K, षपात (= षण्मात्रा) [2]C वस्तु प्रतीय कर्तव्य प्रकुर्याद् द्विचतुष्कलम् 316 (C 367, K 270b) [1]C न यताक्षर[0] [2]C पद्यमात्रात्रय[0] K आद्यमात्राद्वय[0] [3]K शम्यातालावित्ये भवेत् 317 (C 368) [1]MNK om this couplet 318 (C 369, K 271a) [1]K. चान्त्य for चान्त्या स्यात् 319 (C 370, K 271b 272a) 320 (C 371; K 272b 273a) [1]K तु

शम्याताल- सन्निपात इति वस्तु [1]प्रकीर्त्यते ।
यदा त्वर्धचतुर्थानि वस्तूनि प्रकरी भवेत् ॥ ३२१ ॥

पश्चिमार्धं पदस्यैतत् [1]तदर्धं प्राग् निवेशयेत् ।
कनिष्ठासारितेनास्य [2]कार्यं सहरणं तत ॥ ३२२ ॥

पादः पूर्वसम कार्यस्त्वपरान्तकशाखया ।
[1]ओवेणके द्वितीयस्य तस्य च प्रतिशाखया ॥ ३२३ ॥

स एव-पातविन्यासो माषघातमत परम् ।
पद्पातो द्वादशकलस्तस्य पातविधिस्त्वयम् ॥ ३२४ ॥

कर्तव्या द्विकला शम्या [1]तालो च द्विकल एव च ।
[2]पुनश्च द्विकलस्ताल शम्या च द्विकला पुनः ॥ ३२५ ॥

ततश्चैककलस्ताल- सन्निपात कलात्रये ।
प्रायेण मात्रघातस्तु विवधाङ्ग- प्रकीर्तितः ॥ ३२६ ॥

[1]सन्धिश्चैव हि तस्यान्ते कदाचिदुपवर्तनम् ।
[2]तस्या स्यात्कलिकेनैव तथोर्ध्वं पञ्चपाणिना ॥ ३२७ ॥

सन्धिर्यथाक्षरेणैव कर्तव्य पञ्चपाणिना ।
एककं [1]विवधो वापि [2]तस्याङ्गं समुदाहृतम् ॥ ३२८ ॥

[1]उपवर्तनवचास्य पृथग्विधिरिति स्मृत ।
अन्त्यस्य चतुरस्रस्य प्रवृत्ते यो विधि स्मृत ॥ ३२९ ॥

[1]विवधाङ्गं न तेनैव चतुरस्रकमिष्यते ।
सन्धिवद् [2]यत्रतालश्च द्विधा सपिष्टकं स्मृतम् ॥ ३३० ॥

सप्ताङ्गं द्वादशकलं द्वादशाङ्गं द्विरेव तु ।
निष्क्राममादित कृत्वा शम्यास्तिस्त्र [1]प्रयोजयेत् ॥ ३३१ ॥

321 (C 372 K 273b 274a) [1]K प्रकीर्तितम 322 (C 373, K 274b 275a) [1]C तदर्धं [2]C नाम 323 (C 374 K 275b 276a) [1]C आवेणकी K ओवेणके द्वितीयेऽपि 324 (C 375, K 276b 277a) [1]K चान्यत्र ओवेणकी for स एव etc [2]K माषघाता for पद्पातो 325 (C 376a, K 277b 278a) [1]C शम्या च द्विकला पुन- [2]C om this hem 326 (C 376b 377a, K 278b 279a) 327 (C 377b, K 279b 280a) [1]K सन्निपातश्च पदार्धे [2]C om this hem 328 (C 378, K 280b 281a) [1]C एकैक विविधो MN विविधो [2]C तस्याङ्गं समुदाहृते. 329 (C 379, K 281b) [1]K om this hem 330 (C 380, K 282) [1]MN विविधाङ्गेन C विधिनाङ्गेन [illegible] [2]N [2]ताल स्यात् 331 (C 381, K 283) [1]C. प्रयोजित

[1]तालत्रय ततश्चैव [2]शम्यातालौ तत परम् ।
शम्यातालौ तत कार्यौ सन्निपातोऽन्त्य एव च ॥ ३३२ ॥
[1]ओवेणके तु सप्ताङ्गे संपिष्टकमिदं स्मृतम् ।
द्विशम्या तालयोगेन द्वादशाङ्गेऽपि चेष्यते ॥ ३३३ ॥
पाता भवेत्कादश वा सपिष्टकमुदाहृतम् ।
यद्वयत् सम्प्रयोक्तव्यमुपवर्तनमेव च ॥ ३३४ ॥
युक्ता विनयवृत्ताभ्या वर्णा [1]द्विविधा स्मृता ।
पञ्चपाणि प्रकर्तव्य प्रवेण्या तु यथाक्षर ॥ ३३५ ॥
द्विकलो वापि मिश्रो वा प्रयोगोऽङ्गवशानुग ।
[1]अन्ते चास्य प्रकर्तव्य कदाचिदुपवर्तनम् ॥ ३३६ ॥
पञ्चपाणिविधानेन यथोक्तेनैव तद् भवेत् ।
[1]द्वितीयतालपातेन शम्यपातश्च कीर्त्यते ॥ ३३७ ॥
चञ्चत्पुटेन कर्तव्य [1]क्रम सहरणस्य तु ।
रोविन्दके तु षण्मात्रा पातभागैश्चतुष्कलै ॥ ३३८ ॥
[1]अर्धेऽन्ते चैव मात्राणा पञ्चाना पात इष्यते ।
[2]तालशम्या च तालश्च शम्यातालस्तथैव च ॥ ३३९ ॥
[1]अन्ते शम्या तथा चैव सर्वासामपि कीर्तिता ।
पञ्चानामपि मात्राणा विधिरेव यथाक्रमम् ॥ ३४० ॥
चतुर्दशान्तु पञ्चम्या [1]मात्राया ताल इष्यते ।
चतुष्कला तु तत्तुल्या [2]षष्ठी सप्तकमात्रया ॥ ३४१ ॥
[1]तथा चाष्टौ कला कार्या प्रथमायाम उपोहनम् ।
ततश्चैव प्रयोक्तव्यं द्विकल प्रत्युपोहनम् ॥ ३४२ ॥
[1]पाता स्यु सन्निपातान्ता [2]विनैककयोजिता ।
वर्णानुरूपोऽष्टकलस्त्वन्ते[3] प्रस्तार इष्यते ॥ ३४३ ॥

332 (C 382, K 284) [1]C तालत्रय [2]C शम्यातालम 333 (C 383, K 285) [1]C षाडेवके K तुवेणके 334 (C 384, K 286) 335 (C 385, K 287) [1]C विविधा 336 (C 386 K 288) [1]C षड 337 (C 387, K 289) [1]K द्वितीय पाततालेन 338 (C 388, K 290) [1]C चन्ना(N न्ना)हरणमथ तु 339 (C 389, K 291) [1]K चधार्धतोऽन्ते [2]K ताल शम्याथ 340 (C 390 K 292a) [1]K om this hem, 341 (C 391 K 292b 293a) [1]K मात्राया[0] [2]C षष्ठमन्द्रक[0] 342 (C 392, K 293b 294a) [1]K इति पादमद्याटौ च कलायादाउपोहनम [2]C द्विकल 343 (C 393, K 294b 295a) [1]K धातश्चैतमन्पातश [2]K त्रिविधैकसंयोजिता [3]K स्मन्य for स्त्वन्ते,

तुल्यवर्णोपवहनो द्वितीय पाद इष्यते ।
शरीरताल॰ कर्तव्य [1]प्रस्तारोऽपि विशेषत॰ ॥ ३४४ ॥
द्विकलनैव कर्तव्यो विशेषात् पञ्चपाणिना ।
कलाद्वादशनिर्दिष्टं प्रमाणञ्चास्य तत्त्वत ॥ ३४५ ॥
रोविन्दकशरीरं तु षट्कलोपोहनं स्मृतम् ।
[1]विवध वा प्रवृत्त वा तस्यादौ परिकीर्त्यते ॥ ३४६ ॥
[1]आकारवृत्तमन्यत् स्याच्चतुष्क त्रिकमेव वा ।
तस्योपरि यथेष्ट स्यादधस्तादङ्गयोजनम् ॥ ३४७ ॥
अविशेषनिवृत्तन्तु शीर्षक तु प्रयोजयेत् ।
यथाक्षरेण तच्चैव कर्तव्यं पञ्चपाणिना ॥ ३४८ ॥
आकारैकैकमन्त्यस्य प्रवृत्तो नियमो भवेत् ।
इति रोविन्दकं प्रोक्तं स्यादुत्तरमत॰ परम् ॥ ३४९ ॥
उत्तरं सम्प्रवक्ष्यामि यथाविहितलक्षणम् ।
अस्येदमुत्तरस्याथ मुखं प्रतिमुख भवेत् ॥ ३५० ॥
उल्लोप्यकपदस्यादौ मात्रा चैका चतुष्कला ।
[1]रोविन्दकपदाका[र] गणव[र्जं] प्रयोजयेत् ॥ ३५१ ॥
शाखा षडङ्गा त्व[थ]वा द्वादशाङ्गा परा स्मृता ।
सन्निपाता द्वादशकला शाखा ज्ञेया प्रमाणत ॥ ३५२ ॥
तस्यास्तु द्विकलस्ताल॰ शम्या चैककला भवेत् ।
तथा च द्विकलस्ताल शम्या च द्विकला तत॰ ॥ ३५३ ॥
पुनश्चैककलस्ताल॰ सन्निपात कलात्रये ॥
शाखाधत प्रतिशाखा च भवेदन्यपदा तु सा ॥ ३५४ ॥
अविशेषान्निवृत्तस्याप्यस्यान्ते नियमो भवेत् ॥
शीर्षकञ्चैव कर्तव्यम् अस्यान्ते पञ्चपाणिना ॥ ३५५ ॥
पञ्चपाणिविधानेन प्रतिशाखा तत परम् ।
द्विकल पञ्चपाणिस्तु [1]पूर्वपातैर्यथाक्रमम् ॥ ३५६ ॥

344 (C 394 K 295b 296a) [1]M प्रस्तारो N प्रचारो 345 (C 395, K 296b 297a) 346 (C 396, K 297b 298a) [1]C विविधो वा K विवधं वापि वा. 347 (C 397, K 298b) [1]K reads only आकारवृत्तमन्यत्स्या and breaks off till 440 348 350 (C 398 400) 351 355 (C 401 405) [1]C रोविन्दकपदाकारगणवर्जं. 356-357 C 406 407) [1]C पूर्वपातै॰

तालोऽयं दक्षिणे मार्गे सप्तरूपस्य कीर्तित. ।
य एवं दक्षिणे काल· स वृत्तावपि चेष्यते ॥ ३५७ ॥
[1]चित्रेणेवहि सर्वत्र विशेषो यत्र नोच्यते ।
[2]अर्धयोगादेप एव वृत्ते कालविधिर्भवेत् ॥ ३५८ ॥
उल्लोप्यकोत्तरमुखे हित्वा युग्म तथैककम् ।
अर्धयोगस्तु तत्काले द्विकल सम्प्रकीर्त्यते ॥ ३५९ ॥
चतुष्कल स्याद् द्विकलो द्वितीयश्च तथाक्षर· ।
रोविन्दकोल्लोप्यकयोर्मद्रकोत्तरयोस्तथा ॥ ३६० ॥
शरीरेषु विधिर्होप शेषेषु प्रकृतिर्भवेत ।
प्रकृतावपि तेषा स्याद् [1]द्विकलेन चतुष्कलम् ॥ ३६१ ॥
कालेनैव भवेद् वृत्तावर्धयोगश्चतुष्कले ।
[1]वार्तश्चतुष्कलो योगो दक्षिणे स्यात् कदाचन ॥ ३६२ ॥
मद्रकोल्लोप्यकयोश्च मुखोपवहनेषु च ।
यो दक्षिणे तालविधिर्वृत्तौ स समुदाहृत ॥ ३६३ ॥
चित्रैर्व्यस्ते समस्ते वा तावुभौ परिकीर्तितौ ।
शाखानिवृत्तमन्यत्र चित्रेऽत्र [1]त्रयमार्गिक ॥ ३६४ ॥
इति मार्गत्रये ह्येतत् सप्तरूप प्रकीर्तितम् ।
द्विविधा प्रकृतिश्चास्य कुलक छेद्यक तथा ॥ ३६५ ॥
एकार्थं कुलक तत्र पृथक् छेद्यकमिष्यते ।
निर्युक्त पदनिर्युक्तमनिर्युक्त तथैव च ॥ ३६६ ॥
त्रिविधं चैव विज्ञेय सप्तरूप प्रयोक्तृभि ।
बहिर्गीताङ्गशाखाभिर्युक्त निर्युक्तमिष्यते ॥ ३६७ ॥
[1]बहिर्गीताविहीन तु पदनिर्युक्तमिष्यते ।
[2]बहिर्गीतविहीन चाप्यनिर्युक्तमिति स्मृतम् ॥ ३६८ ॥
इत्येतत् सप्तरूपस्य प्रकृतं द्विविध स्मृतम् ।
ब्रह्मोक्तं सप्तरूप हि [1]सामवेदाद् विनि सृतम् ॥ ३६९ ॥

राजकीय महाविद्यालय पुस्तकालय

358 (C 408) [1]CN चित्रैश्चैव [2]C अथयोगात [3]MN वृत्तौ काल० C वृत्तताल०
359 360 (C 409 410) 361 (C 411) [1]C द्विकलेन 362 (C 412) [1]C MN चतुष्कलै (M ष्कलो) र्योगो 363 367 (C 413 417a) [1]MN ०मार्गिकम 368 (C 417b 418a) [1]C बहिर्गीतवि० N बहिर्गीतावगीत च [2]C बहिर्गीतावहीन 369 (C 418b 419a) [1]MN सामवेदाद C समवेताद

दैवताराधनं पुण्यमनन्तं गीतवादितम् ।
सर्वेषामेव गीतानामन्तेषु च्छन्दकं (?) स्मृतम् ॥ ३७० ॥
चतुरङ्गं ततस्त्र्यङ्गं नवाङ्गं युग्ममेव च ।
ऋग्गाथापाणिकानां च प्रमाणानां तथैव च ॥ ३७१ ॥
अनेनैव विधानेन युग्मौजत्वं विभावयेत् ।
यो गणः पूर्वमुद्दिष्टस्तस्यादौ तु कला भवेत् ॥ ३७२ ॥
[1]चतुर्मात्राकृतां चैव कलां समवधारयेत् ।
अष्टाङ्गा वा षडङ्गा वा [2]युग्मोजौ वा प्रमाणतः ॥ ३७३ ॥
[1]स्तुतियुक्ता तु कर्तव्या [2]मात्रिकी चैव [3]पाणिका ।
चतुष्पादा तथैकाङ्गा द्व्यङ्गा त्र्यङ्गा विभावयेत् ॥ ३७४ ॥
अङ्गैर्व्यस्तैः समस्तैर्वा [1]युग्मोजौ वा प्रकीर्तितौ ।
[2]सप्तरूपस्य तालोऽयं मया हि परिकीर्तितः ॥ ३७५ ॥
चतुरस्रा तथा त्र्यस्रा ध्रुवा ज्ञेया प्रयोक्तृभिः ।
तासां तालविधानं तु षट्प्रमाणं समासतः ॥ ३७६ ॥
अड्डिता चोत्थिता चैव चतुरस्रा प्रमाणतः ।
चतुर्भिः सन्निपातैश्च ज्ञेया चञ्चत्पुटा स्मृता ॥ ३७७ ॥
[1]सुप्रतिष्ठावसानानां सन्निपातेऽन्त इष्यते ।
अपकृष्टा स्मृता त्र्यस्रा तथा चापपुटाश्रिता ॥ ३७८ ॥
चतुर्भिः सन्निपातैश्च युक्ता [1]पादान्तसंधिभिः ।
तथाकाशग्रहस्तासां तालश्चञ्चत्पुटः स्मृतः ॥ ३७९ ॥
विलम्बिता च त्र्यस्रा च [1]सा पतद्धितयान्विता ।
निष्क्रामादिप्रयुक्तेन योज्या चापपुटेन तु ॥ ३८० ॥
[2]पादान्ते सन्निपातस्य द्विपादा युग्मसंश्रिता ।
[1]चञ्चत्पुटेन संयोज्या द्विकलेन यथाविधि ।
शीर्षकाणि च योज्यानि द्विविधं पञ्चपाणिना ॥ ३८१ ॥

370-372 (C 419b-422a) 373 (C 422b-423a) [1]C तत्रार्थं च कलाः [2]C युग्मो यो 374 (C 423b-424a) [1]C इति युक्ता [2]M N मन्त्रिको C मात्रिको [3]N पाणिका. 375 (C 424b-425a) [1]C युग्मो यो [2]C तस्य 376-378 (C 425b-428a) [1]MN put 378a after 379a 379 (C 428b-429a) [1]C पादान्तसंधिभिः M °संश्रिता N °संश्रिते. 380 (C 429b-430) [1]N सा पतद्धितयान्विता [2]C *breaks off after* °सन्निपातस्य, *the rest* is from N 381 (C 430b-431a) [1]N चञ्चत्पुटेन महात्मा (omitted by CM.).

चतुर्भि सन्निपातैश्च सम्यक् पादान्तमर्थिते ।
[1]पादान्तस्यान्ततालस्य [2]द्विमात्रान्ते प्रयोजयेत् ॥ ३८२ ॥
मात्राद्वय तु [1]काले तु [2]झकारे समता नयेत् ।
[3]किञ्चिद्विनातिरिक्ताया मात्राभिर्यत्र चेत् कला ॥ ३८३ ॥
स्यात् समत्व नयेत्ता तु क्षयवृद्धया प्रयोगवित् ।
घर्णप्रकर्षेण च स्यात् तालानामपि घर्षनम् ॥ ३८४ ॥
स्याद् झकारो नियुक्तानामक्षरे च कलान्तरम् ।
कलातालप्रमाणेन यत्स्याच्छुष्ककुट्टनम्[1] ॥ ३८५ ॥
तथा ध्रुवाणा सर्वेषु कलातालौ प्रयोजयेत् ।
भङ्गतालश्च कर्तव्यो नत्कुट्टानां यथाविधि ॥ ३८६ ॥
[1]कलापातेन सयुक्तस्तालश्चच्चत्पुटो भवेत् ।
एष एव पुनस्त्र्यस्र [2]खञ्जके ताल इष्यते ॥ ३८७ ॥
पुन [1]प्रकृतयो ह्येव भङ्गस्त्वाकीडिता भवेत् ।
[2]यान्यङ्गानि [ प्रयुक्तानि ] ध्रुवास्वथ भवन्ति हि ॥ ३८८ ॥
[1]तान्येककलयोगेन योजयेत् षट्कलेन वा ॥
एवमेव मया तालो ध्रुवाणा परिकीर्तित ॥ ३८९ ॥
चतुष्पदावसाने तु सम्प्रवक्ष्यामि लक्षणम् ।
[1]यद् देव्या सुकुमाराय [2]शृङ्गाररससश्रयम् ॥ ३९० ॥
[1]नृत्त विकल्पित तस्यताललक्षणमुच्यते ।
नारीप्रयोज्यं [2]तज्ज्ञेयमाश्रित तु चतुष्पदम् ॥ ३९१ ॥
त्र्यस्रा वा चतुरस्रा वा द्विविधा वा चतुष्पदा ।
एकस्या वा बहूना वा द्वयो र्वा वाक्ययोजनात् ॥ ३९२ ॥

382 (C 431b 432a) [1]MN पादान्तस्यन्ततालं स्यात [2]N द्विमात्रा ता 383 (C 432b 433a) [1]N काल्ये त [2]M झ कारे C झ कारौ [3]M [0]रिक्ताया 384 (C 433b 434a) 385 (C 434b 435a) [1]C [0]कुट्टनान 386 (C 435b 436a), 387 (C 436b 437a) [1]N विकला पातमयुक्त [2]C खञ्जकेनेवि चेष्यते 388 (C 437b-438a) [1]C पुवप्रकृतयो [2]C यान्यङ्गानि ध्रु वासु स्व MN om ध्रु वासु स्व 389 (C 438b 439a) [1]C तानि षट्कयोगेन 390 (C 439b 440a) [1]MN यद् देव्या सुकुमाराय. C यद् देव्या कुसुमाताय [2]C MN [0]सश्रय 391 (C 440b 441a) [1]C MN नृत्त for नृत्त [2]C न ज्ञेयम् 392 (C 441b 442a)

तथा शृङ्गारभूयिष्ठा त्रिविधा स्याच् चतुष्पदा ।
प्रवृत्तसञ्ज्ञा विज्ञेया [2]स्थितसंज्ञाश्रया तथा ॥ ३९३ ॥
स्थितप्रवृत्तसंज्ञा च त्रिविधा स्यात् पुनश्च सा ।
[1]निष्क्रामश्चैव शम्या च तालशम्या तथैव च ॥ ३९४ ॥
तदोत्तमश्च निष्क्राम सन्निपातस्तथान्तिम ।
अष्टाविंशति विकल्पा बुधैर्ज्ञेया चतुष्पदा ॥ ३९५ ॥
तस्या विकल्पान् वक्ष्यामि यथावदनुपूर्वश ।
प्रवृत्ताख्या द्रुतलया स्थिताख्या च विलम्बिता ॥ ३९६ ॥
स्थितप्रवृत्तसंज्ञा च ज्ञेयामध्यलयाश्रिता ।
ज्ञेयश्चच्चत्पुटस्तस्य तथा चापपुट॰ पुन॰ ॥ ३९७ ॥
द्विकलेन विधानेन तस्य [1]पातविधिस्त्वयम् ।
षडक्षरा च विपुला मागधी चार्धमागधी ॥ ३९८ ॥
समाक्षरपदा चैव तथा च विषमाक्षरा ।
तस्यान्त्यापहरणा विज्ञेया चाप्यमीकिनी ॥ ३९९ ॥
[1]अवसानापहरणा अन्तापहरणा तथा ।
अभ्यन्तरापहरणा तथा चैवार्धनर्कुटा ॥ ४०० ॥
अर्धसंज्ञा च मिश्रा च तथा [1]चैवाथ शीर्षका ।
एकावसाना विज्ञेया तथा च नियताक्षरा ॥ ४०१ ॥
अर्धप्रवृत्ता एतासां लक्षणं श्रूयतामिदम् ।
व्यक्तवाक् या लघुप्राया लघ्वक्षरसमन्विता ॥ ४०२ ॥
द्रुतवाक्या द्रुतलया ज्ञेया षडक्षरेति सा ।
गुरुप्लुताक्षरप्राया स्वल्पवाक्या यदा तथा ॥ ४०३ ॥
त्रिलया पृथुला (विपुला)ख्या च सुकुमारविधौ स्मृता ।
त्रिलया त्रियतिश्चैव त्रिप्रकाराक्षरान्विता ॥ ४०४ ॥
एकविंशतितालाढ्या च मागधी सम्प्रकीर्तिता ।
गुरुलघ्वक्षरकृता द्रुतमध्यलयान्विता ॥ ४०५ ॥

393 (C 442b-443a) [1]C तदा च स्थितमद्रदा 394 (C 443b 444a) 395 (C 444b-445a) 396 (C 445b 446a) 397 (C 446b 447a) 398 (C 447b-448a) [1]C पातविधि॰ 399 (C 448b 449a) 400 (C 449b 450a) [1]C अवसा नपहरणा 401 (C 450b 451a) [1]C चैवान्यशीर्षका 402-403 (C 451b 453a) 404 (C 453b 454a) 405 (C 454b 455a)

[1]मागध्येवार्धतालेन युक्ता स्यादर्धमागधी ।
गुरुलाघवमात्राभिः पदवर्णैस्तथैव च ॥ ४०६ ॥
लयताले समैश्चैव समाक्षरपदा स्मृता ।
अक्षरैर्विषमायां तु मात्रापादैस्तथैव च ॥ ४०७ ॥
लयतालैरनियमा सा ज्ञेया विषमाक्षरा ।
[1]यस्यास्त्वन्त्यः सन्निपातश्च सानुस्वारोऽन्त्य इष्यते ॥ ४०८ ॥
[1]आद्यन्तापहरणा च सानुस्वारकृता तथा ।
मध्याद्यन्ते सन्निपातैरनुस्वारकृताक्षरे ॥ ४०९ ॥
[1]शेषैरनियता पादैर्विज्ञेया सा स्वनीकिनी ।
अवसानापहरणा नित्यं ज्ञेयाऽमिताक्षरा ॥ ४१० ॥
अनुस्वारकृता चैवमन्तापहरणा स्मृता ।
द्वितीया सन्निपातेन मध्येऽक्षरसमन्विता ॥ ४११ ॥
अभ्यन्तरापहरणा सानुस्वारैव सा स्मृता ।
अर्धेन भिद्यते या तु विज्ञेया साऽर्धनर्कुटा ॥ ४१२ ॥
त्र्यस्रा ह्यनेन विधिना ह्यर्धखञ्जेन कीर्त्यते ।
खञ्जनर्कुटनाभ्या तु मिश्रभावो यदा भवेत् ॥ ४१३ ॥
त्र्यस्रा वा चतुरस्रा वा तद[1] मिश्रेव कीर्त्यते ।
उपक्षेपेण यस्यास्तु स पदार्थः समाप्यते ॥ ४१४ ॥
शीर्षकं सा तु विज्ञेया [1]शीर्षकेण विभूषिता ।
एकपादावसानस्तु यस्य स्यादर्धवर्णतः ॥ ४१५ ॥
[1]एकावसाने विबुधैः सा ज्ञेया तु चतुष्पदा ।
पूर्वपादेन तस्य स्यात् सर्वत्र गुरुलाघवम् ।
[2]पादे पादे [1] विज्ञेया शीर्षकेण विभूषिता ॥ ४१६ ॥
[1]एकपादावसाने च सा ज्ञेया नियताक्षरा ।
यस्या [2]स्थित प्रवृत्त वा भवत्यर्धनिवेशितम् ॥ ४१७ ॥

406 (C 455b 456a) [1]C °ताले च 407 (C 458b 459a) 408 (C (457b 458a) [1]MN यस्यास्त्वा C सास्त्वा 409 (C 458b 459a) [1]C समाद्यन्तापहरणां च 410 (C 459b 460a) [1]C शेषैरनियता° N शेषैरनियतावादै° 411 415 (C 460b-465a) [1]C शीर्षितेन 416 (C 465b 466a) [1]C एतावसानेव बुधैः [2]MC om this hem. 417 (C 466b 467a) [1]C पादे पादाव° [2]C स्थितप्रवृत्त

अर्धप्रवृत्ता सा तु स्यादुभाभ्यामपि वा कृता ।
निष्क्रामश्चैव शम्या च ताल शम्या तथैव च ॥ ४१८ ॥
आवाप सन्निपातश्च षडस्या ग्राहका स्मृता ।
उपोहनं तु विविध सुकुमारे प्रकीर्तितम् ॥ ४१९ ॥
द्व्यक्षरं त्रिपरं तस्य कलाभि प्रत्युपोहनम् ।
[1]त्रिकलाख्यं चान्तकलं सन्निपातपरं स्मृतम् ॥ ४२० ॥
सन्निपातापहरणा आदौ मध्येऽन्ततोऽपि वा ।
पाद्यद्वयाभिनिष्पन्ना नानापाद्यापि सा स्मृता ॥ ४२१ ॥
एकपादा द्विपादा वा त्रिपादा च प्रकीर्त्यते ।
चतुष्पादापि या भूत्वा नात परमिहेष्यते ॥ ४२२ ॥
कृत्वा तु पादबहुलां न शोभा जनयिष्यति ।
वर्णस्य [1]प्रकृति ह्यन्यदङ्गव्यक्ति निरस्यति ॥ ४२३ ॥
तस्मात् स्थिता स्याद् द्विपदा एकेनैव पदा स्मृता ।
चतुष्पदा प्रवृत्ता तु[1] सम्यक् प्रोक्ता प्रयोक्तृभि ॥ ४२४ ॥
तत्रैकरूपेकपदा [1]सा हि पादपाता स्मृता ।
द्वात्रिंशत्परमा सा हि सन्निपातपदा भवेत् ॥ ४२५ ॥
[1]आभ्यां मध्यप्रमाणे तु त्रिपादः परिकीर्त्यते ।
सन्निपातप्रमाणेन ज्ञेयो मध्यलयस्तथा ॥ ४२६ ॥
लास्यमित्येव यत्पूर्वं मया च परिकीर्तितम् ।
लक्षणं तस्य वक्ष्यामि प्रयोगञ्च यथाक्रमम् ॥ ४२७ ॥
[1]लासनाल्लास्यमित्युक्तं सोपु आयतमाश्रयम् ।
[2]भाणवच्चैकहार्यं [3]स्याद्दनस्तु च तद्भवेत् ॥ ४२८ ॥
एकार्थं पृथगर्थं वा तदङ्गेषु प्रकीर्तितम् ।
अङ्गानि दश चैवास्य तेषां वक्ष्यामि लक्षणम् ॥ ४२९ ॥

418 419 (C 467b 469a) 420 (C 469b 470a) [1]MN त्रिकलाद्यम 421 422 (C 470b 472a) 423 (C 472b 473a) [1]C प्रकृतिर्ह्यन्यदङ्गव्यक्तिरिति °ति MN °व्यङ्गव्यक्ति निरस्यति 424 (C 473b 474a) 425 (C 474b-476a) [1]C स हि पादपता M N सन्निपातपदा 426 (C 475b 476a) [1]MN आभ्यां मध्य° 427 (C 476b 477a) 428 (C 477b 478a) [1]C लासनाल्लास्यमिति° [2]C °हैकहार्य [3]C स्याद्दनस्तु 429 (C 478b 479a)

[1]गेयपदं [2]स्थितपाठ्यमासीनं पुष्पगण्डिका[3] ।
विनिवृत्या पदानां तु मागधी समुदाहृता ।
चित्रेऽर्धमागधी चैव द्विर्निर्वृत्तपदाश्रया ॥ ४८९ ॥
वृत्तौ सम्भाविता प्रायो [गुर्वक्षरसमन्विता ] ।
[पृथुलायां दक्षिणा च ] लघ्वाद्याक्षरान्विता ॥ ४९० ॥
[1]गानयोगे चतस्रस्तु योज्या सर्वत्र गायनैः ।
यथाक्षरकृता ह्येताः प्रयुज्यन्ते ध्रुवास्वपि ॥ ४९१ ॥

481 (C 449, K 431) [1]C यथारसकृता तथा 482 (C 450, K 432) [1]C चक्र [2]K न शोभाजनन भवेत् [3]K एवमेव विना गीत नाट्य रङ्ग 483 (C 451, K 433) [1]K स च पूर्वं प्रकीर्तित 484 (C 452, K 434) [1]C न, N प्र° [2]K तथा 485 (C 453, K 435) [1]C गर्भे कैशिकमध्यमम 486 (C 454 K 436) [1]K निर्वहणे [2]C सन्निवृत्ता श्रयश्चैव [3]C रसभावसमन्वित 487 (C 455 K 437) [1]K तथा रसकृता नित्य [2]K प्रकरणान्विता 488-489 (K 438 439) [1]C om these [2]K चैवोर्ध्वं मागधी 490 (K 440a) [1]C om 490 See XXIX 79 and cf Dattila 239b 491 (K 440bc) [1]C om 491

पूर्णस्वरं [1]वाद्यविचित्रवर्णं
[2]त्रिस्थानशोभं [3]त्रियत त्रिमातम् ।
रक्तं [4]समं श्लक्ष्णमलंकृतं च
[5]सुखप्रयुक्तं मधुरं च गानम् ॥ ४९२ ॥
गीते प्रयत्नः प्रथमं तु कार्यः
[1]शय्या हि नाट्यस्य वदन्ति गीतम् ।
गीते च वाद्ये च हि [2]सुप्रयुक्ते
नाट्यप्रयोगो न विपत्तिमेति ॥ ४९३ ॥
एतदुक्तं मया सम्यग् ध्रुवाणां लक्षणं महत् ।
अत ऊर्ध्वं प्रवक्ष्यामि गातृवादकयोर्गुणान्[1] ॥ ४९४ ॥

गुणात् प्रयतते ज्ञानं दोषांश्चैव निरस्यति ।
तस्माद् यत्नेन विज्ञेया गुणदोषाः समासतः ॥ ४९५ ॥
गाता प्रत्यग्रवया [1]स्निग्धो मधुरस्वरोपचितकण्ठः ।
[2]लयतालकलापातप्रमाणयोगेषु तत्त्वज्ञः ॥ ४९६ ॥
[1]रूपगुणकान्ति[2]सत्थानसत्त्वमाधुर्यसम्पन्ना ।
पेशलमधुरस्निग्धानुनादसमरक्तशुभकण्ठा[3] ॥ ४९७ ॥
[1]सुविहितसमकविधायिन्यक्षोभ्यगीततालवयकुशला [च] ।
[2]आतोद्यार्पितकरणा विज्ञेया [3]गायिका श्यामा ॥ ४९८ ॥
[1]सुनिविष्टपाणिलययतिनियोगज्ञौ [च] सुमधुरलघुहस्तौ ।
[2]गातृगुणैश्चोपेतौ अवहितमनसौ सुसंगीतौ ॥ ४९९ ॥

492 (C 456, K 441) [1]C तत्र विचित्रवर्णे [2]K त्रिस्थानशालि° [3]KC त्रितय [4]K सम° [5]K सुख प्रशस्त 493 (C 457, K 442) [1]C शय्या [2]C सुप्रयुक्ते 494 (C 458, K 443) [1]K here ends ch XXXII and begins ch XXXIII (गुणाध्याय) 495 (K XXXIII 1) 496 (C 459, K XXXIII 2) [1]C स्निग्ध स्वर मधुरमांसलोपचित [2]C °कलामानप्रमाण°. 497 (C 460, K XXXIII 3) [1]K °कान्तियुक्ता [2]C °सस्थान धैर्यमाधुर्यसम्पन्न K माधुर्योपेतसत्त्वसम्पन्ना. [3]C °शुभकण्ठ K °शुभकण्ठा 498 (C first 461, K XXXIII 4) [1]C reads चवसितशरीरमनसौ सुनिविष्टौ मधुरसंचार K सुविहितसमकविधायिन्याक्षोभ्य गीततालनयकुशला [2]C चान्योन्यार्पितकरणा [3]K गायिका श्यामा. C गायिका श्यामा. 499 (C second 461, K XXXIII 7) [1]K. सुनिविष्ट × × वादित्रलय नियोगज्ञौ सुमधुर प्रलयहस्तौ C °लययतिविशारदोपमित°. [2]C. गातृगुणै°

[1]स्फुटरचितचित्रकरणौ [2]जितश्रमौ रक्तकण्ठौ प्रवीणौ ।
[3]चित्रादिवाद्यकुशलौ [4]वीणाया वादकौ भवत ॥ ५०० ॥
बलवानवहितबुद्धिर्गीतलयज्ञस्तथा सुसंगीत. ।
श्रावकमधुर. स्निग्धो [1]दृढानिलो वंशवादी स्यात् ॥ ५०१ ॥
अविचलितमविच्छिन्नं [1]वर्णालंकारबोधकं मधुरम् ।
स्निग्धं [2]दोषावरणं [3]वेणोरेवं स्मृतं वाद्यम् ॥ ५०२ ॥

प्रायेण तु स्वभावात् स्त्रीणां गानं नृणां च [1]पाठ्यविधि ।
स्त्रीणां स्वभावमधुर कण्ठो नृणां [2]बलवत्त्वं च ॥ ५०३ ॥
य स्त्रीणां [1]पाठ्यगुणो भवति नृणां च गानमधुरत्वम् ।
ज्ञेय सोऽलंकारो [2]नहि स्वभावो भवति तेषाम् ॥ ५०४ ॥
यद्यपि पुरुषो नेता गीतविधानं तु लक्षणोपेतम् ।
माधुर्यगुणविहीनं शोभाजननं न [1]तद्ध भवति ॥ ५०५ ॥
एवं स्वभावसिद्धं स्त्रीणां गानं नृणां च [1]पाठ्यविधि ।
अपरस्परसम्पन्नं कार्यं [2]छायासंनिष्पन्नम् ॥ ५०६ ॥
प्रायेण दानवासुररक्षयक्षोरगा विविधचेष्टा ।
वाक्याश्रिता प्रयोगे भवन्ति पुरुषाङ्गनायद्धा ॥ ५०७ ॥
स्त्रीभि कार्य. प्रयत्नेन प्रयोग पुरुषाश्रय ।
यस्मात् स्वभावोपहितो विलास स्त्रीकृतो भवेत् ॥ ५०८ ॥
नित्यं व्यायामयोग्याभिर्नॄणां भवति सौष्ठवम् ।
स्वभावतस्तु मधुरं स्त्रीणामङ्गविचेष्टितम् ॥ ५०९ ॥
एवं स्त्रीणां तु पुरुषैरुपदेष्टव्यमेव हि ।
गानं वाद्यं च पाठ्यं च नानाप्रकृतिसम्भवम् ॥ ५१० ॥

500 (C 462, K XXXIII 8) [1]K °विचित्रकरणौ [2]K गीत श्रवणौ च तौ प्रवीणौ च [3]K °रक्तकण्ठवीणौ [3]K °कुशलौ [4]K वीणाभ्यां वादकौ भवति 501 (C 464, K XXXIII 9) [1]K दृढपाणि × × वैदिकी ज्ञेय 502 (C 463, K XXXIII 10) [1]C वर्णालंकारमोदक K °मविच्छिन्न° [2]K दोषावारण C दोषविहीन CN प्रच्छादक वैणव (श्रुत N) 503 (C 465, K XXXIII 5) [1]KC वाद्यविधि [2]K सुललितत्व च 504 (C 466, K XXXIII 6) [1]C वाग्गुणो [2]K °स्त्री नहि स्वभावो ह्यय 505-506 (C 467 468) [1]C न तद्भाति [2]C वायस निष्पन्नम् 507 510 (C 469-472).

अवैस्वर्यं भवेत् स्त्रीणां गान वाद्य क्रियास्वथ ।
नहि तत् [1][व]र्णमाधुर्यं पुरुषेषु भविष्यति ॥ ५११ ॥
स्मृतिर्मतिश्च मेधा च ऊहापोहस्तथैव च ।
शिष्यनिष्पादनं चैव षडाचार्यगुणा. स्मृता [1] ॥ ५१२ ॥
मेधा स्मृतिर्गुणा श्लाघा राग संघर्ष एव च ।
उत्साहश्च षडेवैते शिष्यस्यापि गुणा स्मृता ॥ ५१३ ॥

श्रावकोऽथ [1]घन स्निग्धो [2]मधुरस्त्ववधानवान् ।
त्रिस्थानशोभीत्येवं च [3]षट् कण्ठस्य गुणा स्मृता. ॥ ५१४ ॥
[1]दूरात्तु श्रूयते यस्मात् तस्माच्छ्रावक उच्यते ।
श्रावको सुस्वरो [2]यस्तु न विक्षिप्तो घन स्मृत. ॥ ५१५ ॥
[1]सुश्रव स त्वपरुष. स्निग्धस्तज्ज्ञैः प्रकीर्तित. ।
[2]महास्थानेऽप्यवैस्वर्यं स वै मधुर उच्यते ॥ ५१६ ॥
[1]स्वरेऽधिके च हीने च ह्यविरक्तो ऽवधानवान् ।
[2]शिर कण्ठेष्वभिहत [तत्]स्थानमधुरस्वरैः ॥ ५१७ ॥
त्रिस्थानेऽपि हि माधुर्यं यस्य नित्यं विधीयते ।
त्रिस्थानशोभीत्येवं तु [1]स हि तज्ज्ञै प्रकीर्तित. ॥ ५१८ ॥

[1]कपिलोऽव्यवस्थितश्चैव तथा सन्दष्ट एव च ।
काकी च तुम्बकी चैव पञ्च दोषा भवन्ति हि ॥ ५१९ ॥
[1]वैस्वर्यं च भवेद् यत्र [2]तथा स्याद् [घर्घ]रायितम् ।
कपिल स तु विज्ञेय. श्लेष्मकण्ठस्तथैव च ॥ ५२० ॥

511 (C 473) [1]C कर्णमाधुर्य 512 (C 474) [1]After XXXIII 10, K has the following भवेत् ज्ञानविज्ञानकरणवचनप्रयोगसिद्धिशिष्यनिष्पादनानि षडाचार्यगुणा 513 (C. 475) 514 (C 476, K XXXIII 11) [1]C घन° [2]K मधुरो ह्यव° M. मधुरस्स्वरधा [3]K षट्काङ्गस्य 515 (C 477, K XXXIII 12) [1]K. हृदात्त [2]K यस्मादच्छिद्र. 516 (C 478b-479a, K XXXIII 13) [1]K घनघध्वनि सयुक्त [2]K मान (मन ?) प्रह्लादनकर 517 (C. 478a, K XXXIII 14) [1]स्वरेऽधिके च हीने च C स्वराधिको विहीनो वा [2]K °ह्यभिहित विस्तार 518 (C 479bc, K XXXIII. 15a)[1]C सकण्ठो मधुर स्मृत 519 (C 480 K XXXIII 15b-16a) [1]C कपिलोऽव्यवस्थित काकी तुम्बी संदष्टकस्तथा । समासतस्त्वमी पञ्च कण्ठदोषा भवन्ति हि 520 (C 481a, K XXXIII. 16b-17a) [1]K. वैस्व (स्व)र्यं भवेत्तत्र, [2]C तथा गुरुकरार्पितम्

ऊनताधिकता वापि स्वराणां यत्र दृश्यते ।
क्षतत्वदोपतश्चैव ज्ञेय स [1]त्वव्यवस्थितः ॥ ५२१ ॥
[1]दन्तप्रयोगात् सन्दष्ट स्वाचार्यैं परिकीर्तित ।
[2]यो न निस्सरति स्थाने स्वरमुच्चारणगतम् ॥ ५२२ ॥
[1]तथा रूक्षस्वरश्चैव स काकीत्यभिसञ्ज्ञित' ।
[2]नासागतस्वरो यस्तु तुम्बकी सोऽभिधीयते ॥ ५२३ ॥
[1]एते गुणाश्च दोपाश्च तत्त्वत· [2]कथिता मया ।
अत ऊर्ध्वं प्रवक्ष्यामि ह्यवनद्धविधि पुन· ॥ ५२४ ॥
गान्धर्वमेतत् कथितं मया हि
पूर्वं यदुक्तं [1]त्विह नारदेन ।
कुर्याद्य एव [2]मनुज प्रयोग
सम्मानमग्र्य [3]लभते [illegible] लोके ॥ ५२५ ॥

इति भारतीये नाट्यशास्त्रे ध्रुवाविधान नाम द्वात्रिंशोऽध्याय' ॥ ३२ ॥

521 (K XXXIII 17bc) [1]K त्वम (न)वस्थित 522 (C 482b K XXXIII 18) [1]K दन्तप्रयोगात् C सन्दष्ट दशनी यत्न स सन्दष्ट इति स्मृत [2]C om 522b 523 (C 481b 482a , K XXXIII 19) [1]C तथा विस्वरश्चैव स काकीति हि सञ्ज्ञित. [2]K नासापदसमस्व° 524 (C 483 , K XXXIII 21bc) [1]K *reads before this a* passage which possibly belonged to the next chapter [2]C गदिता. 525 (C 484 , K XXXIII 22) [1]K ह्यपितामहेन [2]K नर प्रयोगे [3]C कुमहे गच्छेत्

# त्रयस्त्रिंशोऽध्यायः ।

[1]ततातोद्यविधिस्त्वेष मया प्रोक्त समासत. ।
[2]अवनद्धविभागेन लक्षणं कर्म चैव हि ॥ १ ॥
[1]आतोद्यानां प्रवक्ष्यामि विधिं वादनमेव च ।
[2]मृदङ्गपणवाना च [3]दर्दुरस्य तथैव च ॥ २ ॥
[1]गान्धर्वं चैव वाद्यं च स्वातिना नारदेन च ।
[2]विस्तारगुणसम्पन्नमुक्त लक्षणकर्मत. ॥ ३ ॥
[1]अनुवृत्त्या तथा स्वातेरातोद्यानां समासत ।
पौष्कराणा प्रवक्ष्यामि निर्वृत्ति सम्भव तथा ॥ ४ ॥
अनध्याये कदाचित्तु [1]स्वातिर्वै दुर्दिने क्षिने ।
जलाशय जगामाथ सलिलानयन प्रति ॥ ५ ॥
[1]तस्मिन् सरो निषण्णे तु [2]प्रविष्ट पाकशासन ।
[3]धाराभिर्महतीभिश्च [4]कर्तुमेकार्णव जगत् ॥ ६ ॥
पतन्तीभिश्च धाराभिर्वायुवेगाज्जलाशये ।
[1]पुष्करीणां पटु· शब्द [2]पत्राणामभवत् तदा ॥ ७ ॥
[1]व[र्षा]धारोद्भव शब्द निशम्य [2]सहसा मुनि· ।
आश्चर्यमिति [3]मन्वानश्चावधारितवांश्च तम ॥ ८ ॥

---

1 (C 1, K XXXIV 1) [1]C चथातोद्य° K तत शाष्य(द्य)विधान यन्मयावि(भि)हितं पुरा. [2]K घवनद्धातशापि तस्य वक्ष्यामि लक्षणम् 2 (C 2, K XXXIV 3a) [1]K. om 2a [2]K मृदङ्गाना समासेन लक्षण पणवस्य च 3 (C 3, K XXXIV 3b) [1]C दर्दुरस्य च सदेपाद विधान नाट्यमेव [illegible] and before [illegible] occurs in K the following यथोक्त मुनिभि पूर्व स्वातिनारदपुष्करै । सवन्नघनसयुक्त सर्वातोद्यविभूषितम् । [2]K om 3b 4 (C 4) [1]K om 4 5 (C 5, K XXXIV 4) [1]K मुनिर्महति दर्दुरे 6 (C 6, K XXXIV 5) [1]C तस्मिन् सरो K तस्मिन् जलाशये यावत् [2]C प्रहृष्ट K प्रविष्ट पाकशासन [3]K. °महतो-भिस्तु [4]K. पूरयन्निव मेदिनीम् 7 (C 7, K XXXIV 6) K पुष्करिण्या [2]C कचरव [3]C पत्रिणाम्, K याम (पत्रा)णाम° 8 (C 8, K. XXXIV 7) [1]K वर्षाधारोद्भवं (*kha*), वर्षाधारोद्भव C तेषा धीर कल K तु महामुनि. [3]C. सम्मान्य चावधारितवान् स्वयम्.

ज्येष्ठमध्यकनिष्ठं तु पत्नाणामवधार्य च ।
गम्भीरं मधुरं हृद्यमाजगामाश्रम तत ॥ ९ ॥
गत्वा सृष्टं [1]मृदङ्गाश्च पुष्करानसृजत्तत. ।
पणवं दर्दुरांश्चैव सहितो विश्वकर्मणा ॥ १० ॥
देवानां दुन्दुभि दृष्ट्वा चकार मुरज तत ।
आलिङ्ग्यमूर्ध्वकं चैव तथैवाङ्किकमेव च ॥ ११ ॥
[1]चर्मणा चावनद्धांस्तान् मृदङ्गान् दर्दुरांस्तथा ।
तल्लीभि पणव चैवमूहापोहविशारद ॥ १२ ॥
भूयश्चान्यान्यपि तथा काष्ठायसकृतान्यथ ।
झल्लरीपटहादीनि चर्मनद्धानि तानि तु ॥ १३ ॥
[1]आतोद्यसमवाये तु यानि वाद्यानि वादकै ।
अङ्गप्रत्यङ्गयोगेन गदतो मे निबोधत ॥ १४ ॥
विपञ्ची चैव चित्रा च दारवोष्वङ्गसंज्ञिते ।
कच्छपी घोषकादीनि प्रत्यङ्गानि तथैव च ॥ १५ ॥
[2]मृदङ्गो दर्दुरश्चैव पणवेष्वङ्गसंज्ञिते ।
झल्लरीपटहादीनि प्रत्यङ्गानि तथैव च ॥ १६ ॥
अङ्गलक्षणसयुक्तो विज्ञेयो वंश एव हि ।
शङ्खस्तु डक्किनी चैव प्रत्यङ्गे परिकीर्तिते ॥ १७ ॥
नास्ति किंचिदनायोज्यमातोद्यं दशरूपके ।
रसभावप्रयोगं तु ज्ञात्वा योज्य विधानत ॥ १८ ॥
उत्सवे चैव याने च नृपाणा मङ्गलेषु च ।
शुभकल्याणयोगे च विवाहकरणे तथा ॥ १९ ॥
[ पुत्रादिके समु]त्पन्ने सग्रामे [1][योध]संकुले ।
ईदृशेषु च कार्येषु सर्वातोद्यानि वादयेत् ॥ २० ॥
स्वभावगृहवार्तायामल्पभाण्ड प्रयोजयेत् ।
उत्थानकाव्ययन्धेषु सर्वातोद्यानि वादयेत् ॥ २१ ॥

9 (C 9, K XXXIV 8) 10 (C 10, K XXXIII 9) [1]CK मदङ्गानां 11 (C 11, K XXXIV 10) 12 (C 12, K XXXIV 11) [1]K क (च) मंथा 13 (C 13, K XXXIV 12) 14 19 (C 14 19, K XXXIV 13 18) [1]K चातोद्यन् समवाये [2]K मृदङ्गा 20 (C 20, K XXXIV 19) [1]KC पङ्कसंकुले 21 (C 21, K XXXIII 20)

भङ्गानां तु समत्वार्थं छिद्रप्रच्छादने तथा ।
विप्राप्तिहेतोः [1]शोभा[या] भाण्डवाद्यं [प्र]जायते ॥ २२ ॥
तत्रावनद्धं वक्ष्यामि विधिस्वरसमुत्थितम् ।
नानाकरणसंयुक्तं [1][नाना]जातिविभूषितम् ॥ २३ ॥
यावन्ति [1][चर्म]नद्धानि ह्यातोद्यानि द्विजोत्तमाः ।
तानि त्रिपुष्कराद्यानि त्ववनद्धमिति स्मृतम् ॥ २४ ॥
एतेषां तु पुनर्भेदाः शतसंख्याः प्रकीर्तिताः ।
[1]किं तु त्रिपुष्करस्यात्र लक्षणं प्रोच्यते मया ॥ २५ ॥
शेषाणां कर्मबाहुल्यं यस्मादस्मिन् न दृश्यते ।
न स्वरास्तत्र [प्र]हारा[1] नाक्षराणि न मार्जना ॥ २६ ॥
[1]भेरीपटह[झंझा]भिस्तथा दुन्दुभिडिण्डिमैः ।
शैथिल्यादायतत्वाच्च स्वरे गाम्भीर्यमिष्यते ॥ २७ ॥
प्रायशस्तानि कार्याणि कालं कार्यं समीक्ष्य तु ।
किं तु त्रिपुष्करस्यास्य श्रूयतां यो विधिः स्मृतः ॥ २८ ॥
[1]यस्त्वात्मको भवेच्छब्दः स चापि द्विविधः स्मृतः ।
स्वरवांश्चैव विज्ञेयस्तथा चैवाभिधानवान् ॥ २९ ॥
तत्राभिधानवान्नाम नानाभावसमाश्रयः ।
स्वरवांश्चैव विज्ञेयो नानावाद्यसमाश्रयः ॥ ३० ॥
शारीर्यामेव वीणायां स्वराः सप्त प्रकीर्तिताः ।
तेभ्यो विनिसृताश्चैवमातोद्येषु द्विजोत्तमाः ॥ ३१ ॥
पूर्वं शारीरादुद्भूताः स्वरा गच्छन्ति दारवीम् ।
ततः पुष्कर[ज] चैवमनुयान्ति घनं पुनः ॥ ३२ ॥
एषा वाह्वीरणैर्ज्ञेया प्रहारा वचनाश्रयाः ।
युद्रादिभिः सदा योज्या वीणावाद्येषु योक्तृभिः ॥ ३३ ॥

22 (C 22, K XXXIV 21) [1]KC शोभार्थं 23 (C 23, K XXXIV 22) [1]KC मानजाति° 24 (C 24, K XXXIV 23) [1]KC वम (चर्म)° 25 (C 25, K XXXIII 24) [1]KC किञ्च त्रिपुष्करस्य 26 (C 26, K XXXIV 25) [1]KC हाराश्च 27 (C 27, K XXXIV 26) [1]KC भेरीपटहझ्झाभि° 28 (C 28, K XXXIV 27) 29 (C 29, K XXXIV 28) [1]KC यस्त्वात्मको 30-33 (C 30 33, K XXXIV 29 32)

शारीर्यामथ वीणायां क्रिटुं जगति कादिति (?)।
भवेद् वाष्करणं तत्र नानाकरणसंयुक्तम् ॥ ३४ ॥
यं यं गाता स्वरं गच्छेत् तमातोद्ये प्रयोजयेत् ।
यतिपाणिसमायुक्तं गुरुलघ्वक्षरान्वितम् ॥ ३५ ॥
पौष्करस्य तु वाद्यस्य मृदङ्गपणवाश्रयम् ।
विधानं तु प्रवक्ष्यामि दर्दुरस्य तथैव च ॥ ३६ ॥
षोडशाक्षरसम्पन्नं चतुर्मार्गं तथैव च ।
विलेपनं षट्करणं त्रियतिं त्रिलयं तथा ॥ ३७ ॥
त्रिगतं [1]त्रिप्रचारं च त्रियोगं च त्रिपाणिकम् ।
दशार्धपाणिप्रहतं त्रिप्रहारं त्रिमार्जनम् ॥ ३८ ॥
[1]अष्टादशजातिश्चैव विंशतिप्रकारं तथा ।
एभिः प्रकारैः सम्पन्नं वाद्यं पुष्करजं भवेत् ॥ ३९ ॥

तत्र षोडशाक्षरमिति यत्तदनुव्याख्यास्यामः —
[1]'कखगघटठड[ण]तथदध[म]रलहा इति षोडशाक्षराणि स्युः' ।
पुष्करवाद्ये नित्यं वाष्करणे सविधेयानि ॥ ४० ॥

चतुर्मार्गं नाम—आलिप्ताङ्कितगोमुखवितस्ता[एताः ][2] चत्वारो मार्गाः ।

विलेपनं नाम—वामोर्ध्वकमलेपात् ।

षट्करणं नाम—रूपं कृत[-प्रतिकृत] प्रतिभेदो रूपशेषमोघः प्रतिशुष्केति[3] ।

त्रियति नाम—द्रुतमध्यविलम्बितयोगात् ।

त्रिगतं नाम—तत्त्वं घनमोघश्चेति ।

त्रिप्रचारं नाम—समप्रचारं विषमप्रचारं समविषमप्रचारश्चेति ।

त्रिसंयोगं नाम—गुरुसंयोगो लघुसंयोगो गुरुलघुसंयोगश्चेति ।

त्रिपाणिकं नाम—समपाणिः अवरपाणिः उपरिपाणिश्चेति ।

पञ्चपाणिप्रहतं नाम—समपाणिरर्धपाणिरर्धार्धपाणिः पार्श्वपाणिः प्रदेशिनी [च] इति ।

त्रिप्रहारं नाम—निगृहीतोऽर्धनिगृहीतो मुक्तश्चेति ।

34 (C 34, K XXXIV 33) 35 (C 35, K XXXIV 34) 36-38 (C 36-38, K XXXIV 35-37) [1]KC त्रिप्रकारं 39 (C 39 K XXXIV 38) [1]KC विंशत्प्रकारं चैव तथाष्टादशजातिकम् 40 (C 40, K XXXIII 39) [1]KC क ख ग घ ट ठ ड ढ त थ द ध य र ल ह [2]KC °वितस्तात्यलानि [3]KC प्रतिशुष्केति

त्रिमार्जन नाम—[ मायूरी अर्धमायूरी कर्मारवीश्चेति ।

अष्टादशजातिक नाम—शुद्धा एकरूपा देशानुरूपा देशादपेतरूपा पर्याय विष्कम्भ पर्यस्ता संरम्भ. पार्ष्णिसमस्ता दुष्करकरणा ऊर्ध्वगोष्ठिका उच्चितिका एवबाधा मृदङ्गपणवा अवकीर्णा अर्धावकीर्णा सप्लवा विधूतं चेति ।

विंशतिप्रकार नाम—चित्र सम. विभक्त छिन्न. छिन्नविद्ध. विद्ध अनुविद्ध स्वरूपानुगत. अनुसृत विच्युत दुर्ग अवकीर्ण. अर्धावकीर्ण एकरूप परिक्षित साचीकृत समलेख चित्रलेख. सर्वसमवाय. दृढ इति । ]

अभिव्यक्तानि पूर्वं यान्येतानि षोडशाद्यानि ।
तान्यक्षराणि जानीत पुष्करेषु यथाक्रमम् ।
पणवे दर्दुरे चैव मृदङ्गेषु तथैव च ॥ ४१ ॥
कटरत[ठद]धास्तु दक्षिणमुखेऽत्र गहथाश्च वामके [निपा]ता ।
थकारश्चैवोर्ध्व[कि] करणधघलाश्च स्युरालिग्ये ॥ ४२ ॥

एतेषामक्षराणां स्वरसंयोग च व्याख्यास्याम —तत्र अ आ इ ई उ ऊ ए ऐ ओ औ अं अः इति स्वरा व्यञ्जनै सह संयोग गच्छन्ति ।

तत्र अकारेकारोकारैकारौकारांकारा ककारे यथा—क कि कु के को कं इति ।
इकारोकारौकारा खकारे यथा—खि खु खो इति ।
उकारैकारौकारा गकारे यथा गु गे गो इति ।
अकारैकारौकारा घकारे यथा—घ घे घो इति ।
अकारेकारौकारांकाराष्टकारे यथा—ट टि टो टं इति ।
अकारेकारौकारांकाराष्ठकारे यथा—ठ ठि ठो ठं इति ।
अकारौकारो डकारे यथा—ड डो इति ।
अकारेकारैकारा णकारे यथा—ण णि णे इति ।
अकाराकारेकारैकारास्तकारथकारयोर्यथा—
त ता ति ते थ था थि थे इति ।
अकारोकारैकारौकारा दकारे यथा—द दु दे दो इति ।
अकारेकारौकाराकारा धकारे यथा—ध धि धो धं इति ।
अकाराकारेकारैकारा रेफे यथा—र रा रि रे इति ।
अकाराकारेकारैकारा लकारे यथा—ल ला लि ले इति ।
हकारमकारौ शुद्धौ ।

41 (C 41, K XXXIV 40) 42 (C. 42, K XXXIV 41)

तत्र ककारघकारतकारथकारधकाराणा रेफोऽनुबन्ध यथा—घ्रु ं ध्र त्रे क्र ं थ्र [ द्रं ] ध्र इति

ककारस्य लकारोऽप्यनुबन्ध यथा—[क्लृ ं क्ले ] इति

एवमेतै॰ सयोगैर्द्विहस्तसंयुक्तान्यक्षराणि भवन्ति। तत्र आङ्किके मृदङ्गे द्विपुष्करे समहस्तनिपाताद् धंकार ।

तत्र अङ्गुलिचलनात् कुकार । तत्रैव अवष्टम्भाद् य(ध)कार । तत्रैव अर्धनिगृहीतस्थकार । तत्रैव पार्ष्णिपीडित ह्रकार । तत्रैव [1]अङ्गुलिकुञ्चतात् क्ष-(ख)कार । ऊर्ध्ववामकयो समहस्तनिपाताद्धकार प्रदेशिन्या वालिग्ये क्लेकार ।

[2]केचिदेकवक्त्रज केचित् त्रिवक्त्रज केचिन्निर्वक्त्रजं इति यथा रेफ सर्ववक्त्रेषु, दकारधकारावालिंग्यवामके, आलिग्यदक्षिणे मकार, वामोर्ध्वके गकार' क्वचिदालिग्येऽपि लाघनार्थं धकार कर्तव्य॰। एवं तत्र प्रतिषेधो न कार्य इति उक्त स्वरव्यञ्जनसयोग [3]।

[4]पञ्चपाणिप्रहृतमिति यदुक्त—[5]समपाणिरर्धपाणिरर्धार्धपाणि पार्श्वपाणि प्रदेशिनी चेति। त एते च प[ार्श्वार्ध]पाणिप्रहृता निगृहीतार्धार्धनिगृहीता[द्विहस्तप्रहृता] मुक्ता यथायोग कार्या भवन्ति। तत्र समपाणिप्रहृतो मकार॰ स निगृहीत । [7]गकारदकारधकारा अक्षराऽर्धनिगृहीता अर्धपाणिप्रहृताश्च। [8]ककारखकारटकारडकारा पार्श्वपाणिप्रहृता निगृहीताश्च। [9]तकारथकारहकारा [10]अर्धार्धपाणिप्रहृता अर्धनिगृहीताश्च। [11]मकारठकारणकाररेफलकारहकारा द्विहस्तप्रहृता मुक्ता । [12]प्रदेशिनीप्रहृतो मुक्त [13]क्लकार । पार्श्वपाणिद्विहस्तप्रहृता मुक्ता अपि [14]द्रा ध्र क्लेंकारा । तत्र च क्लेकारा अर्धपाणिप्रहृता निगृहीताश्च। पार्श्वपाणिप्रहृतो निगृहीतश्च ×कार । एवमेतेष्वक्षरेषु प्रयोगवशेन कार्या प्रहारा ।

[1]KC भङ्गुलिकुञ्जनात् घकार [2]C from here upto °सयोग omitted by K [3]C सयोगज [4]C पञ्चपाणिप्रहृताना K समपाण्यर्धपाण्यर्धार्धपाणिपार्श्वपाणिप्रदेशिन्यश्चेति N om पार्श्वपाणि° [6]K पञ्चपाणि प्रहृता [7]C °दकारघकारा N °दकार ढकारा [8]K ककार खकार टकार दकारा C ककार खकारणकार डकारा [9]K तकारथकारावार्ध° [10]C °प्रहृताश्च and om अर्धनिगृहीताश्च [11]MN मकारढकारा मुक्ताश्च विहस्तप्रहृता C ×कार थकारणाकारमुक्ताश्च [12]CN प्रदेशिन्या हतश्चालिङ्ग (ङ N) [13]C चविभ्रड्डाडीतयुगाश्च कुत्प्र इत्यर्ध पाणि प्रहृता निगृहीताश्च [14]C om upto °धकार

[1]षोडशैव तु दश्यानि [2]वाद्यजान्यक्षराणि तु ।
अनेनैव [3]तु योगेन योज्य [4]धाष्करणं बुधे ॥ ४३ ॥

चतुर्मार्गमिति यदुक्तं तदनुव्याख्यास्याम ।

[1]अड्डितालिप्तमार्गौ तु वितस्तो गोमुखस्तथा ।
मार्गाश्चत्वार एवैते [2]प्रहारकरणाश्रया ॥ ४४ ॥

[3]तत्रालिंग्यमृदङ्गप्रहारयुक्तोऽड्डितो मार्ग । [4]वामोर्ध्वकप्रहारयुक्तस्त्वालिप्तमार्गः । [5]ऊर्ध्वाङ्किकदक्षिणमुखो क्षिप्तहस्तप्रहतो [6]वितस्तो मार्ग । [7]आलिंग्यकरणबहुल सर्वपुष्करप्रहतो [8]गोमुखमार्ग इति ।

[9]तत्राड्डितप्रहारजो यथा—[10]घट्ट कथित घट्ट घेंटा घट्ट गदिम गदि घण्टां गदिथत्थे इत्यड्डितो मार्ग ।

[11]इदानीमालिप्तमार्ग —[12]दध्रो मा माद्रो म रन दु यें (ध्र) घे गु दु (गु)रणन्दु यें ध्रें (घ्र) द्र घे ध्रो मां आलिप्तमार्गवाद्य विज्ञेय वाद्यकैरेवम् ।

[13]इदानीं वितस्तमार्ग—[14]तकितान् तकिनान् सेन्तां किंताना धिसकेना द्दु द्दुदु केनां [इति] वितस्ते स्यात् ।

[ इदानीं गोमुखमार्ग-] [15]गुद्दद्द्दमथिकदा घंघेन छिदुखु खुणोगगटत्यिमटम् इति गोमुखमार्गः । [16]अङ्गुलिप्रचलनात् वर्तितो हकारो मुक्तश्च स एष स्वस्तिकेनोर्ध्वा[कि]कयोरर्धनिगृहीत । तयोरेव समहस्तदर्शनात् ।

[अङ्गुलि]-प्रचालनात् हकारो मुक्त इति धित्थ तित्थ डित्थ किता खदेड् खदेड् [17]गुधु दु लेण्ट कत्ति तित्थन धित्तान् द्रुवघे विधातत्या । [18]एवं वितस्ते

43 (C 43, K XXXIV 42) [1]K षोडशैतानि [2]K वाद्यजान्यक्षराणि [3]K विधानेन [4]C था कारण K ज्वरस 44 (C 44, K XXXIV. 43) [1]K अड्डितालिप्तमार्गौ तु वितस्ता गोमुखौ तथा [2]K प्रहारकारणाश्रया. [3]K एषा किम अदङ्ग° C °मदङ्गप्रहारयुक्तस्त्वड्डिती [4]MN वामोर्ध्वप्रहारयुक्त° C × प्रहारयुक्त° [5]MN ऊर्ध्वाङ्ग दक्षिणो C ऊर्ध्वाङ्कि° [6]C वितस्त K वितस्ता [7]C आलिङ्गकरण K आलिङ्गिककरण° [8]K गोमुखौ° [9]K अड्डितप्रहार जातम् [10]C मट्ट कथितघट्टघटा घट्ट गथितुग गदिमन्थ सन्थित्य M मट्ट कथित घट घटा घट्ट गथितुगन्धिमघण्टां सन्थित्य K कटमटधिधेतटधोधेन मटाधेधेटाधिमटाधेह इत्यड्डितामार्गः [11]K om upto मार्ग C om मार्ग [12]K घद्दुघद्दुख घेद्दुधुघेद्दु घेमुघघे घोघघु घघदी घेघघे इत्यालिप्तमार्गे [13]K om upto मार्ग [14]C तत्र नितात्न्किताताधुघेनाकिनागृधि मकेता द्दुद्दुदुकेनां तस्ते K. कदितातकिता तकिये तकिते धदके तातुदा घेघेदेदा इति वितस्तामार्गः [15]C om upto गोमुखमार्ग [16]K om upto द्रुवघे विधातव्या [17]C द्रुदुदुसोर्थ्वित-दिमातुघुमधो घेघी विधातव्या [18]K. द्रुयोड्डितमार्गे दक्षमहवितर्जितान् प्रहारांस्तु सदृशमार्गेण विना देया.

मार्गे गणे समरवर्जितप्रहारा स्युः। ऊर्ध्वमार्गेण विशेषा [19]कार्यास्तु गोमुख्या खटमरिथमट्टघण्टाघुरखेट्ट खत मा (खुदु) ण किति किति किटि मां खु खु णु ढे धे धो धो विधातव्या। [20]इदानीं गोमुखीवाद्य—[21]ठ ड ण घेण्ट णखन्दु लघु खेड् घट मट्ट टां णु घ [खु खु] णा थि घट घिटि मां कस्कु टां णु घेड् किटि माड् घे घे को मो म गोमुख्या [स्यात्]।

ये त्वालिससमुत्था [1]सर्वे मार्गेस्तु ते विधातव्याः।
[2]ग्रहणाक्षरसंघातैस्तु मृदङ्गानां ग्रहो भवति ॥ ४५ ॥
एतेषां तु प्रवक्ष्यामि दर्शनानि यथाक्रमम्।
[1]चतुर्णामपि मार्गाणामक्षरग्रहणं यथा ॥ ४६ ॥

[2]घुड् घुड् घट घेड् मथि मथि मटा मडथि ठिड् मन घेड् कड् कथि कडाड् त्वहिते। धाध गेटा तकि ना घु घुड् ध्रो किटि नेण्टाड् गान् धि किटि केथा थ कुना किता किरि दाम् इति सयोगोऽपि [घि]तस्ते तु डो माड गुदु घेड घे घण्टा ते घ ट दु मा [इति] [3]आलिमे सयोग कार्योऽय वादने [4]तज्ज्ञैः।

[5]घे घेटाथि कटा गुट्टा घेड् घेटा घण्टान् थि मधि रिथय के स टे घे ग घेणो णो णम् इति

[1]गोमुख्या उक्तो यो मार्ग एतेषां पुष्कराणां [च]।
[2]त्रिविध प्रचारस्तत्र समो विषम समविषम इति ॥ ४७ ॥
वामोर्ध्व[क]योर्वामसव्ययोरङ्कितमार्गेऽपि।
[4]कार्यं समप्रचारस्त्वाम्नि[3]ते धायकरणे तु ॥ ४८ ॥

[19]K कार्योध गोमुख्या द्रोमा द्रोमा गुदुधे गुदुधे दुमाथोते। थान्निममार्गे वाद्य विज्ञेय वादये तज्ज्ञ.
[20]K om upto वाद्य [21]K घधघटधघो गुदुघेघेदघटमटा कटा किटिमा करदन दुमाकेके दिदुटे हेटेघा गोमुख्य 45 (C 45 K XXXIV 44) [1]C सर्वे मार्गेस्त K. सर्वं मार्गेस्तु विधातव्या.
[2]C ग्रहणाधरदधानि स्यादमदङ्गाम् K ग्रहणीघणसघातैम् मृदङ्गाणा 46 (C 46, K. XXXIV 45) [1]C चतुर्णामपि [2]K वन्दुदिटा मटाध रीत्थिमय कटाथ्मिमधिके क्राधि क्राधि कट॰ किटीधिघघेडिता वाध चन्द्रा वकिता चन्द्रा दधिटिटाधेटा मधिकिटिकिता टाकुली तकिकिदी मतिसयोगाद्विते व द्रामागु दघेघेदी धघिदाघद्रमाम [3]K आन्निमक सयोग [4]K सम्यक् for तज्ज्ञैः [5]K घटाकघ गुडुघोटाघेटाक्षोथाटा घोटखमटिघ क व घडुघीणोघा किताराकुली तकिटा किकिदोम तिसयोगाद घितत्ते व द्रामांगुदुघेघेदी घघे दा घ द्रामां चारे 47 48 (C 47-48, K prose just before XXXIV 46) [1]K ॰गोमुख्या। एतेषां पुष्कराणां त्रिविध प्रचारः—समप्रचारो विषमप्रचारः समविषमप्रचारमिति। तत्र वामोर्ध्वकयोर्वामे सवेनैव ऊर्ध्वं [कि] तु दक्षिणक × × ×। [2]C त्रिविधस्तत्र प्रचारः M om तत्र [3]C ॰रङ्कितामार्गे [4]K × × दक्षा प्रहितावन्निमे वाद्यकरणे तु (XXXIV 54)

¹वामोर्ध्व[क]पसव्याना ²प्रहते ³वामकरः कर्तव्यः ।
⁴सव्योर्ध्वगमनाना सव्यो विषमप्रचारे तु ॥ ४९ ॥
¹एवं स्वस्तिकयोगाद् द्वाभ्यामपि यद् भवेत् तु हस्ताभ्याम् ।
²मा[र्गे] वितस्तिसंज्ञे प्रहते विषमप्रचार स' ॥ ५० ॥
स्वच्छन्दतस्तु ¹करयो ²प्रहत शेषेषु मार्गकरणेषु ।
अङ्कितगोमुखयोगात् समविषमो हस्तसंचार ॥ ५१ ॥
शृङ्गारहास्ययोगे वाद्यं योज्य तथाङ्किते मार्गे ।
धीराद्भुतरौद्राणा वितस्तमार्गेण ¹वाद्यं स्यात् ॥ ५२ ॥
करुणरसे ¹त्विह वाद्य योज्य ²चालिप्तकरणमार्गेण ।
बीभत्सभयानकयोस्तथैव नित्यं ³हि गोमुख्या ॥ ५३ ॥
रसभावसत्त्वयोग दृष्ट्वाभिनयं गतिप्रचारञ्च ।
वाद्यं [¹नृ]त्ते कार्यं तथा तथा स्थानमयोगात् ॥ ५४ ॥
¹एवं प्रहतविधानं कार्यं ²मार्गाश्रितं रसे सम्यक् ।
वक्ष्याम्यतश्च भूयो ³दर्दुरपणवाश्रितं वाद्यम् ॥ ५५ ॥

अतिवादितमनुवाद्यं समवादितमुच्यते तथा वाद्यम् ।
¹तत्रातिवादितं स्यात् ²पुष्कराणामग्रतो यत्र ॥ ५६ ॥
¹यत्त्वनुगतेर्मृदङ्गै रनुवादितमुच्यते ²तद्वाद्यम् ।
समवादितं मृदङ्गैर्ज्ञेयं साम्येन यद्वाद्यम् ॥ ५७ ॥
¹कखगा पण[ध]रवाडो प्रहणाद् प्रहुलां भ्राङुलाम् ।
एते वर्णा ²नित्यं [च] पणववाद्ये प्रयोक्तव्या ॥ ५८ ॥

49 (C 49, K XXXIV 55) ¹K वामोर्ध्वकमध्याना ²K प्रहतौ C प्रहतो ³C वामस्तु कर्तव्य K वाम करम् कतव्य ⁴K वामोर्ध्वकसयोगात् प्रहते विषमप्र र तु 50 (C 50) ¹K om 50 ²C मार्गे वितस्ति° 51 (C 51 K. XXXIV. 56) ¹K करायाः ²C शेष प्रहतेषु 52 (C 52, K XXXIV 57) ¹K मार्गे तु. 53 (C 53, K XXXIV 58 59) ¹C च कार्य वाद्य ²K त्वालिप्तमार्गेण ³C हि गोमुखो मुख्याम् 54 (C 54, K XXXIV 60) ¹K वर्षे C नित्य ³C यथाकर्म 55 (C 55, K XXXIV 61) ¹K एव प्रतिविधानं C प्रहतविधान ²K मार्गाश्रित बुधे ³K. द[र्]र पणवाद्यम 56 (C 56, K XXXIV 62) ¹K तत्रातिवादित ²C मुरजानां 57 (C 57, K XXXIV 63) ¹K. यत्त्वनुगत ²K तथा वाद्यम् 58 (C 58, K XXXIV 64) ¹C कखगां प पणव मुरजा फोधवत्स्यात् मडुमाम् धाड्या K कखगः पद्मता दीघ्दा नधला कंकिम ×ति कविह्न ²K पणवातोद्यविधाने विधासम्या ³K. वाद्या माघोनकुन्दं दहुनं चाकिरि घिकिगि म्हट ठेनि हसिमि किमतीर्थ इति पणववाद्यम्

[3]किरि घिण्टा थो थो णो धो त्र(?)हुला किरि घिण्टां णो णो ण ण्टां चो किरि कण्डा मटा मट स्थि ते (?) टे टे दोण्णाम् पणववाद्यम् ।

तस्य [1]प्रहते कार्यं [2]कनिष्ठिकानामिकाप्रकेणैव ।
[3]नानाकरणविभागं [4]पणवे [5]शिथिलायते तज्ज्ञैः ॥ ५९ ॥
[1]वाद्या कनिष्ठिकाभ्यां करणरागवर्णा ।
शेषास्तु [2]वादनविधौ स्मृता प्रहाराश्चैवाद्यानाम् ॥ ६० ॥
कोणाऽनामिकवाद्यं मध्याङ्गुल्याद् वादने कार्यम् ।
कोणाऽनामिकवाद्यं शुद्धं महत [1]भवेदेतत् ॥ ६१ ॥
भ्रान्तकरणयोगात् [1]त्रिकुलहमित्येत् भ्रान्तवाद्नाप्रकृतम् ।
[2]स्थितकरणोऽनुबन्धास्तताभ्यस्तो त्वरकारस्तु ॥ ६२ ॥
[1]मिश्रकरणानुबन्धे द्रेकारस्तूर्ध्वहस्तसंयोगात् ।
[2]स तु वादकेन वाद्यो धुर्येण [3]विशेषत कार्यं ॥ ६३ ॥
[1]स्वरं(?)चित्रकरणस्य कार्य(र्ये) तथा कनिष्ठिकाग्रेण ।
[2]तत्रैव कार्या द्रोण्णिमथाणिण्णि कृताप्रहारा वै ॥ ६४ ॥
[1]कृत्वा शिथिलं कक्ष कार्या तु कनिष्ठिकाग्रेण ।
तेनैव चरेद्धत्थो द्राण × ×इत्यञ्चितेनैव ॥ ६५ ॥
[1]अञ्चितशिथिले पणवे कठणतणिणकृता प्रहारास्तु ।
[2]भ्रान्तकरणा न तथास्त्वञ्चितकक्षे प्रशिथिले च ॥ ६६ ॥
[1]अञ्चितकक्षे पणवे खखणण × ×कृता प्रहारस्तु ।
[2]तथेऽन्तत प्रहारा पणवे कार्या सदा प्रशिथिलकक्षा ॥ ६७ ॥

59 (C. 59, K XXXIV 65) [1]K प्रहरैल [2]K °कायकोषे [3]K °विभागे C °विभाग [4]K पणवे [5]K शिथिला च तान्ज्ञै 60 (C 60, K XXXIV 66) [1]KC वादकनिष्ठिकाभ्या [2]C वादनकृता [3]C प्रकारश्च वाद्यानाम् K प्रहारा विविधवाद्या 61 (C 61, K XXXIV. 67a) [1]M °देकम् 62 (C 62 K XXXIV 67b-68a) [1]K. त्रिकुलमिति॰ C कुलहामीतो [2]C °करणोऽनुबन्धास्तताभ्यस्तो K कगति करणानु चिद्व ततभ्यस्तव कारस्तु 63 (C 63, K XXXIV 68b 69a) [1]K दीर्घकरणानुविद्धे कार्ये × × [2]C चतुवादकेन [3]K वाद्यो प्र वेन × × [4]C विषमत 64 (C 64ab, K XXXIV 69b-70a) [1]K सचितकचो येण वौ कृत्वा धुयपरिवादकाभ्यादि [2]C तत्रैकार्या द्रोणिमथा प्रहारके K रणत्वकिकिछिकिखिञ्जा इति प्रहारा विधातव्या 65 (K XXXIV 70b 71a) [1]C om 76 66 (C 64b, K XXXIV 71b-72a) [1]C om 66a [2]C भग्नकरणे तथाञ्चित सकक्षा पशिथिन्न वा 67 (C 65 K XXXIV 72b-73a) [1]C. अञ्चितकक्षे पणवे ये ककार एकप्रकारस्तु [2]K विधे इति प्रहारा [प]णवे × × सदा शिथिल कक्षा

[1]कखटे कृताः प्रहाराः सोच्छ्वासे पणवे विधातव्या' ।
[2]शेषभ्रान्तकरणसंयोगात् सयोगकृता संविधातव्याः ॥ ६८ ॥
[1]टकारानुस्वणन पणवे कक्षाश्रिते तु सम्भवति ।
तेन च णकारयुक्तो ह्न इति पणवे प्रहारो [भवेत् ] ॥ ६९ ॥
तिर्यग् गृहीतवादनमुखवर्तित इष्यते प्रहारोऽयम् ।
कहुलां ककुला क्रमासति क्रकुला इत्थं प्रहार स्यात् ॥ ७० ॥
[1]एवं पणवे वाद्य विधिवत् संक्षेपतो मयाभिहितम् ।
व्याख्यास्यत.परमहं दर्दुरवान्याक्षराण्येवम् ॥ ७१ ॥

× × रक्तित्रिकलौ क्लेचङ्गो गौणो हथिहासयुक्ता' ।
इति दर्दुरे प्रहारा॰ कार्या मुक्ता थणण्ण[वा]ध्न ॥ ७२ ॥
कुर्यात्तत्रेणणक्षार प्रघ × × इति च दक्षिणकरेण ।
वामेन[च] गोमरथास्तु स्पृष्टः ककारोऽमेण ॥ ७३ ॥
मुक्तोल्लाघिति × × निपीडितेन वै करद्वयेनापि ।
विमुक्तमहणस्यान्ते स्वने निपीडिते चैव ॥ ७४ ॥
स्यात् पीडिते च थित्थेनत्र नित्यमथापि वा ।
मुक्ता विशेषा भवन्ति मुक्ता मस्त इति चैव निगृहीते ॥ ७५ ॥
शीघ्रकरणानुविद्धस्थितिरेव हि वै स्वरंस्खलित स्यात् ।
इति दर्दुदप्रहारा' समासतस्तत्र विज्ञेया ॥ ७६ ॥
[1]एवं त्वसंकरकृता प्रहारविशुद्धिरिह कीर्तिता तज्ज्ञै ।
दर्दुरपणवमृदङ्गैर्मिश्रितनाद्य' प्रवक्ष्यामि ॥ ७७ ॥

68 (C 66a , K XXXIV 73b-74a) [1]K खलु घटाकृता प्रहारा स्वनुच्छवसि, पणवे विधातव्या [2]K शेषभ्रान्तकयोगा सयुक्ता सविधातव्या C om. 68b M as read 69 (C 66b 67a , K XXXIV 74b 75a) [1]C षोकारोऽनुस्वारजे पणवे K टकारानुस्वनं वाद्य कथा° [2]K तेन णकारो युक्तो ह्न C. थेंकारोयुक्तो क 70 (C 67b 68a , K XXXIV 75b 76a) [1]C °वादनरववर्तितकि° K °वानमुखवर्तित [2]K भइल भइर्स क्रमधोतोऽव इष्यते तकारस्तु 71 (K XXXIV 76b 77a) [1]C om. 71 72 (K XXXIV 77b 78a) [1]C om 72 73 (K XXXIV 78b 79a) [1]C om, 73 74 (K XXXIV 79b 80a) [1]C om 74 75 (K XXXIV 80b 81a) [1]C om. 75 76 (K XXXIV 81b 82a) [1]C om 76 77 (C 68b 69a ; K XXXIV 82b 83a) [1]C एवम मकरकृता

तत्र [1]व्यक्तीभाव वाद्ये गच्छन्ति मिश्रिता॰ केचित् ।
केचिद् युगपत्करणा॰ केचित् पर्यायकरणास्तु ॥ ७८ ॥
एकैकसंप्रयुक्ता वर्णा ण गरास्तथैव [1]सप्रयोक्तव्याः ।
[2]धेंका कत्थ त्रैघो कहुल तकिता मृदङ्गेषु ॥ ७९ ॥
[1]अथ दर्दुरे दड्, त्थेड्, द्रेड्, कहुला मट हि पणवे च ।
[2]थमटत्थिडां कहुला मटत्थि देड्, मेड्, विमिश्रितस्तु ॥ ८० ॥
एभ्यो येऽन्ये शेषा-न्ते मिश्रा एव नित्यश॰ कार्या॰ ।
पूर्वेऽपि च मिश्रत्वं व्रजन्ति सर्वे यथायोगम् ॥ ८१ ॥
[1]अथ युगपत्करण कहला ण्णण्णा खु खु ण्णे खे ।
द्रोमो दोण थे थो थो थिंद्र एवं योज्य पणवे वाद्यम् ॥ ८२ ॥
[1]धुर्यकृतं च क्रमश करण परिवादकेन कर्तव्यम् ।
[2]ट ट ट ट्रे घोणणण किरिणि × × किण्णा कृत चेति ॥ ८३ ॥
[1]पणवस्य चानुबन्धे कार्यं ण्णु खु खु णेति वाद्यं तु ।
भूयःकृतप्रतिकृतभेदो मार्दङ्गिकदर्दुरिकाभ्या तु ॥ ८४ ॥
यद् यत् [1]कुर्यान् मुरजे प्रहारजात गतिप्रचारेषु ।
[2]अनुगतमक्षरवृत्त तदेव वाद्यन्तु पणवेऽपि ॥ ८५ ॥
नहि चित्रं कर्तव्य गतिप्रचारेषु [1]वादन तज्ज्ञै ।
[2]समविषम तत्र हि यन्न लक्ष्यं पादसञ्चारे ॥ ८६ ॥

78 (C 69b 70a K XXXIV 83b 84a) [1]C विभाय कैचित् वाद्ये गच्छन्ति M om वाद्ये, and reads मिश्रित, °करण and °करण तु 79 (C 70b-71a, K. XXXIV 84b 85a) [1]K. सयुक्ता [2]K धन्याग दो ख्ला विजुल्म तनुहता 80 (C 71b 72a, K XXXIV 85b-86a) [1]K अथ दर्दर पिपिपिके निपत्तययोस्तु सयुक्ता [2]K घथ खीटो दे दे पिपि विमिश्रास्तु. 81 (C 72b 73a K XXXIV 86b 87a) 82 (C 73b 74a, K XXXIV 87b 88a) [1]K युगपतकरणानिपुण गाथो खुरखुणखुणहेलह × × [2]K घडुल दृश्ला दो दो एव योज्यास्तु पणवे हि 83 (C 74b 75a K XXXIV 88b 89a) [1]K. धुर्यकृताय क्रमश करणे परिवादनेन कर्तव्या [2]K खो खो दे दे घाणह्निहितिकिषि कृतास्तु पणवानाम् 84 (C 75b-76a, K XXXIV 89b 90a) [1]K अनुबन्धे कार्यं तु कुचुकुणकेति वाद्य [illegible] [2]C भूय॰ क्रतश्च प्रतिकृत मार्दङ्गिक° K भूय प्रतिकृतिभेदो मार्दङ्गिक दर्दुरिभ्या च । 85 (C 76b-77a, K XXXIV 90b-91a) [1]C कुर्यान्मृ रवप्रहार° [2]K अनुगतोऽक्षर° 86 (C 77b 78a, K XXXIV 91b 92a) [1]C वाद्यतस्तज्ज्ञै M वादनमन स [2]C समसहित तत्र हितं न

[1]उपरिकरण यथेष्टं कर्तव्य [2]पणवमृदङ्गे च ।
[3]तत्र प्रहारकरणैर्मृदङ्गवाद्यं विधातव्यम् ॥ ८७ ॥
प्रायेण सर्वातोद्ये[1]ष्वादौ पणवग्रहः प्रयोक्तव्यः ।
वक्षाम्यत. परमहं द्रसत्स्रेन्ततेतितापत्सदेवेदे ॥ ८८ ॥
रेभि[त]नृत्तामथि इति दर्दुरे प्रहारः ॥
तथोर्मुके निषण्णे च कार्यस्तत्र णण्णारे ॥ ८९ ॥
[1]घ्रें धीकिधीति दक्षिणकरेण वामे तु गुरुथि द्रु ।
तत्यवृष्टो कराग्रेण मुक्ते तमिति चैवं निगृह्य ॥ ९० ॥
शीघ्रं करणानुबन्धस्थितिरेव हि तत्र स्यात् ।
[1]इति दर्दुरे प्रहारे वक्ष्याम्यूर्ध्वकरणजातम् ॥ ९१ ॥

रूपं कृतप्रतिकृत प्रतिभेदो रूपशेषमोघश्च ।
षष्ठी वै [1]प्रतिशुष्केत्येवं ज्ञेय करणजातम् ॥ ९२ ॥

तत्र रूपं नाम [2]द्विहस्तकरणविभक्तं यथा—[3]घं खु खु ण खु घं क्रमं रिथमं स्थेत्तरं घटां घरिथ मेथि घेण्टा कट गुद्धरण किटि घं घे कमटं घे फखमिति रूपम् ।

[4]कृतप्रतिकृतं नाम यत्रैकं करणं त्रिपुष्करमुद्भावयति यथा—[5]थं घु खु ण खुथं क्रमंरिथ वर्गो घटा घटरिथ गं त्सा इ द्रु घे कुकुलाण्णं दो धो ण इति कृतप्रतिकृताख्यम् ।

प्रतिभेदो नाम युगपत्कृते करणे मृदङ्गाणां यदुपरि[7]करणेन गच्छति यथा—[8]धो धो णा खो ला ल णा णा रिथ टघि घण्डा पभि करणविशेषः प्रतिभेदो नाम विज्ञेय ।

रूपशेषं नाम [9]करणानामविशेषो यथा—[10]त्तु त्तु णो ण्णा मटघें घेण्डामटघोटा मथि थाल्याम् घोमितिवाद्यं रूपशेषं ।

87 (C. 78b 79a , K XXXIV 92b 93a) [1]K उपरिकरणे, [2]K पणवी मृदङ्गेषु [3]C तत्र प्रकार करण मृदङ्गवादो 88 (C 79b 80a) [1]K om 88 89 (C 80b 81a) [1]K om 89 90 (C 81b 82a) [1]K om 90 91 (C 82b 83a), K XXXIV 94) [1]K वक्ष्याम्यत परमह लक्षण करणजातम् 92 (C 83bc , K XXXIV 95 98) [1]C रूपकृत प्रति° [2]C प्रतिकृतिशुष्के श्री [3]C द्विहस्तकरणकरणं K करणविभक्त, [5]K, घेथं घेथं घेथ किटिमाथा विषतमत्थि मगु गुरु किटि किट दी घे ण इति रूपम् [4]C प्रतिकृतं नाम [6]K द खुखुणं कडुग मटुणं णथणं क्रमितिम् । घे दो घे घतिमधिगदे थी थी किं तोटो मत्थि टोथं काम् । गुडघे क्लिट्मिदृषा लुद्दो भी भी च खे वाद्यम् [7]K के न for करण [8]K धा धा धा धा कद्णं धा धा क्रमटि दो । पभि करणविशेष (K 96) [9]C विरामतत [10]K, खुखुणं ण ण ण ण दो

प्रतिशुष्क नामानुस्वरो [11]मार्दङ्गिकपाणविकदार्दुरिकाणां यथा—[12]घटमटथि दुणथेजंकिटिकेघेड् घोड् घोण्डाघोण खो खो ख कुटकिट घकथि णणथि प्रतिशुष्काख्यं सदा करणम् ।

[13]ओघो नाम चतुष्काख्ये सर्वभाण्डविरामे द्रुततालयोगेन घोषवद्योघो यथा—[14]थकिटि मथिहि किटि घेड् घण्डाण घोण्डा घोण घोण घट घट घट्ट घेड़ गं घे घिरिणि णगेट्थो थो तथौ गे च ।

करणाणा समायोग [1]षड्विध परिकीर्तित ।
[2]अनेनैव विधानेन योज्य वा करण बुधै ॥ ९३ ॥

[3]यतिर्नाम—समा स्रोतोगता गोपुच्छा चेति । [4]यतिर्लयपाणीभ्यां त्रिविध॰ सयोग । स च त्रिप्रकारो भवति । यथा राद्ध विद्ध शम्यागतमिति ।

[5]त्रिलयं नाम—द्रुतो मध्यो विलम्बितश्चेति ।

त्रिपाणिक नाम—समपाणिर्वपाणिरुपरिपाणिश्चेति एवं त्रिप्रकार सयोग॰ करणेषु ।

[1]समा यतिर्द्रुतश्चापि लयो यत्र भवेद्‌य ।
तथैवोपरिपाणिश्च राद्धस्यैष विधिर्भवेत् ॥ ९४ ॥
[1]तथा वाद्यप्रधानश्चोपरिपाणि समा यति ।
द्रुतश्चापि लयो यत्र राद्ध वाद्यं तु तद्भवेत् ॥ ९५ ॥
स्रोतोगता यतिर्यत्र लयो मध्यस्तथैव च ।
समपाणिस्तथा चैव विद्ध वाद्यं तु तद्भवेत् ॥ ९६ ॥
[1]धानिको वृत्तिमार्गे स्याद्दक्षिणो गं तथ यथो ।
पानेगृत्तममध्येषु विद्ध वाद्यमुदाहृतम ॥ ९७ ॥

मटाथेव मथिटा घेटा घिंदी। घे घेटमठिणणसी इति [11]K मार्दङ्गिकदर्दरवादिनाभ्या [12]K घटमथि कुणकिटि किटिखो खोघोणा खोण खोण खोणा कुटकुट कुणकुटि घुटखे प्रतिशुष्काख्य सदा करणम (K 97) [13]K ओघो नाम सर्वभाण्डविविधोद्रुत पाणिलयो च घोषवशो च [14]K धिकिटि मथकि घिघि खयघेटो खोण खोण खोणी खो। घटघुघघटघुघघणणि × एते तथैव च। (98) 93 (C 84, K XXXIV 99) [1]C करणेषु विधीयते [2]K पनेन नामयोगेन [4]C om upto °चेति [5]K om 94 (K XXXIV 100) [1]C om 94 95 (C 89) [1]K om 95 96 (C 87, K XXXIV 101) 97 (C 88) [1]K om 97

अर्धपाणिस्तु यत्र स्यात्तथा चैव स्थितो लयः ।
[1]गोपुच्छा च यतिर्वाद्यं तद् वै शय्यागतं भवेत् ॥ ९८ ॥
[1]यथा च गीतिप्राधान्यं मार्गश्चैव[हि] दक्षिणः ।
[2]अत्युक्तमेवातोद्ये[ऽ]षु वाद्यं शय्यागतं भवेत् ॥ ९९ ॥
[1]स्थिताल्लयात् प्रभृत्येषां प्रमाणं संप्रवर्तते ।
कार्यहानिः कलानां च शेषेष्वन्येषु पाणिषु ॥ १०० ॥
[1]यतयः पाणयश्चैव लया वाद्यसमाश्रयाः ।
[2]यथाकामं हि कर्तव्या नाट्ययुक्तिमवेक्ष्य तु ॥ १०१ ॥

[1]त्रिमार्जनं नाम —

मायूरी ह्यर्धमायूरी तथा कर्मारवी पुनः ।
तिस्रस्तु मार्जना ज्ञेया पुष्करेषु स्वराश्रयाः ॥ १०२ ॥
गान्धारो वामके कार्यः षड्जो दक्षिणपुष्करे ।
ऊर्ध्वके [1]मध्यमश्चैव मायूर्यां तु स्वरा मताः ॥ १०३ ॥
वामके पुष्करे षड्जो ऋषभो दक्षिणे तथा ।
[1]धैवतश्चोर्ध्वके कार्यमर्धमायूर्यु[र्यां] दाहृता ॥ १०४ ॥
ऋषभः पुष्करे वामे षड्जो दक्षिणपुष्करे ।
[1]पञ्चमश्चोर्ध्वके कार्यः [2]कर्मारव्याः स्वरास्त्वमी ॥ १०५ ॥
एतेषामनुवादी तु [1]जातिरागस्वरान्वितः ।
[2]आलिङ्ग्ये मार्जनं प्राप्य निषादस्तु विधीयते ॥ १०६ ॥
मायूरी मध्यमे ग्रामे षड्जे त्वर्धा तथैव च ।
कर्मारवी तु गान्धारे साधारणसमाश्रया ॥ १०७ ॥
स्वराः स्थानस्थिता ये तु श्रुतिसाधारणाश्रयाः ।
[1]त एव मार्जनकृता ज्ञेयाः स्वधारिणि [2]स्मृताः ॥ १०८ ॥

98 (C 85, K XXXIV 103) [1]K गोपुच्छ चैव 99 (C 86) [1]K om 99 [2]M °षे×पातेषु 100 (C 90, K XXXIV 103) 101 (C 91 K XXXIV 104) [1]C यथाक्रम [2]C तिस्रो मार्जना नाम 102 (C 92, K XXXIV 105) 103 (C, 93, K XXXIV 106 46b 47a) [1]K पञ्चमश्चैव 104 (C 94, K XXXIV 107, 47b 48a) [1]K ऊर्ध्वके पञ्चमश्च पञ्चमं 105 (C 95, K XXX 108 48b 49a) [1]C °श्चोर्ध्वगो [2]C कर्मारव्या स्वराश्रया 106 (C 96, K XXX 109, 49b 50a) [1]K जातीनां च स्वर भूत [2]K चानिडामार्जनमीक्षा (°ग्रामे) 107 (C 97, K XXXIV 110, 50b 51a) 108 (C 98, K XXXIV, 111, 51b 52a) [1]K एवं संमार्जनकृता C त एव मार्जन [2]K मता

[1]वामकोर्ध्वकाभ्या वै आहार्या कार्या लेपना स्वरा । 
[2]शैथिल्यादायतत्वाच्च तथा त्वालिंग्यकाङ्किके ॥ १०९ ॥
[1]शैथिल्यादायतत्वाच्च चर्मस्फोटनयापि च ।
[2]एव स्वरोद्भव· कार्यो [3]मार्जनासु प्रयोक्तृभि ॥ ११० ॥
मार्जना [1][मृत्-]कृता कार्या वामकोर्ध्वकयोस्तथा[2] ।
लक्षण मृत्तिकायास्तु गदतो मे निबोधत ॥ १११ ॥
नि शर्करा नि सिकता निस्तृणा निस्तुषा तथा ।
न विच्छिन्ना न विशदा न [1]क्षारा कटुका न च ॥ ११२ ॥
नावदाता [1]न कृष्णा च नाम्ला नैव च तिक्तिका ।
मृत्तिका लेपने शस्ता तया कार्या तु मार्जना ॥ ११३ ॥
नदीकूलप्रदेशस्था श्यामा या [1]मृत्तिका भवेत् ।
[2]तोयापसरणश्लक्ष्णा तया कार्या तु मार्जना ॥ ११४ ॥
[1]बहुव्याप्यवदाता तु कृष्णा गुर्वी न च स्थिरा ।
[2]सतुषा न स्वनकरी श्यामा यस्र [च] दृश्यते ॥ ११५ ॥
तत गोधूमचूर्णं वा [1]यवचूर्णं च दापयेत् ।
[2]यवगोधूमचूर्णं तु कदाचिदुप[यु]ज्यते ॥ ११६ ॥
[1]एकस्तस्य च दोष स्यादेकस्वरक[र] भवेत् ।
एव तु मार्जनायोगात् श्यामा स्वरकरी भवेत् ।
त्रिसयोगस्य वक्ष्यामि लक्षण द्विजसत्तमा ॥ ११७ ॥

त्रिसंयोग नाम गुरुसञ्चयो [1]लघुसञ्चयो [2] गुरुलघुसञ्चयश्चेति ।
तत्र गुरुसञ्चयो नाम—[3]गुरस्थितलयौघ[प्र]वृत्तौ यथा—

109 (C 99 K XXXIV 112a, 52b) [1]K वामके चोर्ध्व कै कार्या आहार्या ( कार्या) लेपन ॥ (लेपनश्च एव) स्वरा [2]K om 109b 110 (C 100 K XXXIV 113 53) [1]C शैथिल्यायतत्वैव बध्वा पीडनमार्दवम । [2]K स्वराणा सभव कर्दौ [3]C मार्जना इक्ष्वोक्तृभि 111 (C 101, K XXXIV 114) [1]KC तु [2]K वदत for °स्तथा 112 (C 102, K XXXIV 115) [1]C भास्कटका तथा 113 (C 103 K XXXIV 116) [1]C न वा कृष्णा नाम्ल 114 (C 104 K XXXIV 117) [1]K मधुरा च या [2]K तयापसरणाश्चया, 115 (C 105, K XXXIV 118) [1]K बधिरा श्ववदाता, C बहुकार्थाव° [2]K न तुषा [3]C स्वनकरी 116 (C 106, K XXXIV 119) [1]K तत दद्यात् प्रलेपने [2]C यवगोधूम चूर्णं [3]C कदाचिदुपभुज्यते [3]K om 116b 117 (C 107, K XXXIV, 120 121) [1]C एकस्तस्य च [2]C गुरुलघुसञ्चेन given first [3]C °सञ्चय इति [4]C उरस्थिति लयस्तत्त्वे

[5]घेतो केतां चन्द्रां खेता द्वं द्वं तथैव घेतांद्रम् ।
द्वं द्वं द्राघेता कत्तां खेत्तामिति गुरूणि स्यु ॥

लघुसंचयो नाम [6]लघुद्रुतलयप्रवृत्तौ यथा—

[7]घटमटमटघटमत्थिघट्टघट्टघट् गुरुकृते लघुसश्चय. ।
इति संयोगाज्ज्ञेय मृदङ्गवाद्य प्रयोगज्ञै ॥

[8]गुरुलघुसञ्चयो नाम—लघुके द्रुतलयप्रवृत्तौ यथा—

घट विमथि थे मथिथ किता थ गंघमोथिक ताद्वं कटथिं करथि मघवे इति संचयो गुरुलघु स्यात् ।

[9]त्रिगतं नाम—तत्त्वमनुगतमोघश्चेति ।

अक्षरसदृश वाद्य स्फुटपदवर्णं तथैव [1]वृत्तसमम् ।
सुषिमक्तकरणयुक्तं तत्त्वे वाद्य विधातव्यम् ॥ ११८ ॥
समपाण्यवपाणियुत [1]स्फुटप्रहारकरणानुगतं चैव ।
[2]गेयानुगतवाद्यस्य [यद्व] भवेद्व वात तदनुगतम् ॥ ११९ ॥
[3]नैककरणाश्रययुतं ह्युपरिपाणिकं द्रुतलय च ।
[4]आविद्धकरणे बहुलयोज्यं वाद्यं बुधैरोघे ॥ १२० ॥
[1]सर्वस्यैव हि वाद्यस्य अष्टौ साम्या भवन्ति हि ।

तद्यथा—

[1]अक्षरसममङ्गसमं तालयतिसमं ग्रहसमं च ।
न्यासोपन्याससम पाणिसम चैव विज्ञेयम् ॥ १२१ ॥
यद्वृत्तन्तु भवेद्वाद्य गुरुलघ्वक्षरान्वितम् ।
[1]तद्वृत्त तु भवेद्वाद्य तदक्षरसम स्मृतम् ॥ १२२ ॥

[5]C om the example [6]K लघुद्रुतलयप्रवृत्तौ C द्रुतलयप्रवृत्तौ [7]C घटमट कटघटमत्थि घटघटद्रुते लघुसंचय । इति संयोगाज्ज्ञेया मृदङ्गवाद्य प्रयोगज्ञै [8]C om the entire गुरुलघुसंचय [9]C विमकृति 118 (C 108, K XXXIV 122) [1]C सम 119 (C 109a, K XXXIV 123) [1]C °गत भवेत् वाद्यम् [2]K गेयचैव वाद्यम् [3]K न भवेद्वाद्य. [4]C om 119b 120 (C 109b, K XXXIV 124a 125a) [1]C बहुगतम नैककरणाश्रय सुपर्युपरिपाणि समवेति विज्ञेयम् [2]C om 120b 121 (K XXXIV 125b, 126) [1]C om 121 122 (C 110, K XXXIV 127) [1]C वद्वृत्त

ध्रुवाणां [1]ग्रहमोक्षेषु [2]कालान्तरकलासु च ।
[3]यदङ्गत्रिगतं वाद्यं तदङ्गसममुच्यते ॥ १२३ ॥
[1]यच्छरीरं भवेद् गानं कलाकालप्रमाणतः ।
[2]तत् प्रमाणं तु [3]यद्वाद्यं तद् वै तालसमं भवेत् ॥ १२४ ॥
स्थिते मध्ये द्रुते वापि लये गानं च यद् भवेत् ।
तथैव यद्भवेद् वाद्यं तद्वै लयसमं भवेत्[1] ॥ १२५ ॥
समा स्रोतोगता वापि गोपुच्छा च यतिर्यथा ।
[1]यत्तथाहि भवेद् वाद्यं तद्वै यतिसमं भवेत् ॥ १२६ ॥
[1]ततावनद्धवंशानामेकश्रुतिकृतोऽपि च ।
ग्रहो [ग]तेन सहितस्तद् वै ग्रहसमं भवेत् ॥ १२७ ॥
[1]न्यासोपन्यासयोगस्तु स्वराणां हि यथा भवेत् ।
[2]वंशवीणोद्भवं वाद्यं न्यासोपन्याससमं तु ॥ १२८ ॥
[1]समपाण्यर्धपाणिस्थं [2]तथैवोपरिपाणिगम् ।
[3]गीतानुगतञ्च यद्वाद्यं स्मृतं पाणिसमं तु तत् ॥ १२९ ॥

अष्टादशजातिकमिति यदुक्तं तदनुव्याख्यास्यामः । [5]तद् यथा शुद्धा एकरूपा देशानुरूपा देशादपेतरूपा पर्याया विष्कम्भा पर्यस्ता सरम्भा पार्ष्णिसमस्ता दुष्करकरणा ऊर्ध्वगोष्ठिका उच्चितिका एववाद्या मृदङ्गपणवा अवकीर्णा अर्धावकीर्णा सप्लुता विधूतम् इति । एतासां [6]जातीनां लक्षणनिदर्शनान्यभिव्या-[7]ख्यास्यामः ।

[1]एकाक्षरं द्व्यक्षरं वा यद् वाद्यं सर्वकार्मिकम् ।
नित्यं करणयोगेन सा शुद्धा नामतो यथा ॥ १३० ॥

123 (C 111, K XXXIV 128) [1]C ग्रह० [2]C कलान्तर० [3]C यदङ्ग क्रियते
124 (C 112, K XXXIV 129) [1]C यतप्रमाण [2]C यतप्रमाण [3]C यद्वाक्य K तद्वाद्य 125 (K XXXIV 130) [1]C om 125 126 (C 113 K XXXIV 131) [1]C यद्विपन्तु 127 (K XXXIV 132) [1]C om 127 128 (C 114, K XXXIV 133) [1]K ०योग तु वतीशाया भवेद् यथा [2]C वशवेणोद्भवं [3]C तथा K न्यासोपन्यासज (तु तत) 129 (C 115 K XXXIV 134) [1]C समपाण्यपपाण्योक्तं [2]C ०पाणिजम् [3]K गीतवाद्यानुग ज्ञेय [4]C om K तदाद्य(यद्या) [5]K शुद्धा पुष्करकरणा विषमा विष्कम्भितैकरूपा वा । पार्ष्णिसमा पर्याया समविषमलती विकीर्णा च ॥ १२५ ॥ पर्यन्तस्थानी चितिका सयुक्ता सप्लुता महारम्भा । विगतक्रमा विगलिता वञ्चितिकानेकवाद्या च ॥ १२६ ॥ [6]K om जातीनां [7]C लक्षण 130 (C 116 K XXXIV 137) [1]K एकाक्षर कृत वाद्य यद्भवेत्

[1]खोखोखं[खखं]कामेभिर्जात्यक्षरैः समायुक्ता ।
सा शुद्धा विज्ञेया [2]मध्यो[त्तम]स्त्रीणां भवेज्जाति[3] ॥ १३१ ॥

[1]गोमु[खो]मङ्गितालिसो [2]वितस्त चाश्रिता यदा ।
धारयन्ति [3]तथैकैकम् एकरूपा हि सा यथा[4] ॥ १३२ ॥

द्रोड् घोड् द्रोड् घोड् घेघेड् अङ्गितमार्गाक्षरै. समायुक्ता ।
सा त्वेकरूपा जाति[1]नॄणां गीतविधानतः कार्या[2] ॥ १३३ ॥

सर्वास्वपि प्रकृतिषु प्रयोज्या सा स्थिता यद् द्रुता वापि ।
देशकालमवस्थां [च] ज्ञात्वा मध्येऽपि विनियोज्या ॥ १३४ ॥

[1]सर्वातोद्यानि यत्रैकं करणं भावयन्ति [2]हि ।
मृदङ्गवाद्यानुगमादेकरूपा तु सा स्मृता ॥ १३५ ॥

[1]अङ्गितमार्गविभक्ता सम्भोगकृते भवति [हि] शृङ्गारे ।
देशानुरूपा जाति. स्थितिलययुक्ता च कर्तव्या ॥ १३६ ॥

यथा— [1]भीमत्यित्थमभूत्थिकिमा यभिर्जात्यक्षरैः समायुक्ता ।
देशानुरूपा जाति[1] शृङ्गारे [2]चोत्तमे स्त्रीणाम् ॥ १३७ ॥

[1]धामोर्ध्वकमवृत्तयोधा क्षिप्रापकृष्टलययुक्ता ।
देशादपेतरूपा करुणरसे सा भवेज्जाति ॥ १३८ ॥

यथा— घेद्रड् घेद्राड् गेगेमेभिर्जात्यक्षरैः समायुक्ता ।
देशादपेतरूपा सा कार्या वाद्ययोगेषु ॥ १३९ ॥

[1]पर्यंघगच्छति पूर्वं यस्मिन् वै प्रस्तुतं करणजातम् ।
[2]त्रिविधेऽपि च लययोगे पर्याया नाम सा जातिः ॥ १४० ॥

यथा— [1]घोद्राड् घेदेड् गुड्घोड् प्राया धामोर्ध्वकधामहस्तसभार[1] ।
पर्यायकृता जातिर्घोराद्भुतरौद्रयोगेषु ॥ १४१ ॥

131 (C 117, K XXXIV 136) [1]K चञ्च इद खो खो चकादि दा विस्तितका [2]KC मध्यमोत्त 132 (C 118) [1]C गोमम्‌ङ्गितालिसो M गोमुमङ्गितालिसो [2]C वितस्त M वितस्त [3]C धवि [4]C तथैकक [5]K om 132 133 (C 119) [1]M नृणामेव विधानत. [2]K om 133 134 (C 120) [1]K om 134 135 (C 121) [1]K om 135 [2]C om हि 136 (C 122) [1]K om 136 137 (C 123) [1]K om 137 [2]M चोत्तरे 138 (C 124) [1]K om 138 [2]C. क्षिप्र° [3]C. रूपदेशादपेत° 139 (C 125) [1]K om 139 140 (C 126, XXXIV 147) [1]C पूर्वं यस्मिन् त्रिविधेषु करणजातम् [2]K त्रिविधे लयेषु दोषा पर्यंवसान तु सा जाति. । 141 (C 127) [1]K om 141

[1]गुरुयुग्म लघुयुग्म तथैव लघुगुरूणि चैव लघुश्चैव ।
यथा सिड् माड् घटघेन्द्रगुदुघेड्[घेड्]घमथिमेत्थम् ॥ १४२ ॥
[1]विष्कम्भा [नाम]जाति शृङ्गारे चोत्तमस्त्रीणाम् ।
एकैकाक्षर[क्रर-]णयोगाद्याद्य सर्वमार्गसंयुतम् ।
पर्यस्ता[च जाति समहस्ता विचारसंयुक्ता ॥ १४३ ॥
[1]आकाशे [2]रथविमानपिविद्याधरभुजङ्गमादीनाम् ।
[3][रथ]रिते गतिविन्यासे धारायाञ्चैव पर्यस्ता ॥ १४४ ॥
[1]स्थितलयगतिविन्यासे शृङ्गारे भवेत् योत्तमप्रकृतौ ।
[2]पर्यस्ता जातिर्वै साधमपुरुषेषु कर्तव्या ॥ १४५ ॥
यथा— गेड् ताड् घोह्लाभेभिर्जात्यक्षरै समयुक्ता ।
अधमस्त्रीणां योज्या संरम्भा नाम वै जाति ॥ १४६ ॥
[1]अर्धपाणिकरणयुक्त शाङ्गी मध्यलयेन यत्तुल्यम् ।
[2]संरम्भ तद् विद्याद् अन्ते चापि द्रुत यस्य भवति ॥ १४७ ॥

यथा—मगठ कुयुथकिम् × × × ×
[1]ऊर्ध्वाङ्कदक्षिणमुखे क्षिप्ता प्रहता वितस्तमार्गे तु ।
पार्ष्णिसमस्ता जाति कार्या शृङ्गारहास्यगतौ ॥ १४८ ॥
यथा— तत्थि कट मच्छिकरणैः सपार्ष्णिनिष्पीडै ।
धोन्द्राड गुघेड् ग्धिताड् पार्ष्णिसमस्ता पुनर्जाति ॥
[1]धीरोत्तम पुरुषाणामन्येषां दानवादीनाम् ॥ १४९ ॥
[1]स्वस्तिकहस्तविचारा [2]सर्वमृदङ्गप्रहारसंयुक्ताः ।
सा त्रिलयवाद्ययुक्ता दुष्करकरणा भवेज्जाति ॥ १५० ॥
यथा— दुण दुणु दुणा किक धिमघेड् घोटेड् मदत्थिदुघकिटिघेड् ।
एभिर्जात्यक्षरयोगे दुष्करकरणा जाति ॥ १५१ ॥

142 (C 128 129a) [1]K om 142 143 (C 129b-130) [1]K om 143 [2]C एकैकाक्षरयोगयाद्य 144 (C 131) [1]K om 144 [2]C °विमानरथि [3]C चरिते 145 (C 135) [1]K om 145 [2]धीरोत्तम belongs to C 137a 146 (C 132) [1]K om 146 147 (C 136, K XXXIV 151b-152b) [1]C चरपाणिकरणयुक्ता [2]K सदारम्भा 148 (C 133) [1]C ऊर्ध्वाङ्कदक्षिण मुखे 149 (C 134, 137a) [1]Occurs in C 135b [2]Occurs in C 137a 150 (C 137b 138a) [1]C स्वस्तिक M स्वस्तिक° [2]C सर्वमृदङ्ग° 151 (C 139b 139a)

दैत्येन्द्रभुजगराक्षसपिशाचगन्धर्वगुह्यकादीनाम् ।
गतिविन्यासे कार्या दुष्करकरणा भवेज्जाति ॥ १५२ ॥
[1]ऊर्ध्वाङ्कदक्षिणमुखोत्क्षिप्तप्रहता [2]वितस्तमार्गा च ।
[3]अङ्कोर्ध्वकप्रवृत्ता दक्षिणवामप्रहारा च ॥ १५३ ॥
[1]प्रायेणोद्धतवाद्या [2]वितस्तमार्गाश्रया तु दिव्यानाम् ।
[3]अधिधृड् धृड् प्राया जातिरियमूर्ध्वगोष्टिका स्यात् ॥ १५४ ॥
सर्वमार्गे समुद्धृत्य [1]यद्दु वाद्यकरणं भवेत् ।
उच्चितिकां विजानीयात् गृढश्रृङ्खलिकाकृताम् ॥ १५५ ॥
यथा— फेन्ताफेन्ताङ्कदिताम् एभिर्जात्यक्षरैः समायुक्ता ।
राज्ञा स्वभावगमने जाति कार्या [1][उच्चितिका तु ] ॥ १५६ ॥
गोमुख्यक्षरसहिता [1]सर्वमृदङ्गप्रहारसंयुक्ता ।
कुहकाभिनये योज्या वै[ड]म्बिकदण्डलिङ्गे [2]तु ॥ १५७ ॥
[1]तेण्टाण्टादो ताधिता घेड् घेड् घटत्थि घटडड्गे ।
एभिस्त्वक्षरयोगैरेववाद्या भवेज्जाति ॥ १५८ ॥
वामनविह्वलखञ्जस्य [1]पाङ्ग्ये(?)चाज्ञान्याहतपादाम् ।
एवंवाद्या जातिरेषा गमने तु कर्तव्या ॥ १५९ ॥
पृथिवी(?) वादित यत्र [स]र्वतोऽन्येषु दृश्य[ते] ।
[1]मृदङ्गपणवा[नाम] सा जाति सार्वमञ्चिकी ॥ १६० ॥
यथा— घ्रों घ्रों टें टें एभिर्जात्यक्षरैः समायुक्ता ।
[1]मृदङ्गपणवा एषा लीणा जातिरवकीर्णा तु ॥ १६१ ॥
[1]यत्राद्य विगुणैर्वाद्यकरणैर्मृदङ्गानाम् ।
दर्दुरपणवोपगमाद्[2]वकीर्णा नाम सा जाति ॥ १६२ ॥

152 (C 139b 140a) 153 (C 140b 141a, K XXXIV 153) [1]C ऊर्ध्वाग° [2]K वितस्तक्रमा नाम [3]C अङ्कोर्ध्वप्रवृत्ता दक्षिणवामप्रहता च 154 (C 141bc K XXXIV 154a) [1]C प्रायेणाम्भमार्गे [2]K वितस्तामार्गोद्देश [3]CM (अधि M) धृड् प्रायाजातिरियम् ऊर्ध्वगोष्ठा (का M) स्यात् K धट्टा धट्टा घा (आ)विविंशतक्रमा नाम 155 (C 142) [1]C यद्वाद्य 156 (C 143) [1]C विनम्रितका 157 (C 144) [1]C °मृदङ्गप्रकार° [2]C वैडम्बिक 158 (C 145) [1]C घण्टाधातोदकीतिदोक धेड् प्रणधि घगडड्गे 159 (C 146) 160 (C 147) [1]C मृदङ्गपणवाकीर्णा 161 (C 148) [1]C मृदङ्गपणवा क्षेवा M मृदङ्गपणवानां नाम क्षोणा एषा जातिरवकीर्णा 162 (C 149, K XXXIV 146) [1]K यत्रकीर्णं यदि गुणैर्वाद्य करणं मृदङ्गानाम् । पणवेऽनु दर्दुरपक्ष अवकीर्णा नाम सा जाति [2]C °माद् वकीर्णा

यथा — केन्तां केन्ता [1]केन्ता एभिर्जात्यक्षरैस्तु सयुक्ता ।
गोसुखमार्गे जाति सा चैवगुणा विधातव्या ॥ १६३ ॥
अर्ध[प्र]कीर्णविधैः करणैरिह मार्गयोगलघुयुक्तैः ।
दर्दुरपणवमृदङ्गै रर्थार्थं वादने कार्यम् ॥ १६४ ॥
थड गद्गेण्डा सेन्द्रामेभिर्जात्यक्षरैस्तु संयुक्ता ।
सङ्गयमिति विज्ञेया कर्तव्या वा नरे (?) करणे ॥ १६५ ॥
सर्वाङ्गुलिचलनकृता सर्वमृदङ्गप्रहारसयुक्ता ।
भोतागतिनभोगत्यो [1]सङ्गयजातिर्विधातव्या ॥ १६६ ॥
विव्यैर्नानाकरणैश्चित्रैर्मृदङ्गप्रहारसयुक्तैः ।
स्वाभाविकोत्तमगतौ विधृतजातिर्विधातव्या ॥ १६७ ॥
यथा—दरिगे गुदुघेट् तित्थि झाम डत्थि कण कुक्तां ।
[1]एभि स्वरसयोगैर्विधृतजातिर्विधातव्या ॥ १६८ ॥
एता गतिप्रचारेषु विज्ञेया जातयो बुधैः ।
याश्च नोक्ता मया चास्मिन् ता ग्राह्या लोकतोऽर्थत ॥ १६९ ॥
एवमेतेन विधिना कर्तव्य वादन बुधैः ।
[1]गतिप्रचारे गीते च दशरूपे विशेषत ॥ १७० ॥
[1]नपरूपविधाने च छन्दस्यासारितके च ।
तत्त्व चानुगत चैव तथौघो वाद्यमिष्यते ॥ १७१ ॥
वाद्यं गुर्वक्षरकृत तथाल्पाक्षरमेव च ।
गतिप्रचारे कर्तव्य गाने [1]साम्यमिहेच्छता ॥ १७२ ॥
तत्त्व चानुगतं चव [1]ओघश्चापि कदाचन ।
राग ललितभावत्वाद् योज्य वाद्य स्वभावजम् ॥ १७३ ॥
तस्य तु प्रथमे गाने द्वितीयेऽनुगत भवेत् ।
तृतीये त्वोघसंज्ञ तु वाद्यं [1]गतिपरिक्रमे ॥ १७४ ॥

163 (C 150) [1]C om केन्त 164 (C 151) 165 (C 152) 166 (K XXXIV, 150b 151a) 167 (C 153) 168 (C 154) [1]C add एभिर्जात्यक्षरैःसमायुक्ता after गुदुघेङ् 169 (C 155) [1]C योज्या 170 (C 156, [1]K °विधानेन K XXXIV 158) [1]K गतिप्रचारगाने 171 (C 157a K XXXIV 159) [2]K छन्दक्यासारितेषु च C छन्द सारितकेषु [3]C तथौघ करणाश्रया 172 (C 157b-158a, K XXXIV 160) [1]C सौम्यार्थदर्शनात 173 (C 158b 159a K XXXIV 161) [1]C तथौघ करणाश्रय [2]K ललितगानेथ 174 C (159b-160a, K XXXIV 162) [1]C गतिपराक्रमे

शेषाणां ¹छन्दतश्चित्रं ध्रुवाणां संप्रयोजयेत् ।
अथ स्थितापकृष्टानां वाद्यञ्चानुगतं भवेत् ॥ १७५ ॥
प्रावेशिकीनां कर्तव्यं ¹लयश्चानुगतं तथा ।
²नैष्क्रामिक्यन्तरगतं कार्यं विलम्बितादितम् ॥ १७६ ॥
द्रुतं ¹प्रासादिकीनाञ्च ध्रुवा पञ्चविधा भवेत् ।
एवं ध्रुवाणां कर्तव्यं वाद्यं प्रकरणाश्रयम् ॥ १७७ ॥
यो मार्गाशाविकल्पस्तु ध्रुवापादे भवेदिह ।
स तु भाण्डेन कर्तव्यस्तज्ज्ञैर्गतिपरिक्रमः ॥ १७८ ॥
एवं गतिप्रचारेषु वाद्यं योज्यं प्रयोक्तृभिः ।
अत ऊर्ध्वं प्रवक्ष्यामि प्रहारान् भाण्डसमाश्रयान् ॥ १७९ ॥
शम्यातालप्रहाः केचित् [तथा च तर्जनीप्रहाः] ।
तथाकाशप्रहाः पुनः [प्रदेशिन्या प्रहाऽपराः]
तत्र शम्याप्रहा ज्ञेया नित्यं दक्षिणपुष्करे ॥ १८० ॥
वामोर्ध्वके प्रहाश्चापि ज्ञेयास्तालप्रहा बुधैः ।
तर्जनीप्रहका नित्यमालिङ्ग्ये परिकीर्तिताः ॥ १८१ ॥
अथाकाशप्रहः प्रोक्तो निष्क्रामे वा प्रयोजितः ।
आसारिता नित्यशम्या द्वितालास्तु ध्रुवाङ्गजाः ॥ १८२ ॥
स्वरश्च न प्रहं यानं तत्र स्यात्तर्जनीप्रहाः ।
दीर्घकश्चोद्धता चैव प्रदेशिन्या प्रहाः स्मृताः ॥ १८३ ॥
नर्कुटस्याङ्गिनाश्च प्रासादिक्यास्तथैव च ।
सन्निपातप्रहा ज्ञेयास्तथैवैककलो विधिः ॥ १८४ ॥
आकाशप्रहका ज्ञेयाश्चतुर्द्विकलयोगजाः ।
तथा चाङ्गनिबन्धानि गीतकानि यथाक्रमम् ॥ १८५ ॥
एवमेते बुधैर्ज्ञेयाः प्रहा भाण्डसमाश्रयाः ।
ताण्डवे सुकुमारे च वाद्यं ¹वक्ष्याम्यतः परम् ॥ १८६ ॥

175 (C. 160b-161a, K. XXXIV 163a) ¹C छन्दश्चित्र   176 (C. 161b-162a ; K. XXXIV 163b-164a) ¹K लय (च) स्तु तथा   ²K. नैष्क्रामिक्यन्तर   177 (C. 162bc) ¹C एक   178 (C. 163 K. XXXIV 164b)   179 (C. 164 ; K. XXXIV 165a)   180 (C. 165)   181 (C. 166)   182 (C. 167)   183 (C. 168)   184 (C. 169)   185 (C. 170)   186 (C. 171 ; K. XXXIV 165b) ¹K वाद्यानि तथा.

[1]अभाण्डमे[क] गानस्य परिघर्त प्रयोजयेत् ।
तस्यान्ते [2]सन्निपातस्तु कार्यो [3]भाण्डम[द्दे] बुधैः ॥ १८७ ॥
अथवा [1]नृत्तशोभार्थमङ्गाना परिवर्तनम् ।
[2]गीतकस्य प्रकर्तव्यं लयस्य च निवर्तनम् ॥ १८८ ॥
[1]यत्राभिनेयमङ्गं तु [2]न वाद्यं तत्र [3]योजयेत् ।
यत्राङ्गहारनृत्तं तु तत्र वाद्य प्रयोजयेत् ॥ १८९ ॥
[1]यत्र गीतिवशादङ्गं भूयो भूयो निवर्तते ।
[2]तत्राद्यमभिनेय तु शेष नृत्तेन योजयेत ॥ १९० ॥
यद्वृत्त तु पद गाने तादृशं वाद्यमिष्यते ।
[1]गीतवाद्यप्रमाणेण कुर्यादङ्गविचेष्टितम् ॥ १९१ ॥
[1]वाद्यं गुर्वक्षरकृत [2]तथाल्पाक्षरयोजितम् ।
[3]मुखोपवहने कार्यं प्रकृष्टं वर्णतस्तथा ॥ १९२ ॥
स्थिते [1]स्वल्पप्रहार तु [2]मध्येऽक्षरसमं तथा ।
कार्यं तु गीतके [3]वाद्य द्रुते चोपरिपाणिकम् ॥ १९३ ॥
[1]सम रक्तं विभक्त च स्फुट [2]शुद्धप्रहारजम् ।
नृत्ताङ्गग्राहि [3]लयस्थैर्वाद्यं कार्यं तु ताण्डवे ॥ १९४ ॥
सनृत्तेषु प्रयोगेषु तत्त्व ह्यनुगतं तथा ।
अनृत्तेषु प्रयोगेषु तत्त्वमोघ क्रमेण तु ॥ १९५ ॥
स्थिते मध्ये द्रुते चापि यथा गाने तु वादयेत् ।
पदनृत्ताङ्गहारे तु तेनैव प्रक्रमेण तु ॥ १९६ ॥
[1]यो विधिर्गानवाद्याना पदाक्षरलयान्वित ।
स तु नृत्ताङ्गहारेषु कर्तव्यो नाट्ययोगत ॥ १९७ ॥

187 (C 172, K XXXIV 166) [1]C अभाण्डमेक° K अभाण्डमेव [2]K सान्निपातं च 188 (C 173, K XXXIV 167) [1]C °र्थमङ्गाङ परिवर्तनम [2]KC °गीतस्य, [3]KC °वृद्धि N द्धितकस्य 189 (C 174, K XXXIV 168a) [1]K °मङ्गे [2]N adds न [3]KC प्रयो°, 190 (C 175, K XXXIV 168b 169a) [1]C यदा गीतिवशा°, K यत्रपादि° [2]K तत्रार्थेऽभिनेयस्तु 191 (C 176, K XXXIV 169b 170a) [1]K गानवाद्य° 192 (C 177, K XXXIV 170b 171a) [1]K यदा for वाद्य [2]K °चरमेव च [3]C मुखोपवहन 193 (C 178, K XXXIV 171b 172a) [1]K यद for स्वल्प [2]C मध्याक्षर° [3]C वाद्ये 194 (C 179, K XXXIV 172b 173a) [1]K समरक्त [2]C °प्रयोगजम् [3]C लोकार्थे वाद्य योज्य 195 (C 180, K XXXIV 173bc) 196 (C 181) 197 (C 182, K XXXIV 174) [1]K यो विधि र्गानवाद्याना

एतास्तु जातयो प्रोक्ता दश चाष्टौ च भाण्डजा[1] ।
अत ऊर्ध्वं प्रवक्ष्यामि [2]प्रकारान् वाद्यसंश्रयान् ॥ १९८ ॥

अथ प्रकाराः

चित्र: समः विभक्त छिन्नः छिन्नविद्धः [ विद्ध ] अनुविद्धः स्वरूपानुगतः अनुसृत [अनुसृतविच्युत] दुर्ग अवकीर्णः अर्धावकीर्ण. एकरूप परिक्षिप्त साचीकृत समलेख चित्रलेख सर्वसमवायः दृढ इति । तत्र

[1]निर्वर्तितादिभि प्रयुक्तं चित्रे करणैरनेकविधहस्तै. ।
[2]त्रिलय त्रिपाणियुक्त चित्र वाद्यं बुधैर्ज्ञेयम् ॥ १९९ ॥
दर्दरपणवमृदङ्गै र्नानाकरणैस्तु य समनुजात[1] ।
[2]तालाङ्कवंशानुयुक्तः स तु विज्ञेयः समो नाम ॥ २०० ॥
[1]नात्यायतश्च [2]य स्यात् [3]संस्थानत. [4]सम[श्च] विभक्तश्च ।
अक्षरपाणिलयेषु च विभक्तकरणे विभक्तस्तु ॥ २०१ ॥
[1]वाद्य द्रुतलय यत्र सहसा च निवर्तते ।
[2]सर्वातोद्येषु भिन्नेषु प्रकारश्छिन्न एव स ॥ २०२ ॥
[1]अवपाणिर्मृदङ्गानां [2]पणवोपरिपाणिश्च ।
[3]भवति यत्र वाद्ये तु छिन्नविद्ध इति स्मृतः ॥ २०३ ॥
[1]मृदङ्गकरणैर्वाद्य [2]पणवा वादयन्ति चेत् ।
[3]सूचीवेधैर्विचित्रैस्तु करणैर्विद्ध एव स ॥ २०४ ॥
विद्धानुविद्ध तु [1]रुद्र वाद्यं सर्वातोद्येषु दृश्यते ।
[2]परस्परानुवेधाच्च [3]अनुविद्धस्तु संस्मृत ॥ २०५ ॥

198 (C 183, K XXXIV 175) [1]K वीटकान. [2]K om 199 (C 184, K XXXIV 176) [1]M विविर्तितादिभि K विभितीजातती विवी नानाकरणभूषित. [2]K मध्यमकरणैर्व विमार्गविलयसभव 200 (C 185, K XXXIV 177) [1]K °रणै सम समनुजातः C °रणैस्तु य सम्यक् [2]M समयति ताकाङ्गयुक्त 201 (C 186, K XXXIV 178) [1]K नात्यायत° [2]M om य स्यात् [3]M सस्थानसमविभक्तश्च [4]C श्च, K om स 202 (C 187, K XXXIV 179) [1]C वाद्य तु विलय यत्र सहसा च विवर्तते K वाद्य द्रुत लय यत्र सहसा न निवर्तते [2]K, सर्वातोद्येषु C सर्वोतोद्ये प्रवृत्त तु 203 (C 188, K XXXIV 180) [1]K यत्रपाणि मृदङ्गेषु [2]K वोपरिपाणिक [3]C भवती K यदा भवति वाद्येषु छिन्नविद्धस्तु स भवेत् 204 (C 189, K XXXIV 182) [1]C मृदङ्गकरण वाद्य पणवो वेधयेद यदि [2]K सूचीविद्धैविधैर्मुखकरणैर्विद्ध उच्यते 205 (C 190, K XXXIV 181) [1]C यद्वाद्यं. [2]K परस्परानुबोधश्च C परस्परविरोधे तु [3]K सानुविद्ध

[1]विशुद्धवाद्यप्रकृति समपाणिकृतस्तथा ।
[2]स्वरूपानुगतश्चैव स्वरूप इति स स्मृत ॥ २०६ ॥
[1]मुरजं पणवो वापि [2]पणव दर्दरोऽपि वा ।
[3]यदानुयायादातोद्य स्वरूपानुगतस्तु स० ॥ २०७ ॥
[1]अनुगम्य तदातोद्य [2]गच्छेद्धि सलय पुन ।
[3]श्रुतवत्समतावाद्ये [4]तदानुसृत उच्यते ॥ २०८ ॥
पकैकानुगत वाद्य वाद्यजातिसमन्वितम् ।
कृत्वान्यजातिक कुर्यात् तदानुसृतविच्युत ॥ २०९ ॥
[1]यत्तु प्रचारविषमं [2]सर्वमार्गप्रबोधनम् ।
अविभक्ताक्षरकृत तद् दुर्गं वाद्य उच्यते ॥ २१० ॥
[1]समवृत्ते मृदङ्गास्तु वाद्यन्ते पणवैर्यदि ।[2]
[3]नानाविचित्रकरणैरयकीर्णस्तदा स्मृत ॥ २११ ॥
द्रुतं लय समारुह्य पणवो दर्दरोऽपि वा ।
[1]अवपाणौ यदास्यातामर्धकीर्णा तु सा तदा[2] ॥ २१२ ॥
सर्वातोद्यानि यत्रैक [1]करण [2]भावयन्ति च ।
[3]समवृत्तपदान्येव [4]एकरूप इति स्मृतम् ॥ २१३ ॥
[1]पणवैरुद्धादितं यत्र वाद्यमल्प मृदङ्गजम् ।
[2]अविभक्ताक्षरपदं परिक्षिप्तस्तु स स्मृत [3] ॥ २१४ ॥
चित्र हि करण यत्र [1]वाद्यं नैकेन वाद्यते ।
[2]नृत्ताङ्गहारानुगत ज्ञेय साचीकृतस्तु तत् ॥ २१५ ॥

206 (C 191 K XXXIV 183) [1]C विग्रह [2]K °गत विद्ध विद्धि य वाद्यसंश्रय 207 (C 192, K XXXIV 184) [1]C मुरवान [2]C पणवो दर्दुरो [3]C तथानुयाया° K अनुयाति यदा वाद्य भवेदनुश्रितस्तु स 208 (C 193 K XXXIV 185) [1]C अनुगम्य [2]K गच्छेद्दिसलय C गच्छेत यत् समत्र पुन [3]K श्रुवतसमवादेषु [4]K तदा स्यात् प्रतिविच्युत 209 (C 194) 210 (C 195, K XXXIV 186) [1]K वाद्यम°. [2]K °मार्गप्रयेतन 211 (C 196 K XXXIV 197) [1]C समवृत्ते मृदङ्गस्तु वाद्यते K समवृत्तास्तु मुरजाच्छेदास्ते [2]K पणवैर्यदि [3]K नानाविचित्रै 212 (C 197, K XXXIV 188) [1]K अर्धपाणौ. C अवसानोऽपि यत्र स्याद° [3]K तदा त्वर्धावकीर्णक 213 (C 198 K. XXXIV 190) [1]C कारण [2]K भावयते तत [3]K °नोत्तम् [4]C एककरमि° K एकरूप उदाहृतम् 214 (C 199, K XXXIV 189, 191) [1]C पणवैश्चोदित [2]C सुविभक्त [3]K adds प्रयान्तनियमोपेत स्फुट नाद्य समन्वित । न प्रयाति च गीत च स च्छेयो नियमान्वित 215 (C 200, K XXXIV 192) [1]C पदैर्नैकेन [2]K नृत्ताङ्गहारा°

कृत्वोपरिगत वाद्य पणवो दर्दरोऽपि हि ।
[1]यत्रोद्वीक्षते मुरजान् [2]समुल्लेखस्तु स स्मृत ॥ २१६ ॥
चित्रं बहुविधं वाद्यं मृदङ्गपणवादिभि ।
क्रियते यत्र संवद्धैश्चित्रलेख· स उच्यते ॥ २१७ ॥
[1]सर्वमार्गगतो यस्तु [2]सर्वपाणिलयाश्रय ।
विचित्रश्च विभक्तश्च स [3]सर्वसमवायक ॥ २१८ ॥
यस्तु मध्यलयोपेत समः सुविहिताक्षर· ।
[1]गतिप्रचारविहित प्रकारो दृढ एव स ॥ २१९ ॥
एवमेते प्रकारास्तु कर्तव्या वाद्यसश्रया ।
गतिप्रचारे गेये च [1]रसभावौ समीक्ष्य तु ॥ २२० ॥
[1]प्रकारा जातयश्चैव सर्वमार्गेषु संस्थिता· ।
ये वै गतिप्रचारेषु शुद्धास्ते केवला· स्मृताः ॥ २२१ ॥

[2]एतेषां प्रयोगमिदानीं वक्ष्यामि । [3]तत्रोपविष्ट प्राङ्मुखो रङ्गे [4]कुतपविनिवेश कर्तव्यः । तत्र पूर्वोक्तयो [5]नैपथ्यगृहद्वारयोर्मध्ये कुतपविन्यास । [6]तत्र रङ्गाभिमुखो [7]मौरजिक ( मार्दङ्गिक ) तस्य [ दक्षिणतः ] पाणविको, दार्दरिको वामत· । एव प्रथममघनद्धकुतपविन्यास उक्त । तत्रोत्तराभिमुखो गायन, गायनस्य वामपार्श्वे वैणिक, तस्य दक्षिणे वशवादकौ । गातुरभिमुखा गायिका इति कुतपविन्यास· । [8]मार्दङ्गिकपाणविकदार्दरिकेषु गायकगायिका वंशिकवैणिकसहितेषु अशिथिलायततन्त्रीवद्धास्तमितेषु आतोद्ये षु यथाग्रामरागमूर्च्छनामार्जनानुलिप्तेषु मृदङ्गेषु (उद्) धारया निपीडितनिगृहीतार्धनिगृहीतमुक्तप्रहारकृतेषु [9]दर्दरवादनमुख्यविन्यस्तहस्तै वादनकैर्दैवतानामावाहनविसर्जनार्थं प्रथममेव त्रिसाम कर्तव्यम् । स तु [10]सर्वसचराचरोत्पत्तिस्थितिप्रलयकर्तुर्ब्रह्मणो [11]मुखाभि-

216 (C 201, K XXXIV 193) [1]K यथाग्निमुत्तर यत्र [2]K समुल्लेख प्रकीर्तित
217 (K XXXIV 194) 218 (C 202, K XXXIV 195) [1]C सर्वमार्गकृती
[2]K °लयाश्रित [3]K समवायकृतम्तु स 219 (C 203, K XXXIV 196)
[1]K गतिपूर्णाधविहितप्रकारो 220 (C 204, K. XXXIV 197) [1]K रसभावान् अपेक्ष्य
221 (C 205 and the fol prose, K XXXIV 198 and the fol prose part)
[1]C एते प्रकारा जात्यश्च [2]K तत्र [3]K तत्रोपविष्टे प्राङ मुखे [4]K कुत[प] एव विन्यास
C कुतपविनिवेश [5]K °गृहयो कुतप° [6]C स्वरङ्गाभिमुखो [7]C om from
मौरजिक to गायिका इति कुतपविन्यास, see also note 7 on 227 [8]K om from
मार्दङ्गिक° to दैवतेन च [9]C दर्दुरवाद्यमुख्य° M दर्दुरवादनमुख्य° [10]M
चराचरोत्पत्तिस्थिति °चराचरोऽत्पस्थिति

सकेन प्रथमेन साम्ना वामपार्श्वे चन्द्र सप्रीणयन्ति दक्षिणे पन्नगान् [12]अथान्तरेण जल(जं) [ द्वितीयेन ] साम्ना [13]मुनीन्, आयतेन [तृतीयेन] बृहत्साम्ना [14]दैवतानि च ।

एवं प्रीणयते यस्मात् दैवतानि यथाक्रमम् ।
[1]तस्मात् त्रिसाम्नि विज्ञेय त्रिसामत्व बुधैरिह ॥ २२२ ॥
एव च [श्रु]यते यस्मात् ब्रह्माण केशव शिवम् ।
तस्मादेतत् त्रिसाम तु ऋषिभि परिकीर्तितम् ॥ २२३ ॥
चतुर्णामपि वेदानामादावोङ्कार उच्यते ।
तथात्र सर्वगीताना त्रिसाम परिगीयते ॥ २२४ ॥
त्रिप्रकार त्रिलयक तथा चैवाङ्गिताश्रयम् ।
षट्कलं त्रिकल चैव त्रिसाम परिकीर्तितम् ॥ २२५ ॥
त्रिविधं [चा]क्षरवि[धौ] गुरुलघ्वक्षरान्वित[म्] ।
[3]औकारश्च मकारश्च त्रिकैस्त्रिगुणित भवेत् ॥ २२६ ॥

तस्यैव चान्ते पूर्वरङ्गविधानमनुप्राप्य छन्द समेनाक्षरसमेन च वाद्येन बहिर्गीतविधान तु त्रिलय वर्तनीयम् । [4]तत्र आसारितप्रयोगे च [5]तस्यानुगत वाद्य प्राय- प्रयोक्तव्यम् । [7]यत्र त्रिससप्रत्याहारा[द]वतीर्णकोटिस्तत्रवाद्य प्रवर्तते । [8]तत्रादौ [9]तावद् वामोर्ध्वकप्रहारयुक्त [10]पश्चादालिप्यकविमर्दनं गोपुच्छायतिम् [11]आसाद्य विचित्रकरणयुतं [12]चतुर्मार्ग [13]समार्दङ्गिक सर्वभाण्डिकमपि [14]वाद्य पश्चात् विपञ्चीवाद्यं प्रवर्तयितव्यम् । [15]कस्मात्, पूर्वं हि भाण्डवाद्येन सिद्धिरुत्पादयति ।

[11]M सुखाभिसत्केन C °ऽभिसत्त्वेन [12]C पर्थान्तरेण जलसाम्ना M पथान्तरेण जल [13]C मुनीनायतेन [14]C दैवतेन च 222 226 (C 206 210 and K prose after XXXIV 198) [1]C त्रिसाम [2]C त्रिसामत्व [3]C चकारश्च, K चकार, after कृतपविन्यास see note 7 above K reads this hem and विना दिसे तिस दु ति षष्ठ दुद्रोढ द्वितीय ति ताश्च च दुभितिचतीर्थंपदक्षपूर्वं रङ्गविधानमनुप्राप्य छन्दसमेनाक्षर समेन वाद्येन बहिर्गीतविधानम् अनुवर्तितव्यम् [4]K om तत्र [5]C च सारितम विरोगच [6]C तथानुगत K तस्यानुगतप्रादेयाद्य विधातव्यम् [7]C वृत्त वस्तु त्रिसाम्ना च प्रत्याकारोऽत्र वर्तनम् । कौ गीतिश्चाद वाद्य प्रवतते K यत्त्रिसम प्रत्याहार याथानवीर्णकोटिस्तत्र वाद्य प्रवर्तते [8]C यत्रादौ [9]K तावद्वामार्दकप्रहार [10]C °दालिग विमर्दन K पश्चाल्लिप्तकविमर्दनवरणामूच्छा यति [11]C सामाद्य [12]K om चतुर्मार्ग [13]C om समा° to वाद्य [14]K वा: for वाद्य [15]C om up to उत्पादयति

पूर्वं [16]भाण्डेनाभिव्यञ्जितो रङ्गे ध्रुवाविधिः। स्त्रीबालमुर्खाधिकीर्णे रङ्गे [17]कुतूहलजननसमर्थं वाद्यं समुत्पन्नं भवति। अपि च

आचार्याः सममिच्छन्ति [1]पदच्छेदं तु पण्डिताः।
[2]स्त्रियो मधुरमिच्छन्ति विकुष्टमितरे जनाः ॥ २२७ ॥

[3]तस्य चान्ते [4]ताण्डवप्रयोगमधिकृत्य [5]नर्तक्या अवतरणकाले [6]लघुवर्णसञ्चयैर्मार्दङ्गिकैरङ्गुलिप्रचलनप्रायं वाद्यं योज्यम्[7]। [8]नर्तक्यवतरणगीतान्ते [9]सन्निपाता ज्ञेयाः। [10]लास्यनृत्ताङ्गहारानुगतं करणं [भिन्नं] वाद्यं प्रयोज्यम्। [11]करणधातुसयोगजमित्युच्यते समं रक्तमित्यादि। तत इदानीं वामोर्ध्वकप्रहारसंयुक्तम् [12]आलितमार्गदेशकरणसंश्रयं समुत्थापनके वाद्यं योज्यम् [13]यथा—घेड् मति थङ्गया घेड् धिति टित् सं कं कं खोक णे देव्या केत्तां किद् घेड् इति पूर्वरङ्गलयपातनिर्दिष्टप्रयोगसमुत्थापनके वाद्यं योज्यमिति।

[14]तयोः परं यत् परिवर्तनं चतुर्मार्गिकशुद्धजात्याश्रयं [15]यथाप्रोक्तम् खोखोणा खोखोणां खखोखोणा एतद् द्रव्यैर्यद् वाद्यं स्यात्।

पुनस्त्रयो न्यासान् खोखो खोखो खकेणां घश्रयन्तांश्च नपुंसकपादे। यथा—कोनदुखोङ् मार्गे इति [16]चतुर्थकारप्रवेशे च वाद्यम् [[17]अङ्गुलिप्रचलनप्रायम्]।

[18]वस्तूत्थापनके चापकृष्टायामर्धमपि(?) चार्य[ं]ग्रहो यथा—घेघेन्तां घेड्डो घखणाखोणां घेघघेघघे इति।

[19]नान्दी शुष्कापकृष्टायां प्रतिशुष्कं करणं भिन्नं वाद्यं योज्यमिति—[20]यथा थो घो थो खेखघोघेड् णाद्म्यड् खोद्धो कुतां खखेखेणकलुगुकघेड् णोखिखेड्

[16]C °व्यञ्जिते　[17]C कुतूहलमुत्पन्नार्थम्, K कुतूहलजननसमर्थं　227 (C 211, K XXXIV. 199) [1]C पादच्छेद　[2]C सुकुमार स्त्रियश्चैव　[3]K तस्य चान्ते C तत आद्ये,
[4]C °अधिगन्ता°　[5]C om नर्तक्या　[6]C °लघुवर्णमार्दङ्गिकैरङ्गुलिप्रचलनप्राय　[7]After this [illegible] reads समानतराभिमुखो गायकस्य वादयाग्रे वैणिको वैणिकस्य दक्षिणे मार्दङ्गवादक शानुरभिमुखान् गायकान् included in the passage after 231 ll 4 5 above　[8]K नर्तक्या　[9]K सन्निपाते च लास्यमनुवाद्यम्　[10]K तेन लयङ्गहारानुगतं करणं वाद्यं प्रयोज्यम्　[11]K om from here to प्रहारसंयुक्तम्　[12]K चालितमार्गेण जातिकरणाश्रितमुत्थापने वाद्यं प्रयोक्तव्यम्　[13]K omits from here to वाद्यं योज्यमिति　[14]K तत परपरिवर्तनं चतुर्मार्गिकं शुद्धजात्याश्रयं　[15]K om from here to कोन दुखोङ् मार्गे इति　[16]K °प्रवेशे तु　[17]C om अङ्गुलिप्रचलनप्रायमिति　[18]K om from here to घे घ दे इति　[19]K नान्दीशुष्कावकृष्टायां प्रतिशुष्कं करणाश्रितं वाद्यं　[20]K om from here to किटि कति इति

ताड खेड णम् किटि किटि घघेड घेकुटुकधुदुकलवलाखो खोखोघो वाम्र तेटां मालिं एम्मां किटि घत्थि इति ।

[21]रङ्गद्वारप्रवरणे जर्जर[श्लोक]निग[द]ने चार्या [चाड्डितामार्गाश्रितं सन्निपात-ग्रहण प्रयोक्तव्यम्। [22]महाचार्या [23]वितस्तमार्गाश्रिनं [24]वाद्य प्रदेशिन्या ग्रहम [25]अपूर्व तद्वद् पूर्वरङ्गे ताण्डववाद्यम् उक्तम् [26]सन्निपातग्रहो यथा वामकरेण—खो खो णां दो दो दोकु मोकु दहेण णाथो थो णो घोघ टमटथिर्ज घोग्रोकठ कटकखो खोखित कटकटां घटकमत्थि योघो मिथि णां किटि किना खकवल इति ।

आलिप्तमार्गत्निकं (मार्गाश्रित) वाद्यमत परमुदाहार्यम्।

वितस्तमार्गस्थितिक वाद्य प्रदेशिन्या ग्रहो यथा—णणखोकणणो मधुणां खोखोमथि तकितां तघिता किन्ति किता किटि किन्तो खोखो मतिता मत्थिन्नमति तिकिति केन्तां द्रेन्ता मत केन्ता द्रघेतान्द्रा कुन्ता द्रा द्रान्तां किन्नां किन्नां केन्तां सुद्रा घ्रें घ्रें क्ले घ्रं घ्रं द्रामां घट्टे द्रों घेन्द्रा घेन्द्रा घड्ड क्लेड इति ।

पदक्षेपणात् सिद्धेरेतावच्चतुरस्र पूर्वरङ्गविधाने भाण्डवाद्य प्रयोजयेत् । त्र्यस्रे तदेव कालाव्यवहितम्। पुनश्च नाटकादिषु धीरोदात्तधीरोद्धतधीरललित-धीरप्रशान्तानां चतुर्णा नायकाना [27]गतिप्रचारे स्वयावस्थासु निर्गत वाद्यमुपेक्ष्याम । तत्र ग्र घ्रं घ्रं भ्राद्र प्रायो देवाना गतौ प्रयोज्यम्। [28]घेन्ता प्रयोज्य राज्ञाम्। [29]घ्र द्रु घटु घेड घेटट्टिन्थिदुन किटिद्रा [redacted] ना भद्रा प्रायो मध्यमपुरुषेषु वाद्यम्। [30]पुनरेव स्थिताया वाद्यविधानं वक्ष्यामि ।

[1]त्रिकलद्विकलैककला चतुष्कलाश्चैव पादविन्यासा ।
तत्र तु साम्य कार्यं भाण्डेन सम च गानेन ॥ २२८ ॥

[2]पुनश्चावस्थाकृतं वाद्य प्रवक्ष्यामि । त्वरितगमने धं व घे घे टां इत्येव वाद्य प्रयोक्तव्यम्। यथा विषमादिकमङ्गुलिप्रचलनकृतं विहितम्। पण्येव (?)

[21]C om from here to तारु ववाद्यमुक्तम् K प्रवराणाया जजरि निगनेवाद्ये वादितमार्गा-श्रित वाद्य [22]C om महाचार्या [23]C वितस्तिमार्गस्थितिक [24]K om वाद्य [25]C om K पर्वताव पूर्वरङ्गे ताण्ड्व वाद्यमुक्तम् [26]K om from here to चतुर्णां नायकाना गतिप्रचारे [27]K स्वगति प्रचारे वक्ष्याम and then *lacuna* [28]K घेती ध्वती इति प्रियराज्ञ [29]K घ्र इन्द्र घटघन्द्रिकघ किटिजा विशाखा व्यञ्जकमाय मध्यानाम् [30]K एवं स्वस्थावस्थागतिप्रचार विधीयते वाद्यम्। 228 (C 212 K XXXIV 200) [1]K एककला × × × चतुष्कलाश्चैवकादिविन्यासा [2]C om पुनश्च° to वक्ष्यामि

पूर्वं सम्यगुलिखितं त्वङ्गुलिप्रचारेषु। पुनरत्यघस्थायि वाद्यविधानं वक्ष्यामि।

[1]स्वस्थे गतिप्रचारे वाद्यं त्रिकलं चतुष्कलं वापि।
लयगतिविधानं समीक्ष्य तज्ज्ञैः प्रयोक्तव्यम्॥ २२९॥
न ह्येकद्विकला वा ध्रुवाविरामा भवन्ति वाद्येषु।
तस्माद्भाण्डेन [1]च साम्यं [2]कार्यं न गानेन॥ २३०॥
[1]सर्वत्र त्वरितगमनेषु [2]पाता [3]पूर्वोक्ता ये गतिप्रचारेषु।
[4]भ्रड् भ्रड् घेड् घेड् प्रायश्चात्र च वाद्यं प्रयोक्तव्यम्॥ २३१॥
[1]नौरथविमानयाने पक्षिचलाकाशजे[2]ऽङ्गुलिचलनात्।
कार्यं [3]वा चतुष्केऽप्यन्योन्यकराभिहतं च वाद्यम्॥ २३२॥

[4]दुःखार्तिव्यधितेष्टशापक्लेशेष्टजनवियोगविभवनाशवधबन्धव्रतनियमोपपवासादियुक्तेषु [5]पूर्वालिप्तमार्गाश्रितमुत्थापनवाद्य विधातव्यम्। दैत्यदानवयक्षराक्षसमहादीनां [6]धृड् हड् खद संयुक्तं घट्टुतुतन्त तेतोद्रां इत्येवमादिकरणैर्गतिवाद्यं प्रयोजयेत्। [7]खञ्जविकलवामनकुब्जादीनां प्रवृत्तगमनेषु घेतां कटकामिति वाद्य प्रयोक्तव्यम्। [8]यतिमुनिपाशुपतशाक्यादीनां लिङ्गिनां दो खो द्वित्थिरिखि कुगुघोओहृनदोधन्ति कितिकि वाद्यं प्रयोक्तव्यम्। [9]विदूषकनिर्मुण्डोपस्थायकवर्पधरादीनां घे घे त्तानो ण्णो द्रोण्णपणामिति वाद्यम्। पुनश्चैवाथ वृद्धश्रोत्रियकञ्चुकीस्थूलादीनां [10]धां धो धाङ् द्रोङ् धिङ् द्रोणां खो खो णा इति वाद्यं प्रयोक्तव्यम्। [11]गजवाजीखरोष्ट्ररथविमानयानेषु धंकिटि प्रायम्। सर्वत्रोत्तममध्यमाधमेषु पुरुषेष्वित्थं रसान् भावान् भुवि समीक्ष्य वाद्यं प्रयोक्तव्यम्। एवं तावत् पुरुषवाद्यम्।

229 (C 213) [1]See note 30 on 227 above 230 (C 214) [1]C adds म to च [2]M कार्ये, C om it 231 (C 215, K XXXIV prose after 200, 4th line) [1]K om सर्वत्र [2]K भावा [3]C पूर्वकाये M पूर्वाकारे [4]K भ्र भ्र घे घे प्राय तत्र तु वाद्य प्रयोक्तव्य [5]K °चलन कार्यम् 232 (C 216, K as in 231) [1]C नौर विमानयाने K °विमान नेपथ्यानिलाकाशजे [3]C वाद्यनुष्केऽप्य न्योन्यमाश्रित (वाद्यमाश्रित) वाद्यमिति [4]K दुःखादितव्याधितेष्टजनवियोगविभावनारा नियमोपासनादिमयुक्तेषु C °वधबन्धप्राते नियमो° [5]K °पालितमार्गवधोविधातव्यम् [6]K सचन्द्रा चन्द्रा चक्रान्ता घे घेटा प्रायम् [7]K घेटकुसत्वादीनां विटकुखनेत्यादिकम् [8]C om पाशुपत M यतिमुनिपाशुश्रम K यतिपाशुपत शाक्यादीनां घड़ घड़ घे घे प्रायम् [9]K विधकोपस्थापक निर्मुखवयधारादीनां घे घे टा टा चा चा प्रायम् [10]K घो घो खो खो इति प्रायम्, [11]C om from here to इति प्रायम्

स्त्रीणां पुनरपि व्याख्यास्याम । तत्रोत्तमस्त्रीणां दिव्यानां वगति किपि घमेट प्रथि घेइतिप्रायम् । [12]अथ राज्ञीनां कधि कधि मथि दो दो खु खु इति प्रायम् । [13]चं किति किथि घटमट थि थे इति ब्राह्मणीनाम् । अथ [14]मध्यमस्त्रीणां [15]वेश्याशिल्पकारिकाणां [16]नाटकीयानां [17]घ खु खु धिकिटमटियकिण टोणांथो इति । [18]मरथिकुले केडखुलिखि प्राय गीतम[धम]स्त्रीणाम् । एवं तावत् [19]समासादभिहितं स्त्रीणाम् ।

अवस्थान्तरितानां तु त[20] एव पौरुषवाद्यविशेषा भवन्ति । तस्मात् [21]सामान्यतो हि [22]भयक्लेशशोकक्रोधादयो [23]विभावा समुत्पद्यन्ते । तत्र आसामपि [24]रसभावापेक्षं मार्गाश्रित [25]वाद्यं योज्य भवति । अपि च—

[1]जातिमार्गप्रकारैस्तु करणैरक्षरैस्तथा ।
[2]वाद्ययेद्यस्तु संकीर्णं स श्रेष्ठो [3]वादक स्मृत ॥ २३३ ॥

[4]अथान्तरवाद्यानि च अनुबद्धं विप्रहारिक [6]सिद्धिग्रहण परिछिन्नमिति ।

[7]तत्रानुबद्धसंज्ञमन्तरवाद्यं यथा—[8]खो खो णे खे घे इति ।

[9]वाद्यविरामे प्रहारितं यथा—[10]भ्र द्रा खो खो इति ।

[11]सिद्धिरपि च

पेदवर्ये विस्मृते श्रान्ते वस्त्राभरणसयमे ।
[1]सिद्धिर्वाद्यितव्या तु नानाकरणसश्रया ॥ २३४ ॥

सा च [2]सिद्धिर्यथामार्गाश्रया कार्या चित्रकरणा पञ्चपद्कला भवति ।

अपि च—

[1]पाठ्यविरामे वाद्या कर्मसाधनकृते विरामे च ।
[2]वस्त्राभरणनिपाते [3]मुकुटस्य च संयमनकाले ॥ २३५ ॥

[12]C अथ राज्ञा कविषद्दर्गो क खु खु इति [13]C om upto इति ब्राह्मणीनाम् [14]C मध्यमाना [15]K °कारीणा [16]K om [17]K क्रिरित्ता त थ कस्थि मानपि उप किटि किटि प्रायम् [18]C om upto स्त्रीणाम् [19]K सामान्यतो [20]C एत [21]K सामान्य [22]K भयशोकक्रोधादयो हि भावा [23]K भावा भामा [24]K रसभावाभिनयापेच C भ वापेच, [25]K वय भवति 233 (C 217 K XXXIV 201) [1]C प्रचारै [2]C वादयेद्यस्तु सकोर्णे [3]K वाचक [4]C पन्तर्वाद्यानि [5]K पनुबन्धा विप्रहारन [6]C °सिद्धग्रहणम [7]C °बद्धमन्त्रानामन्तरवाद्यम् [8]K धे धे वा वेर कथे इति [9]K पाद्यविरामे प्रहारित [10]K भद्रा खे खे य इति [11]K सिद्धिरपे × × 234 (C 218, K XXXIV 202) [1]C सिद्धिर्वा तव कर्तव्या [2]K °यथा—ममार्गकरणाश्रया कार्या विचित्रकला 235 (C 219, K XXXIV 203) [1]C वाद्यविरामे वाद्य K पाद्य° [2]C वस्त्राहरनिनिपाते [3]C मत्-कुटस्य च, K कुर्याद्धयञ्जने°

[4]अथ परिच्छिन्नं सार्वभाण्डिकं ध्रुवाया ग्रहोपशमे गम्भीरधीरप्रहारमुद्धतं यथा—[5]पञ्चपद्कलञ्च तथोत्तमाना वितस्तमार्गाश्रितं घुं घुं घुं ल्क इति। तथोत्तमस्त्रीणामड्डितवाद्याश्रितं यथा—ण णां खो खो णण्णामिति। अथाधमानां खञ्जनत्कुटविषय यथा—संकेत किटिचिण्णामिति। अवस्थान्तरेषु पुनरेतद्वेवाधर्कृतं भवति।

[6]अथ प्रासादिकीप्रावेशिक्याक्षेपिक्यवकृष्टासु। [7]तत्र प्रासादिक्यां [8]समपाणौ विभक्तकरण वाद्यम्। [9]द्रुतायामुपरिपाणिके चित्रकरणम्। स्थितायां × × × × [10]अड्डितायामवकृष्टायामर्धसन्निपातकृतमिति।

एवमेतत् प्रयोक्तव्यं वाद्यं गतिपरिक्रमे।
प्रासादिक्यां ध्रुवायां च स्वन्तरायां तथैव च॥ २३६॥
अभाण्डमेकं गीतं तु [1]परिवर्त्य प्रयोजयेत्।
सन्निपातावसानेषु भाण्डवाद्यग्रहो भवेत्॥ २३७॥

[2]यथा द्रुतविलम्बितायां चेते लघो प इति। [3]अड्डितायां च ण दे दे दे दे दे खो खो ख इति। अथ नत्कुटखञ्जयोः ण ण्णा वु वु णा णा खो णा ण्णा दे दे दे दे खो खो खो ख इति।

[4]अथोद्घात्यम्—

[1]सम्भ्रमावेगहर्षेऽथ [2]विस्मयावेगशोकजे।
ग्रहे दानस्य यद् वाद्यं तमुद्घात्य प्रकीर्तितम्॥ २३८॥

[3]मोक्षमिदानीमुपदेक्ष्यामः। [5]तद्र यथा—संहननं ससरणं च। तत्रोद्धतद्रुतानुबन्धे घेत्तां किकिटि दत्तकेत्तिकि गोद्रो घघे दो घ टे घो घे यद्रो इति।

अथ खञ्जनत्कुटयो —ध द्रा ध द्रा तकिता तकिता गुदुघे इति।

अथ स्थितायाम्—घे धं घेट मटघे घे छिमट कटछि मटछि कर्माक दीघिटी इति।

[4]C भाण्डिकवाद्यम् ध्रुवाभूयोपगमन गभीर　[5]K सवमकलम्। धवो　इन्द्र कोघ क्षि　[6]C om up to [0]वकृष्टासु　[7]C अथ　K तत्र प्रावेशिक्यां　[8]C समपादो विभक्तान्तरेण　[9]K [0]पाणिकरिवकरणास्थिता × ×　[10]K × × अवकृष्टायामर्धं सन्निपातजमिति　236 (C 220, K XXXIV 204)　237 (C 221, K XXXIV 205) [1]K परिवर्तं　[2]C om from here to इति [3]K आदितायां यथा एघो क्वो ण खी चेप डिक्कथि ध्वघघडुप इति। अथ नकुं धखञ्जयो धास्ति णा घ घ घ खोदक्कणञ्ज इति　[4]K अथोद्घात्य　238 (C 222, K XXXIV 206) [1]K [0]वेगहर्षेऽथ,　C [0]वेगामर्षोथ　[2]K [0]शोकजम्　[3]K यद्वो दानस्य,　C भोगायतस [4]K [0]दानीं वक्ष्याम　[5]C om from here upto दीघिटि इति

[6]तत्राङ्किता[या] किन्त किन्तां इति । अ[थ] म्पितायां घततान् इति । [7]अवकृष्टायां घयतामिति ।

एवमेते ग्रहा मोक्षा ध्रुवाणा गदिता मया ।
निष्कामे च प्रवेशे च आक्षेपिक्यन्तरासु च ॥ २३९ ॥

एवं [1]तालकालस्वरज्ञानेन मार्दङ्गिकेण प्रयतितव्यम् ।

भवन्ति चात्र श्लोकाः —

अतालज्ञमकालज्ञमशास्त्रज्ञश्च [1]वादकम् ।
चर्मघातकमित्येवं प्रवदन्ति मनीषिणः ॥ २४० ॥
अनेनैष विधानेन 'वाद्य' योज्यं मयोक्तमि ।
अत ऊर्ध्वं प्रवक्ष्यामि आतोद्यानां तु लक्षणम् ॥ २४१ ॥

[1]त्रिधाकिया मृदङ्गानां [2]हरीतकीयवाश्रया ।
[3]तथा गोपुच्छरूपा च भवत्येषां स्वरूपतः ॥ २४२ ॥
[1]हरीतक्या कृतिस्त्वङ्की यवमध्यस्ततोऽर्ध्वकः ।
[4]आलिङ्ग्यश्चैव गोपुच्छाकृतिरेषां प्रकीर्तिताः ॥ २४३ ॥
[1]तालास्त्रयोऽर्धतालश्च [2]मृदङ्गाङ्किक इष्यते ।
[3]मुखं तस्य च कर्तव्यं द्वादशाङ्गुलयोजितम् ॥ २४४ ॥
तथोर्ध्वकश्च कर्तव्यश्चतुस्तालप्रमाणतः ।
[2]मुखं तस्य प्रकर्तव्यमङ्गुलानि चतुर्दश ॥ २४५ ॥
[1]आलिङ्ग्यश्चैव कर्तव्यो [2][द्वय]मात्रमथापि वा ।
मुखं तस्याङ्गुलानि स्युरष्टावेव समासतः ॥ २४६ ॥

[6]K om up to घततामिति [7]K अथावकृष्टाया घटमघटथिट तिगुडुधिटा धीधवधणधीणथ इति 239 (C 223, K XXXIV 207) [1]K तालकलाज्ञाने 240 (C 224, K XXXIV 208) [1]K कारटकाम् 241 (C 225, K XXXIV 209) [1]K वाद्य कार्यं मयकत 242 (C 226, K. XXXIV 210) [1]C त्रिविधा C हरिदंक्ति [3]K तथा नेपथ्य and omits the rest 243 (C 227, K XXXIV 210b) [1]K om 243 [2]C तु तिमिश्ङ्गा M कृतिस्त्वङ्गा [3]C °श्वतश्चक [4]C चालिङ्ग्यश्चैव, K om [5]K गोपुच्छा चाकृत्या समकीर्तित 244 (C 228, K XXXIV 211) [1]CM तालास्त्रयो ध्वताय (र्धतालश्च M) [2]CM मृदङ्गाङ्कित (MK) इष्यते [3]C मुखे तस्याङ्गुलानिस्यास्त्रयोदश चतुर्दश 245 (C 229a, XXXIV 212) [1]C °प्रमाणकम [2]C om 245b 246 (C 229b, K XXXIV 213) [1]C om 246a. [2]K लयमात्रमथापि

पणवश्चापि कर्तव्यो [1]दीर्घत्वे षोडशाङ्गुलः ।
[2][कु]शमध्योऽङ्गुलान्यष्टौ पञ्चाङ्गुलमुखस्तथा ॥ २४७ ॥
[1]ओष्ठं तस्य च [2]कर्तव्यं [3]तज्ज्ञैरध्यर्धमङ्गुलम् ।
मध्यं तु सुषिरं तस्य [4]चत्वार्येवाङ्गुलानि च ॥ २४८ ॥
दर्दरश्च घटाकारो [1]भवत्यष्ट्यङ्गुलिस्तथा ।
मुखं च तस्य कर्तव्यं घटस्य सदृशं बुधैः ॥ २४९ ॥
द्वादशाङ्गुलविस्तीर्णं पीनोष्ठं च [1]समन्ततः ।
अत ऊर्ध्वं प्रवक्ष्यामि चर्मलक्षणमुत्तमम् ॥ २५० ॥

न [1]जीर्णोपहतश्चर्म न च [2]काकमुखाहतम् ।
न [3]मेदोपगतं किञ्चित् न च धूमाग्निदूषितम् ॥ २५१ ॥
[1]षड्भिर्दोषैर्विनिर्मुक्तं चर्म [2]निर्वर्तितं गवाम् ।
[3]मुख पल्लवसंकाशं हिमकुन्देन्दुसप्रभम् ॥ २५२ ॥
स्निग्धामिषविहीनं तु क्लिन्नं चर्म प्रशस्यते ।
विधिनैव मुखोर्णानि चर्माण्याहृत्य बुद्धिमान् ॥ २५३ ॥
शीतोदके निशामेकां स्थापयित्वा समुद्धरेत् ।
वद्धैः सुललितैर्दान्तैर्गोमयैरतिमर्दितैः ॥ २५४ ॥
चन्द्रकैस्तनुभिः पश्चान् मृदङ्गान् योजयेद् बुधः ।
पुष्पावर्तं ततः कुर्यान्निवर्तिं चन्द्रिकाश्रयम् ॥ २५५ ॥
कक्षारच वै परिकरं ग्रीवास्थ स्वस्तिकं तथा ।
शतानि त्रीणि कुर्वीत पुष्करैर्ह्यक्षराणि तु ॥ २५६ ॥
दश हि तत्र बद्धास्तु प्रक्षेप्या वत्ति(?) सश्रयेत् ।
निहित्वा त्वक्षि(ङ्कि)के घाध्ने (?) तृतीये सप्रवेशयेत् ॥ २५७ ॥
सर्वेष्वेव प्रयोगोऽयमक्षि(ङ्कि)केषु विधीयते ।
न वै मृदङ्गे दातव्यं रोहणं सततं बुधैः ॥ २५८ ॥

247 (C 230 K XXXIV 214) [1]C दीर्घत्वात् [2]C कशो, K कशा 248 (C 231, K XXXIV 215) [1]K श्रोष्ठौ [2]K कर्तव्यौ [3]C °रध्यार्धमङ्गुलम् K °रध्यर्धाङ्गुलम् [4]C चत्वारी चाङ्गुलानि 249 (C 232, K XXXIV 216) [1]C भवत्यष्टिमुख°, K नवाङ्गुलिमुख 250 (C 233, K XXXIV 217) [1]C समाहत 251 (C 234, K XXXIV 218) [1]K ज्वरोपहत [2]K काकमुखाहतम् [3]K दोषापहतं [4]K भृशाग्निदूषितम् 252 (C 235a, K XXXIV 219) [1]K षभिर्दोषै [2]K निर्वर्तित गवा [3]K मुख 253-259 (K XXXIV 220-226)

गव्ये घृते च तैले च तिलपिष्टं तथैव च ।
बद्ध्वा ह्यनेन विधिना आङ्गिकालिङ्ग्यकोर्ध्वकान् ॥ २५९ ॥
देवताभ्यर्चनं कृत्वा ततः [1]स्थाप्या महीतले ।
चित्रायामथवा [2]हस्ते शुक्ले पक्षे शुभे तिथौ ॥ २६० ॥
उपाध्यायः शुचिर्भूत्वा कुलीनो [3]रागवर्जितः ।
[4]घनज्ञो गीततत्त्वज्ञो मधुरो नियतेन्द्रियः ॥ २६१ ॥
सोपवासोऽल्पकेशश्च शुक्लवासा दृढव्रतः ।
मण्डलत्रयमालिख्य गोमयेन सुगन्धिना ॥ २६२ ॥
ब्रह्माणं शङ्करं विष्णुं त्रिषु तेषु प्रकल्पयेत् ।
आलिङ्ग्यं स्थापयेत् पूर्वं ब्रह्मणो पूर्वमण्डले ॥ २६३ ॥
ऊर्ध्वकं तु द्वितीयेऽस्मिन् [5]रुद्रनाम्नि [6]निधापयेत् ।
[7]तिर्यग् उत्सङ्गिकं सम्यग् वैष्णवे मण्डले न्यसेत् ॥ २६४ ॥
बलिपुष्पोपहारैश्च नानापुष्पैर्विचित्रितैः ।
[1]आलिङ्ग्ये च बलिं दद्यात् मधुपायसमिश्रितम् ॥ २६५ ॥
[2]अपूप लो[चि]कामिश्रमाङ्किके सम्प्रदापयेत् ।
अनन्तरश्च दातव्यः सर्व[प]योर्ध्वके बलिः[3] ॥ २६६ ॥
स्वस्तिकैः [1][लोचि]कापूपपिण्डकैण्डरिकैः सह ।
[2]उन्मत्तकरवीरार्कपुष्पैरन्यैश्च [3]भूषितैः ॥ २६७ ॥
बलिः कार्यः प्रयत्नेन रक्तो रक्ताम्बरैः सह ।
वैष्णवे मण्डले [1]स्थाप्य [2]सर्वबीजगतेऽङ्किके ॥ २६८ ॥
[1]स्रग्धत्रालेपनैः पीतैः वस्त्रभिश्च सपायसैः ।
वाचयित्वा द्विजान् स्वस्ति दत्वा पूर्वं च दक्षिणाम् ॥ २६९ ॥

260-264 (C 235b 240a K XXXIV 227-231) [1]C स्थाप्य [2]C हस्ति पुष्ये [3]K रौगवर्जित [4]K भतिमात्रीवित स्व [5]C रुद्रनाम्ना [6]C निपातयेत् [7]C तिर्यक्कृतां गतिं 265-266 (C 240b 242a , K XXXIV 232 233) [1]C चालिङ्ग [2]C °लिश्रा माङ्किके [3]C °मोर्ध्वके [4]K reads for this entire passage बलिपुष्पोपहारैश्च पूजयेत् पुष्करं तथा । पायसं घृतमभ्यक्तं चन्दनं कुसुमानि च । शुक्लानि चैव वासांसि दत्वालिङ्गे स्वयम्भुवे । तान्श्चाय च दातव्यः सगणायोर्ध्वके बलिः । 267 (C 242b 243a , K XXXIV 234) [1]C बूपिकधूप कपकेश्वलिते [2]C °करवीरैश्च [3]C भूषितै 268 (C 243b 244a , K XXXIV 235) [1]K स्थाप्य [2]K सर्वबीजगतोऽङ्किके 269 (C. 244b-245a , K XXXIV 236) [1]C ग्रन्थशालम्बनैः पीतैः

[1]पूजयित्वा तु गन्धर्वान् पश्चाद् वाद्यं समाचरेत् ।
तन्त्रीभिः [2]पणवं नह्येत् सुसृष्टाभिः समन्ततः ॥ २७० ॥
[1]ततः पुष्करिकाश्चैव योजयेत्तत्र चर्मणा ।
[2]एवं मृदङ्गपणवाः कर्तव्या दर्दरास्तथा ॥ २७१ ॥
दैवतानि च वक्ष्यामि [1]यान्येषाञ्च भवन्ति हि ।
[2]घञ्रेक्षण शङ्कुकर्णो ग्रामणीश्च तथा महान् ॥ २७२ ॥
एताश्च देवता विप्रा मुरजेषु प्रकीर्तिताः ।
[1]मृन्मयत्वाद् मृदङ्गास्तु भाण्डं भ्रमयतीति च ॥ २७३ ॥
मुरजास्तूर्ध्वकरणादातोद्यं तोदनादपि ।
भाण्डस्यादौ प्रणीतोऽद्य पणवश्च विधीयते ॥ २७४ ॥
[1]दारु यतो दारयति तस्माद्भवति दर्दरः ।
दृष्ट्वा [2]मृदङ्गपणवदर्दरंश्च महामुनिः ॥ २७५ ॥
[1]मेघैस्तु स्वरसंघादान् [2]मृदङ्गानामथासृजत् ।
विद्युज्जिह्वो [3]भवेद् वामे [4]मेघः स तु महास्वनः ॥ २७६ ॥
ऐरावणो महामेघः तथा [1]चैवोर्ध्वके भवेत् ।
[2]आलिंग्ये च तडित्ख्यातो नाम्ना मेघो वलाहकः ॥ २७७ ॥
दक्षिणे पुष्करो मेघः [1]कोकिलो [वा]मतः स्मृतः ।
[2]मृदङ्ग[प]घ नाम्ना [3]च [4]ऊर्ध्वके नन्दयोच्यते ॥ २७८ ॥
[1]आङ्किकसिद्धिरित्येषमालिंग्यश्चा[थ] पिङ्गल ।
[2]भूतप्रियो बलिस्तेभ्यो दातव्यः सिद्धिमिच्छता ॥ २७९ ॥

270 (C 245b 246a, K XXXIV 237) [1]K पूजयित्वादि [2]C पणव तु स्यात् नह्याभि 271 (C 246b-247a, K XXXIV 238) [1]C चावपुष्करिका यैव [2]C मृदङ्गपणवा चापि 272 (C 247b-248a, K XXXIV. 239) [1]K यैषां ते च [2]C लघञ्जक्षणशङ्कुकर्णै 273 (C 248b, K XXXIV 240) [1]C om 273b 274 (K XXXIV 241) 275 (C 249a, K XXXIV 242) [1]C om 274a, K दारयोसो [2]K मृदङ्गान् पणवान् दर्दरंश्च 276 (C 249b 250a, K XXXIV 243) [1]C मेघैस्तु स्वरसंवादान K मेघै सुस्वरसयोग [2]C मृदङ्गौ नाम वापरान् [3]KC भवेद् वामो [4]C घेघश्च तु 277 (C 250b-251a, K XXXIV 244) [1]K चैवोर्ध्वको C °चोर्ध्वं गतो [2]C आलिङ्गे, K आलिङ्गके च× × ×बलाहक 278 (C 251b 252a, K XXXIV. 245) [1]K किकिला [2]KC मृदङ्गश्चैव [3]K तु [4]C ऊर्ध्वगो नान्दयो°, K ऊर्ध्वक नन्दाख्यो 279 (C 252b 253a, K XXXIV 246) [1]C चञ्चारश्चिरितोवमालिङ्गचात् K आङ्किक सिद्धिरितोवमालिङ्गश्चापि [2]C भूतप्रियोऽपि

[1]पूजयित्वा च तान् देवान् प्रेक्षां रङ्गे प्रकल्पयेत् ।
[2]करीषस्य तु संघाते [3]मृदङ्गं स्थापयेद् बुध ॥ २८० ॥
[1]पसघतानं (?) कस्यांश्च तथा चापनता पुन ।
आतोद्यपणवैश्चैव नर्तकोपनतास्तथा ॥ २८१ ॥
[1]शान्तिकर्म प्रयुञ्जीत विधिदृष्टेन कर्मणा ।
चत्वार पणवा॰ कार्या दशरूपविधौ पुन॰ ॥ २८२ ॥
[1]आतोद्यान्यपि तान्येव नानावस्थासु वादयेत् ।
[2]नाटकेऽङ्के प्रकरणे वीथ्या भाणे डिमे तथा ॥ २८३ ॥
[1]मृदङ्गं पणवं चैव दर्दर [2]चैव वादयेत् ।
एवमेतद् बुधैर्ज्ञेयं मृदङ्गाना तु लक्षणम् ॥ २८४ ॥

अत ऊर्ध्वं प्रवक्ष्यामि उपहस्तस्य लक्षणम् ।
कर्तरी समहस्तश्च हस्तपाणित्रय तथा ॥ २८५ ॥
[1]वर्तना दण्डहस्तश्च पञ्च शिक्षाकरास्तथा ।
तर्जन्याङ्गुष्ठयोगेन [2]स्वने(?) जातिगतिस्तन ॥ २८६ ॥
[3]पर्यायपतनैर्ज्ञेया कर्तरी हस्तयोर्द्वयो॰ ।
समयो समतालेन [4]द्वयोर्हस्ततलार्धयो ॥ २८७ ॥
पर्यायत॰ प्रपातो य समहस्त इति स्मृत ।
[5]विभावितस्य वामस्य पार्ष्णिणाङ्गुलिभिस्तथा ॥ २८८ ॥
सकृद्दक्षिणहस्तस्य हस्तपाणित्रय भवेत् ।
[6]पूर्वं दक्षिणहस्तेन क्रमाद् वामेन [7]पा[त]त ॥ २८९ ॥
चत्वारो यत्र वर्तन्ते वर्तनाद् वर्तना स्मृता॰ ।
प्रथम वामहस्तेन गृहीत्वा दक्षिणेण तु ॥ २९० ॥

280 (C 253b 254a, K XXXIV 247) [1]K चपूजयित्वा त्वे तान दें नैव प्रेक्षां प्रयोजयेत् [2]C रीषस्य for करीषस्य तु [3]C मृदङ्ग 281 (K XXXIV 248) [1]C om 281 282 (K XXXIV 249) [1]C om 282 283 (C 254b, K XXXIV 250) [1]C om 282b [2]K नाटके सप्रकरणे भाणके सप्रहासने 284 (C 255, K XXXIV 251ab) [1]C मृदङ्ग पणवाश्चापि [2]C चोपकारयेत् 285-289 (C 256-261) [1]C पचविप्राकर [2]M स्वते जातिद्रतिष्वत [3]C पर्यायापतने॰ M पर्यायापतन॰ [4]C ॰हंस्त समास्रयो [5]C विभावितव्या [6]C पूर्वद॰ [7]C पादत 290 (C. 262)

प्रहारा [1]क्रमपातेन दण्डहस्तः समस्तयो. ।
सौष्ठवं लाघवञ्चैव बाहुल्य दृढतापि च ॥ २९१ ॥
सर्वेषां चैव हस्ताना गुणाश्चत्वार ईरिता. ।
एवमेतन्मया प्रोक्तं हस्तानामपि लक्षणम् ॥ २९२ ॥

अत ऊर्ध्वं प्रवक्ष्यामि वादकानां तु लक्षणम् ।
[1]गीतवाद्यकलालयग्रहमोक्षविशारदोऽथ लघुहस्त. ।
चित्रपाणिर्विधिज्ञ सिद्धिस्थाने [2]ध्रुवाकुशल. ॥ २९३ ॥
कलाभिरतः मधुरहस्त सुनिविष्टो [1]रक्तमार्जनो बलवान् ।
सुविहितशरीरबुद्धि ससिद्धो [2]वादक श्रेष्ठ ॥ २९४ ॥

आलेपनप्रमाणज्ञश्चतुमार्गकृतश्रम [1] ।
प्रतिग्रहीता सिद्धीनामङ्गदोषविवर्जितः ॥ २९५ ॥
स्वभ्यस्तकरण साम्ये गीतज्ञो गुणितग्रह ।
सुसंगीतप्रयोगज्ञो मृदङ्गी तु भवेद् गुणैः ॥ २९६ ॥

[1]अभ्रान्तोऽथ हस्तकालज्ञश्छिद्रावरणपण्डित [1] ।
अभ्यस्तकरणश्चैव भवेत् पाणविको गुणै ॥ २९७ ॥
निश्चलो निपुण. शीघ्रो लघुहस्तो विधानवित् ।
वादनान्तरवेदी च दर्दरी तु प्रशस्यते ॥ २९८ ॥

एतत् सर्वं नाट्ययोगं समीक्ष्य
प्रोक्त वाद्यं [1]सर्वलोकानुमानात् ।
नोक्त [2]यच्चेदागमाच्छास्त्रबुद्ध्या
सद्भि कार्यं मार्गजाती समीक्ष्य ॥ २९९ ॥

291-292 (C 263 264, K XXXIV 251c) [1]C क्रमपातेन   293 (C 264b 265a, K XXXIV 252) [1]C गीतवात (M वाद) कलावात (M पास) ग्रहमोक्षविशारद । अथ लघुहस्तश्चित्रपाणि   K गीतवाद्यतालयग्रहमोक्षविशारदोऽथ लघुहस्त । क्रियावशो विधेय सिद्धिस्थाने ध्रुवाकुशल ।   [2]ध्रुवाकुशल from C 265b   294 (C 265b-266a, K. XXXIV 253) [1]C मार्जनो बलवान्   [2]K मृदङ्गवादी गुणैरेव   295 (C 266b-267a, K XXXIV 254) [1]K [0]चतुर्मार्गज्ञतश्च   296 (C. 267bc, K XXXIV 255)   297 (K XXXIV 256) भ्रान्तोऽथ हस्त[0]   [2]K [0]च्छिद्रावरण पण्डितैः   298 (C 267bc, K XXXIV 257)   299 (C 268, K XXXIV 258) [1]K [0]लोकाशुभावात्   [2]K [0]गमाद्वस्तुबुद्ध्या

स्फुटप्रहारं [1]विशदं विभक्तं
    [2]रक्तं विघुष्टं करलेपन च ।
त्रिमार्जनं पूरितरागयोग
    मृदङ्गवाद्यं [3]गुणतो वदन्ति ॥ ३०० ॥

वाद्येषु[1] यत्न प्रथमं तु कार्यं,
    [2]शय्या हि नाट्यस्य वदन्ति वाद्यम् ।
वाद्ये च गीते च सुप्रयुक्ते
    [3]नाट्यप्रयोगो न विपत्तिमेति ॥ ३०१ ॥

इति भारतीये नाट्यशास्त्रे पुष्करवाद्यो नाम त्रयस्त्रिंशोऽध्याय ॥

300 (C 269, K XXXIV 259) [1]M विषम [2]M सबोऽपि घृष्ट रिञ्जितकश्च [3]M गुणमेते 301 (C 270, K. XXXIV 260) [1]K वादी तु [2]K शय्यानि [3]C नाटस्य योगो न विनाशमेति [4]C शायाप्यायी

# चतुस्त्रिंशोऽध्यायः ।

अत ऊर्ध्वं प्रवक्ष्यामि प्रकृतीनां तु लक्षणम् ।
[1]नायकानां च सर्वेषां चतुर्णामपि तत्त्वत ॥ १ ॥
[1]समासतस्तु [2]प्रकृतिस्त्रिविधा परिकीर्तिता ।
[3]स्त्रीणां च पुरुषाणा च उत्तमा मध्यमाधमा ॥ २ ॥
[1]जितेन्द्रिया ज्ञानवती नानाशिल्पविचक्षणा ।
दक्षिणाऽथ [2][भोग]दक्षा दीनाना [3]परिसान्त्विनी ॥ ३ ॥
[1]नानाशास्त्रार्थसम्पन्ना गाम्भीर्यौदार्यशालिनी ।
[2]धैर्यत्यागगुणोपेता ज्ञेया प्रकृतिरुत्तमा ॥ ४ ॥
[1]लोकोपचारचतुरा शिल्पशास्त्रविशारदा[2] ।
[3]विज्ञानमाधुर्ययुता मध्यमा प्रकृतिः स्मृता ॥ ५ ॥
[1]रुक्षा वचसि दुःशीला कुसत्त्वा [2]स्थूलबुद्धिका ।
क्रोधना घातकाश्चैव [3]मित्रघ्नाश्छिद्रघातका ॥ ६ ॥
[1]वृथारम्भप्रसक्ताश्च यत्किञ्चिद्वादिनोऽल्पका ।
[2]पिशुना उद्धता वाक्यैरकृतज्ञास्तथालसा ॥ ७ ॥

1 (C 1a, B, 1) [1]C om 1b    2 (C 1b 2a, H 2, BK XXIV 1) [1]B and K have this as the ch XXIV and begins from here    [2]K त्रिविधा H त्रिविधा    [3]K पुरुषाणामथ स्त्रीणामुत्तमाधममध्यमा    3 (C 2b 3a, B XXIV 2) [1]HK have in its place अत ऊर्ध्वं प्रवक्ष्यामि नानापुरुषलक्षणम् । नानाशीलगुणे लोके उत्तमाधममध्यमे । प्रयोक्तव्या पृथग्भावैर्विज्ञेया प्रकृतिस्त्रिधा । तत्र शिष्यादिसम्पन्ना ज्ञानवन्तो जितेन्द्रिया ॥ ८५, ८६, ८७, ८८ ॥ [2]C भगासक्ता, B °महाभक्ता    [3]B परिसान्त्वनी    4 (C 3b-4a, B XXIV 3) [1]HK (87, 88 88 89) have in its place लोकक्रिया (H लोके तु ये) विशेषज्ञा धर्माधर्मविचक्षणा । शास्त्रे विद्यासुकुशला शीलसत्त्वव्यवस्थिता । अहिंसासत्त्वसम्पन्ना प्रकृत्या तूत्तमा स्मृता । [2]B धैर्य    5 (C 4b 5a, B XXIV 4, H 89b, K XXIV 83b) [1]HK लोकोपचारतत्त्वज्ञा    [2]HK विचक्षणा for विशारदा    [3]HK have here मध्यमाय गुणोपेता प्रकृत्या मध्यमा स्मृता    6 (C 5b 6a, B XXIV 5, H 90b 91a, K XXIV. 89b 90a) [1]B रूक्षवाचोऽथ, HK रूक्षवाक्या दुराचारा निःसत्त्वा    [2]HK स्वल्पबुद्धय, NC स्वल्पबुद्धिका, B स्थूलबुद्धय    [3]K कृतघ्नाश्छिद्रदर्शिन H कृतघ्ना सर्वदर्शिन, B मित्रघ्नाश्छिद्रमानिन    7 (C 6b, B XXIV 6a, H 91b 92a, K XXIV. 90b-91a) [1]CB om 7a    [2]HK पिशुना पापनिरता स्त्रीलौल्या (B लोला) कलहप्रिय ।

[1]मान्यामानविशेषज्ञा स्त्रीलोला कलहप्रिया· ।
[2]सूचका पापकर्माण परद्रव्यापहारिण ॥ ८ ॥
एभिर्दोषैस्तु [1]सम्यद्धा भवन्ति ह्यधमा नरा॰ ।
एवञ्च शीलतो [2]नृणां प्रकृतिस्त्रिविधा स्मृता ॥ ९ ॥
[1]स्त्रीणां पुनस्तु प्रकृतिं व्याख्यास्याम्यनुपूर्वश ।
[2]मृदुभाषा त्वचपला स्मितभाषिण्यनिष्ठुरा ॥ १० ॥
[1]गुरूणां वचने दक्षा सलज्जा विनयान्विता ।
[2]रूपाभिजनमाधुर्यगुणै स्वाभाविकैर्वृता ॥ ११ ॥
गाम्भीर्यधैर्यसम्पन्ना [1]उत्तमा प्रकृति स्मृता ।
[2]नात्युत्कृष्टैरशिथिलैरेभिरेव वृता गुणै ॥ १२ ॥
[1]अल्पदोषानुविद्धा च मध्यमा प्रकृति स्मृता ।
अधमा प्रकृतिर्या तु पुरुषाणा प्रकीर्तिता ॥ १३ ॥
[1]विज्ञेया सैव नारीणामधमाना समासत ।
[2]प्रेष्या चैव हि विज्ञेया सकीर्णा प्रकृतावपि ॥ १४ ॥
नपुंसकश्च विज्ञेय संकीर्णोऽधम एव च ।
[1]शकारश्चैव विटश्च ये चान्येऽप्येवमादय ॥ १५ ॥
[1]संकीर्णा प्रकृतिर्ज्ञेया नाटके च द्विजोत्तमा ।
एते ज्ञेया प्रकृतय पुरुषस्त्रीनपुंसका ॥ १६ ॥

8 (C 7, B XXIV 6b 7a H 92b, K XXIV 91b) [1]C मान्यामान्यविशेषज्ञा B मान्यामान्याविशेषज्ञा HK मान्यामान्यविशेषाणामनभिज्ञाश्च तस्करा [2]HK om 8b
9 (C 8, B XXIV. 7b 8a, H 93, K XXIV 92) [1]HK संयुक्ता प्रकृतिश्चाधमा स्मृता B सम्पन्ना भवन्तीह्यधमा नरा 10 (C 9 B XXIV 8b 9a, H 110, K XXIV 108b 109a) [1]HK अत पर प्रवक्ष्यामि स्त्रीणां च प्रकृति पुन [2]HK मितभाषा विदग्धा च सलज्जा साध्व (K न च) निष्ठुरा 11 (C 10 B XXIV 9b 10a, H 111a K XXIV 109b) [1]HK कुलशीलगुणोपेता गुरूणां शासने रता C गुरूणां वचने [2]C रूपाभिजनमाधुर्यां गुणै स्वाभाविकी धृता 12 (C 11 B XXIV 10b-11a H 111b K XXIV 110a) [1]BC सा (B वि) ज्ञेया प्रमदोत्तमा [2]HK om this B नात्युत्कृष्टैरनिखिलै॰ 13 (C 12, B XXIV 11b 12a) [1]HK om 13 14 (C 13a B XXIV 12b, 13b, H 10b, K XXIV 10a) [1]HK om this hem [2]C om this hem 15 (C 13b, 14a, B XXIV 13a, 14a, H 11, K 10b 11a) [1]C विदूषक शकारश्च [2]K सकरे स्तविरश्चैव H शकारश्चैव चेटश्च B शकारश्च विटश्चैव [2]HK चान्येऽप्यधमा नरा 16 (C 14b-15a, H 12, K XXIV 11b 12a) [1]N सकीर्णा प्रकृति र्ज्ञेया॰ CM सकीर्णा नाटके ज्ञेया॰ [2]C ॰स्ते सजज्ञे नाटके बुधै । B अधमा नाटके बुधै [3]HK प्रकृत्या तु

[1]आसां तु संप्रवक्ष्यामि [2]विभागं शीलसंश्रयम् ।
[3]तत्र चत्वार एव स्युर्नायकाः परिकीर्तिताः ॥ १७ ॥
[1]मध्योत्तमायां प्रकृतौ नानालक्षणलक्षिताः ।
[2]धीरोद्धता धीरललिता धीरोदात्तास्तथैव च ॥ १८ ॥
धीरप्रशान्तकाश्चैव नायकाः परिकीर्तिताः ।
देवा धीरोद्धता ज्ञेयाः [1]स्युर्धीरललिता नृपाः ॥ १९ ॥
[1]सेनापतिरमात्यश्च [2]धीरोदात्तौ [3]प्रकीर्तितौ ।
[4]धीरप्रशान्ता विज्ञेया ब्राह्मणा वणिजस्तथा ॥ २० ॥
एतेषां च पुनर्ज्ञेयाश्चत्वारश्च[1] विदूषकाः ।
[2]लिंगिनो [द्विजाऽ]चरजा शि[ष्य]श्चेति यथाक्रमम् ॥ २१ ॥
[1]देवक्षितिभृतामात्यब्राह्मणानां प्रयोजयेत् ।
[2]विप्रलम्भे सुहृदो[ऽमी] संकथालापपेशलाः ॥ २२ ॥
व्यसनी [1]प्राप्तदुःखो वा [2]युज्यतेऽभ्युदयेन यः ।
तथा पुरुषबाहुल्ये प्रधानो नायकः स्मृतः[3] ॥ २३ ॥
[1]यत्रानेकस्य भवतो व्यसनाभ्युदयौ पुनः ।
[2]प्रकृष्टौ यस्य तौ स्यातां [3]स भवेत् तत्र नायकः[4] ॥ २४ ॥

17 (C 15b 16a, B XXIV 15b 16a, K XXIV 12b, 2a, H 13a, 3a) [1]KH एतेषां चैव वक्ष्यामि विभाग शीलसंश्रये. [2]B विभाग [3]KH नाट्ये चत्वार एवैते. B चव चत्वार 18 (C 16b 17a, B XXIV 16b–17a H 3b-4a, K XXIV 2b-3a) [1]K मध्योत्तमाया [2]HK read all the terms in singular 19 (C 17b-18a, B XXIV 17b-18a H 4b-5a K XXIV 3b-4a) [1]C ललिताश्च तथा नृपा 20 (C 18b-19a, B XXIV 18b-19a, H 5b 6a, K XXIV 4b 5a) [1]HK. °मात्यश्च [2]HK °दात्ता. [3]HK °कीर्तिता [4]KH ब्राह्मणो वणिजश्चैव प्रोक्ता धीरप्रशान्तका 21 (C 19b-20a, B XXIV 19b 20a, K XXIV 5b) [1]K चत्वारोऽथ [2]KH om 21b. C लिङ्गानि ते चरजया शिष्याश्चेति N लिङ्गान्तस् तेऽचरजा वा शिष्याश्चेति 22 (C 20b-21a, B XXIV 20b-21a) [1]KH om 22 [2]C विप्रलब्धे सुहृद्दासी पेशला 23 (C 21b-22a, B XXIV 21b 22a) [1]C प्राप्तदुःखा B प्राप्यदुःख [2]C युज्यते भूमिपेन वा. [3]KH om 73 24 (C 22b-23a, B XXIV 22b 23a) [1]C तत्र [2]B प्रद्युष्टौ [3]B न भवेत् [4]KH om 24

एते तु नायका ज्ञेया [1]काव्यवन्धेषु सर्वदा[1] ।
[2]नायिकाश्चैव वक्ष्यामि चतस्र पुनरेव तु ॥ २५ ॥
दिव्या च नृपपत्नी च कुलस्त्री गणिका तथा ।
एतास्तु नायिका ज्ञेया नानाप्रकृतिलक्षणाः ॥ २६ ॥
[1]धीरा च ललिता चैव उदात्ता निभृता तथा ।
[2]दिव्या राजाङ्गना ह्येता गुणैर्युक्ता भवन्ति हि ॥ २७ ॥
उदात्ता निभृता चैव [1]भवेत्तु कुलजाङ्गना ।
[2]ललिता चाप्युदात्ता च गणिका शिल्पकारिका ॥ २८ ॥
[1]प्रकृतीनां तु सर्वासामुपचारो द्विधा स्मृत[1] ।
[2]बाह्यश्चाभ्यन्तरश्चैव तयोर्वक्ष्यामि लक्षणम् ॥ २९ ॥
तत्र राजोपचारो यो [1]भवेदाभ्यन्तरस्तु स ।
ततो बाह्योपचारस्तु यः स बाह्यक उच्यते ॥ ३० ॥

[1]तत्र राजोपचारेषु अन्त पुरसमाश्रयम् ।
स्त्रीविभाग प्रवक्ष्यामि [2]उपचारं तथैव च ॥ ३१ ॥
[1]महादेवी तथा देवी स्वामिनी [2]स्थायिनी तथा ।
भोगिनी शिल्पकारिणी [3]नाटकीयाथ नर्तकी ॥ ३२ ॥

25 (C 23b, K XXIV, 6 H 6b 7a) [1]C नानाप्रकृतिलक्षणा [2]C om 25b, B om 25 26 (K XXIV 7, H 7b 8a) 27 (C 24, B XXIV 24b 25a, K XXIV 8, H 8b 9a) [1]HK read all terms in plural [2]C दिव्यानां जातयश्चैते गुणैर्युक्ता° 28 (C 25, B XXIV 25b 26a, K XXIV 9, H 9b 10a) [1]C भवतीव कुलाङ्गना [2]KH गणिका शिल्पकारी च उदात्तललिते स्मृते 29 (C 26, B XXIV 26b 27a, K XXIV 12c, H 13b) [1]KH सर्वासां प्रकृतीनां तु प्रकारो द्विविध स्मृत [2]KH om 29b 30 (C 27, B XXIV 27b-28a, K XXIV 13, H 14a) [1]CN भवत्याभ्यन्तरस्तु K भवेदभ्यन्तरस्तु [2]H om 30b, [2]K बाह्योपचारो यस्तस्मात् विज्ञेयो बाह्य एव च 31 (C 28, B XXIV 28b 29a, K XXIV 14, H 14b 15a) [1]KH तस्माद्राजोपचारेषु पुनराभ्यन्तराश्रयम् C राजोपचारतमन्त पुरसमाश्रयम् [2]C अन्त पुरसमाश्रयम् N as in HK B विभक्तमुपचारस 32 (C 29, B XXIV 30, K. XXIV 15, H 15b 16a) [1]CMN read all these terms in plural. B महादेवी [2]KH स्थायिनी, CB स्थापिता [3]C नाटकीयाथ नर्तिका B नाटकीया सनर्तका B adds before 32 राजोपचार वक्ष्यामि अन्त पुरसमाश्रयम्

[1]अनुचारिका च विज्ञेया तथा च परिचारिका ।
तथा सञ्चारिका चैव तथा [2]प्रेषणचारिका ॥ ३३ ॥
[1]महत्तरा प्रतीहारी कुमारी स्थविरा अपि ।
[2]आयुक्तिका च नृपतेरयमाभ्यन्तरो जनः ॥ ३४ ॥
तत्र [1]मूर्धाभिषिक्ता या कुलशीलसमन्विता ।
[2]गुणैर्युक्ता वयःस्था च मध्यस्थाऽक्रोधना तथा ॥ ३५ ॥
[1]मुक्तेर्ष्या नृपशीलज्ञा [2]समदुःखसुखा सदा ।
[2]शान्तिस्वस्त्ययने भर्तुः सततं मङ्गलैषिणी ॥ ३६ ॥
[1]शान्ता [2]प्रीतियुता धीरा अन्तःपुरहिते रता ।
एभिर्गुणैस्तु सम्पृक्ता [3]महादेवी उदाहृता ॥ ३७ ॥
एभिरेव गुणैर्युक्ता [1]सत्सत्कारैस्तु वर्जिता ।
[2]गर्विता राजपुत्री च [3]प्रीतिसम्भोगतत्परा ॥ ३८ ॥
[1]शुचिर्नित्योज्ज्वलाकारा [2]प्रतिपक्षाभ्यसूयिका ।
[3]यौवनादिगुणोन्मत्ता सा देवी अभिधीयते ॥ ३९ ॥
[1]सेनापतेरमात्यानां [2]भृत्यानामथवा पुनः ।
भवेयुस्तनयास्तास्तु [3]प्रीतिसम्मानवर्धिता ॥ ४० ॥

33 (C 30, B XXIV 31, K XXIV 16, H 16b-17a) [1]See note 1 on 32 [1]KH अनुचारी तथायुक्ता [2]HKB प्रेष(इ B)णकारिका 34 (C 31, B XXIV 32, K XXIV 17, H 17b-18a) [1]C महत्तर्य, [2] See n 1 on 32 35 (C 32, B, XXIV 33, K XXIV 18, H 18b 19a) [1]KH मूर्धाभिषिक्ता [2]K समतुल्यचरित्रा च वयसा क्रोधवर्जिता 36 (C 33, B XXIV 34, K XXIV 19, H 19b 20a) [1]HK क्षमीर्ष्या [2]HK शान्तिस्वस्त्ययनैर्नित्यं भर्तुर्मङ्गलकाङ्क्षिणी 37 (C 34, B XXIV. 35, K XXIV 20, H 20b-21a) [1]HK पतिव्रता क्षमायुक्ता अन्तःपुरहिते रता [2]C पतियुता, BN पतिव्रता [3]C महादेव्य उदाहृत 38 (C 35, B XXIV 36, K XXIV 21, H 21b 22a) [1]HK बहुमानविवर्जिता [2]B सत्सत्कारवि° [2]C गर्विता स्वतिसौभाग्यात् B गर्विताथाति सौभाग्या [3]HK. रतिसंयोगतत्परा, B पतिसम्भोग तत्परा 39 (C 36, B XXIV. 37, K. XXIV 22 H 22b 23a) [1]HK बालानित्योज्ज्वलगुणा HK प्रतिपक्षेष्व° B पतिरक्षाभ्य° [3]वयोरूपगुणाढ्यास्तु यास्ता देव्य प्रकीर्तिता 40 (C 37, B XXIV 38, K XXIV 23, H 24) [1]H reads before this कन्दिनी पद्मिनी आदि सावधाना शुभानना [2]K दण्डिता तत्पराश्च या H दण्डिनी तत्° [3]B प्रतिसम्मान°

शीलरूपगुणैर्यास्तु सम्पन्ना [1]नृपवल्लभा. ।
[2]स्वगुणैर्लब्धमाहात्म्याः स्वामिन्य इति ताः स्मृता ॥ ४१ ॥
रूपयौवनशालिन्य[1] कर्कशा [2]विभ्रमान्विताः ।
[2]रतिसम्भोगकुशला [3]प्रतिपक्षाभ्यसूयिका ॥ ४२ ॥
[1]उत्थिताश्चाप्रमत्ताश्च त्यक्तालस्या ह्यनिष्ठुरा ।
मान्यामान्यविशेषज्ञा स्थायिन्य [2]सप्रकीर्तिता ॥ ४३ ॥
[1]दक्षा स्फुटा क्षुद्रात्ताश्च गन्धमाल्योज्ज्वला [2]सदा ।
[3]नृपतिच्छन्दवृत्ताश्च [4]सर्वेर्ष्याविवर्जिता ॥ ४४ ॥
[5]सुशीला लघुसम्माना मृदुर्नात्युद्धतास्तथा ।
मध्यस्था निभृता क्षान्ता भोगिन्य इति ता. स्मृता ॥ ४५ ॥
नानाकलाविशेषज्ञा नानाशिल्पविचक्षणा. ।
गन्धशिल्पविभागज्ञा नानालेख्यविशारदा[1] ॥ ४६ ॥
[1]शयनाशनयानज्ञा मधुराश्चतुरास्तथा ।
दक्षा[2]श्चिता स्फुटा [3]श्लक्ष्णा निभृता शिल्पकारिका ॥ ४७ ॥
[1]अथ रूपगुणौदार्यसौभाग्यधैर्यशीलसम्पन्ना[2] ।
[3]पेशलमधुरस्निग्धानुनादिकलचित्रकण्ठा च ॥ ४८ ॥
[1]हेलाभावविशेषज्ञा सत्त्वेनाभिनयेन च ।
माधुर्येण च सम्पन्ना ह्यातोद्यकुशलास्तथा ॥ ४९ ॥

41 (C 38, B XXIV 39 K XXIV 24, H 25) [1]B नृपतेर्हिता [2]KH स्वामि सत्कारसम्पन्ना B स्वगुणैर्लब्धसम्माना 42 (C 39 B XXIV 40, K XXIV 25, H 26) [1]KH ललिता तथा [2]C चतिसम्भोग० [3]K प्रतिपक्षेऽभ्यसूयिका 43 (B XXIV 42, K XXIV 27 H 28) [1]C om 43 [1]HK उपस्थिता चाप्रमत्ता निद्रालस्या [2]H कथिता तथा 44 45 (K XXIV 26 28 B XXIV 41 43, H 27, 29) [1]H दक्षा B दक्षा मधुरा च विनिता [2]C तथा [3]B नृपतेश्छन्दवर्तिन्यो नवीर्ष्यामानवर्जिता [4]H सर्वर्द्द० [5]B कुलशौचलब्धपूजा मृद्वी नातिचोद्धटा 46 (K XXIV 29, B XXIV 44, H 30) [1]B ०विकल्पिका 47 (C 40b 41a, K XXIV 30, B XXIV 45, H 31) [1]B शयनाशनभागज्ञा [2]B दक्षा सौम्या स्फुटा श्लिष्टा [3]H श्लोका. 48 (C 46, B XXIV 50b 51a) [1]C चर्थ KH om 48 [2]C सौभाग्यवीर्य सम्पन्ना [3]C पेशल मधुरा स्निग्धा न च विकल्पा चित्रकर्मे कुशला च 49 (C 43, B XXIV 47b 48a) [1]B ०विशेषाढ्या

[1]स्वरतालयविज्ञाश्च तथाचार्योपसेविका: ।
चतुरा नाट्यकुशलाश्चोहापोहविचक्षणाः ॥ ५० ॥
रूपयौवनसम्पन्ना नाटकीया: प्रकीर्तिता: ।
अङ्गप्रत्यङ्गसम्पन्नाश्चतुष्षष्टिकलान्विता: ॥ ५१ ॥
चतुरा प्रश्रयोपेता: स्त्रीदोषैश्च विवर्जिता ।
सदा प्रागल्भ्ययुक्ताश्च [1]त्यकालस्या जितश्रमा ॥ ५२ ॥
नानाशिल्पप्रयोगज्ञा नृत्तगीतविचक्षणाः ।
समागतासु नारीषु रूपयौवनकान्तिभि: ॥ ५३ ॥
न दृश्यते गुणैस्तुल्या यस्या: सा नर्तकी स्मृता ।
[1]सर्वावस्थोपचारेषु या न मुञ्चति पार्थिवम् ॥ ५४ ॥
[1]विज्ञेया [2]नामतः सा तु नृपतेरनुचारिका ।
[3]छत्रशय्यासने युक्ता तथा व्यजनकर्मणि ॥ ५५ ॥
[1]संवाहने च गन्धे च तथा चैव प्रसाधने ।
[2]तथाभरणसंयोगे माल्यसंग्रहणेषु च ॥ ५६ ॥
[1]विज्ञेया नामत: सा तु नृपते: परिचारिका ।
नानाकक्ष्याविचारिण्यस्तथोपवनसंचराः ॥ ५७ ॥
देवतायतनक्रीडाप्रासादपरिसंचरा[1] ।
[1]यामकिन्यस्तथा चैव याश्चैवंलक्षणा: स्त्रियः ॥ ५८ ॥
संचारिकास्तु विज्ञेया नाट्यज्ञैर्भोगचारिता[1] ।
[1]प्रेषणे कामसंयुते तथा गुह्यसमुत्थिते ॥ ५९ ॥

50-51 (C 41b-42, 44a, B XXIV 46, 47a 48b, cf K XXIV 31, 32) [1]B स्वरमोक्षनयज्ञा या रसभावविकल्पिका 52 (C 44b-45a, B XXIV 49, K XXIV 33b, H 34b) [1]K मुक्तायुक्ता 53 (C 45b, 47a, B XXIV 50a, 51b, K XXIV 33a, 34a, H 34a 35a) K यौवनादिगुणान्विता 54 (C 47b-48a, B XXIV 52, K. XXIV 47, 34b 35a, H 35b 36a) [1]HK सर्वावस्था सर्वेषु अनुगच्छति या नृपम् 55 (B XXIV 53 K XXIV 35b, 38a, H 36b, 39a) [1]C. om 55 [2]B दर्पिकादय नाम्नात्वतु° [3]B अस्थपाली छत्रधारी वदा व्यजनधारिणी. 56 (B XXIV 54, K XXIV 38b-39a, H 39b-40a, cf C 48-49) [1]B दर्पिका गन्धयोक्त्री सदा चैव प्रसाधिका [2]B °भरणयोक्त्री च माल्यसयोज्जिका तथा. 57 (B XXIV 55; C 50b, K XXIV 39b 40a H 40b-41a) [1]B एवंविधा नरेंद्राणां या स्त्रियः. 58 (C 51, B XXIV 56 K XXIV 40b 41a, H 41b-42a) [1]K यामेषु च नियुक्ता यास्तदा च विविधाश्रये 59 (C 52ab B XXIV 57, K XXIV. 41b-42a; H 42b-43a) [1]C प्रेषणे कामयुक्ते B प्रेषणेकाम °[2]C युक्ता गुह्य समुत्थिते. K. गुह्यादृष्ट समुत्थिते.

[1]या नियुक्ता बुधैस्तास्तु [2]ज्ञेयाः प्रेषणचारिका ।
[3]सर्वान्ति पुररक्षाया [4]स्तुतिस्वस्त्ययनादिभिः ॥ ६० ॥
या वृद्धिमभिनन्दन्ति [1]महत्तर्यस्तु ता स्मृता ।
[2]सन्धिविग्रहसंबद्धनानाकार्यसमुत्थितम् ॥ ६१ ॥
[1]निवेदयन्ति कार्यं याः प्रतीहार्यस्तु ता स्मृताः ।
[2]अप्राप्तरतिसंभोगा असंभ्रान्ता अनुद्धता ॥ ६२ ॥
[1]निभृता या सलज्जाश्च ताः कुमार्य इति स्मृताः ।
[2]पूर्वराजनयाभिज्ञा [3]पूर्वराजाभिपूजिता ॥ ६३ ॥
[1]सर्वानुचरितज्ञाश्च ता वृद्धा इति सज्ञिता ।
[2]भाण्डागारेष्वधिकृता [3]आयुधाधिकृतास्तथा ॥ ६४ ॥
[1]फलमूलौषधीनाञ्च तथा [2]चैवान्नवीक्षिका ।
[3]गन्धाभरणमाल्यानां वस्त्राणां चैव [4]चिन्तिकाः ॥ ६५ ॥
[1]बह्वर्थेषु नियुक्ता या आयुक्ता इति च स्मृता ।
[2]इत्यन्त पुरचारिण्य स्त्रिय प्रोक्ता समासत ॥ ६६ ॥

60 (C 52c 53a, B XXIV 58 K XXIV 42b 43a, H 43b 44a) [1]CN प्रेष(ष)णीया बुधैयास्तु, B बुधैयास्तु नियुज्यन्ते ता [2]K ज्ञेयास्त्वेषण°, H ज्ञेया प्रेक्षण° B ज्ञेया परिचारिका [3]KH °रक्षायाम् B °रक्षासु [4]CB स्तुतिस्वस्त्ययनी च या, KH चाशीस्तव° 61 (C 53b B XXIV 59, K XXIV 43b 44a, H 44b 45a) [1]K ज्ञेयास्ता सुमहत्तरा, H ज्ञेयास्तास्तु मह° N ता विज्ञेया महत्तरा [2]C om 61b, B °नानाचार° 62 (B XXIV 60, K XXIV 44b 45a H 45b 46a) [1]C om this [2]B अप्राप्तरतिसंभोगा न संभ्रान्ता न चोद्धता 63 (B XXIV 61 C 54a K XXIV 45b-46a H 46b 47a) [1]C om 63a, B निभृताश्च कुमार्यो बालिका स्मृता [2]C पूर्वराजनयाभिज्ञा, B पूर्वराजनयज्ञा या [3]C पूर्वं राजाभि°, KH सर्वराजसु पूजिता 64 (C 54b 55a B XXIV 62 K XXIV 46b, 36a, H 47b, 37a) [1]K सर्वराज्ञीचराश्च, B पूर्वराजानुचरितास्ता [2]KH भाण्डागारे नियुक्ता या [3]K आयुधागारे एव च N आयुधाधि°, C आयुधा विकृतास्तथा 65 (C 55b 56a, B XXIV 63 K XXIV 36b 37a, H 37b 38a) [1]KH चौषधीफलमूलेषु बीजेषु व्यापृता तथा [2]C °वान्नवीक्षणा N वान्नवीक्षिता, B वान्नवेक्षिकी for चान्न वीक्षिका [3]KH गन्धाभरणवस्त्रेषु माल्यानकथनेषु च [4]C चिन्तका 66 (C 56b 57a, B XXIV 64, K XXIV 37b, H 38b) [1]C बह्वाश्रयास्तथा युक्ता विज्ञेया युक्तिका स्मृता N बह्वाश्रये तथा युक्ता ज्ञेया ह्यायुक्तिकास्तु ता [2]KH om 66b

[1]विशेषणं तु शेषाणां तासां वक्ष्यामि वो द्विजाः ।
या [2]नियुक्ता नियोगेषु प्रयोगेषु [3]तथैव हि ॥ ६७ ॥
[1]न चोद्धता न चोद्भ्रान्ता न लुब्धा न च निष्ठुराः ।
[2]शान्ताः क्षान्ताः प्रसन्नाश्च जितक्रोधा जितेन्द्रियाः ॥ ६८ ॥
[1]अकामा निभृताश्चैव स्त्रीदोषैश्च विवर्जिताः ।
[2]अनुरक्ताश्च भक्ताश्च नानापार्श्वसमुत्थिताः ॥ ६९ ॥
ता नियोगेषु योक्तव्या [1]वनिता मदवर्जिताः ।
[2]वस्त्यान्तेषु सक्त नाम तृतीया प्रकृतिः स्मृता[4] ॥ ७० ॥
[1]साऽप्यन्त पुरसञ्चारे योज्या पार्थिववेश्मनि ।
[2]स्नातका कञ्चुकीयाश्च तथा [3]वर्षधरा पुनः ॥ ७१ ॥
[1]औपस्थायिकनिर्मुण्डा कक्षास्थानेषु योजयेत् ।
अपुमांसस्तु ये पुरुषा ये तु स्त्रीभोगवर्जिताः ॥ ७२ ॥
[1]एते त्वन्त पुरचराः कार्या नित्य हि नाटके ।
[2][द्वास्थन्तु] स्नातकं कुर्याद्धार्यमाचारसयुतम् ॥ ७३ ॥
[1]ब्राह्मणाः कुशला वृद्धा [2]कामदोषविवर्जिताः ।
प्रयोजनेषु देवीनां नियोक्तव्या नृपे [3] सदा ॥ ७४ ॥
ये [1]विद्यासत्यसम्पन्ना कामदोषविवर्जिताः ।
ज्ञानविज्ञानकुशला कञ्चुकीयास्तु ते स्मृताः ॥ ७५ ॥

67 (C 57b 58a B XXIV 65a, 66a, K XXIV 47, H 48) [1]B विशेषं विशेषेण, C विशेषेण विशेषेण KH समासात्तस्य तासां प्रवक्ष्यामि द्विजोत्तमा [2]KH नियोज्या [3]C न चोद्धता 68 (C 58b-59a, B XXIV 66b 67a K XXIV. 48, H 49) [1]BC न चोद्भ्रान्ता न लुब्धा न नातिनिष्ठुरमानसा KH चनुद्धता स्वभ्रान्ता तु (स)वेशाचारनिष्ठुराः [2]KH शान्ता दीप्ता (H दान्ता) सुशीलाश्च 69 (C 59b 60a, B XXIV 67b, 65b, K XXIV 49a, H 50a) [1]C अकामाशापि पुण्याश्च B चकामा सुभद्रे(दो)माश्च [2]KH om 69b 70 (C 60b 61a, K XXIV 49b 50a, H 50b 51a) [1]C सवदोषविवर्जिताः [2]C या सा नपुसका [3]KH प्रकृतिस्तु सा [4]B om 70 71 (C 61b 62a, B XXIV 68, K XXIV 50b 51a, H 51b 52a) [1]B सा त्वन्तःपुर° [2]BN कारुका, H कारुका [3]CB वषवरा 72 (K XXIV 51b 52a, H 52b 53a) [1]BC om 72 H ये स्थायिकाश्च 73 (K XXIV. 52b-53a H 54b 55a) [1]C om 73 [2]K वसन्तं, (footnote वास्तव्यं) H *ma* द्वारस्था स्नातकाश्च 74 (C 65b 66a, B XXIV 72) [1]KH om 74 [2]N काल, C कला 75 K XXIV 58, H 59) [1]K footnote विप्रा [2]BC om 75

[1]प्रेषणे चार्थसयुक्ते कञ्चुकीयान्नियोजयेत् ।
तथा वर्षधरांश्चैव कामचारेषु योजयेत् ॥ ७६ ॥
[1]औपस्थायिकनिर्मुण्डान् स्त्रीणां प्रेषणकर्मणि ।
[2]रक्षणे कुमारीणाञ्च बालिकानाञ्च योजयेत् ॥ ७७ ॥
[1]मानकार्येषु नारीणां नियुञ्जीतानुचारिका ।
[2]अन्तःपुराधिकारे हि [3]राजचर्यानुवर्तिनम् ॥ ७८ ॥
[1]सर्व[नृ]त्ता[ङ्ग]योगज्ञ [2]नाट्यागारे [3]निवेशयेत् ।
[4]ये स्वल्पसत्त्वा कुशला क्लीवाश्च [5]स्त्रीस्वभाविन ॥ ७९ ॥
[1]जात्या न दोषिणश्चैव ते वै [2]वर्षधरा स्मृता ।
[3]नपुंसका ये पुरुषा स्त्रीस्वभावेन वर्जिता ॥ ८० ॥
[1]निर्मुण्डा नामतो ज्ञेया कामविज्ञानवर्जिता ।
एतदष्टादशविधं प्रोक्तमन्त पुर मया ॥ ८१ ॥

अत परं प्रवक्ष्यामि बाह्यपुरुषसञ्चरम् ।
राजा सेनापतिश्चैव [1]पुरोधा मन्त्रिणस्तथा ॥ ८२ ॥
सचिवा प्राड्विवाकाश्च [1]कुमाराधिकृतास्तथा ।
[2]एते चान्ये च बहव [3]सभास्तारा नृपस्य तु ।
[4]विभागमेषा वक्ष्यामि लक्षण च पृथक् पृथक् ॥ ८३ ॥

76 (K XXIV 53b 54a, H 54b 55a) [1]BC om 76, H प्रेरणे 77 (C 62b 63a, B XXIV 69, K XXIV 54b, H 55b [1]KH औ(उ)पस्थायिकांनिमु ण्डा [2]KH om 77b 78 (C 63b B XXIV 70a, K XXIV 55a, H 56a) [1]BC om 78a [2]KH om 78b, C [0]धिकारी हि, B [0]विकारेषु [3]BC राजभार्या ([0]चर्या H )नुवर्तनम् 79 (C 64, B XXIV 70b 71a K 55b 57a H 56b 57a, [1]KC सर्वं, (K सर्वो)स्नात B [0]नाटवाहा [2]BM पत्यागारे [3]KH नियोजयेत [4]C वनितास्वल्पसत्त्वा ये वै [5]C [0]स्वभावका B [0]स्वाभाविका 80 (C 65a, B XXIV 71b, K XXIV 56b 57a, H 57b 58a) [1]C जात्या न भाषिण[0] KH जात्या न दुष्टा कार्ये च [2]BC वषवरा [3]BC om 80b 81 (C 66b B XXIV 73a, K XXIV 57b, 59a H 58b, 60a) [1]BC om 81a 82 (C 67 B XXIV 73b 74a, K XXIV 59b 60a, H 60b 61a) [1]KH कुमारो 83 (C 68, B XXIV 74b 75, K XXIV 60b 61 H 61b 62) [1]C कुमारकृतस्तथा, KH प्रयोगाधि कृतास्तथा [2]B एके [3]BC मान्या ज्ञेया [4]BC विशेषमेव (B विशेषमेषा) वक्ष्यामि लक्षणानि निबोधत

[1]शीलवान् बुद्धिसम्पन्नः सत्यवादी जितेन्द्रियः ।
दक्षः प्रगल्भः [2]स्मृतिमान् विक्रान्तो [3]मतिमाञ् शुचिः ॥ ८४ ॥
दीर्घदर्शी महोत्साहः कृतज्ञः [1]प्रियवाक्पटुः ।
लोकपालव्रतधरः [2]कर्ममार्गविशारदः ॥ ८५ ॥
उत्थितश्चाप्रमत्तश्च [1]वृद्धसेव्यर्थशास्त्रवित् ।
नानानयप्रचारज्ञः ऊहापोहविचक्षणः ॥ ८६ ॥
[1]परभावेङ्गितज्ञश्च [2]शूरो धीरः क्षमान्वितः ।
[3]नानाशास्त्रार्थतत्त्वज्ञो [4]नानाशिल्पप्रवर्तकः ॥ ८७ ॥
[1]नीतिशास्त्रे च कुशलस्[2]तथा चैवानुरागवान् ।
[3]स्थानवृद्धिक्षयज्ञश्च पररन्ध्रविचक्षणः ।
[4]कृतज्ञोऽव्यसनी चैव [5]गुणैरेभिर्भवेन्नृपः ॥ ८८ ॥
[1]शीलवान् सत्यसम्पन्नस्त्यक्तालस्यः प्रियंवदः ।
पररन्ध्रविधिज्ञश्च यात्राकालविशेषवित् ॥ ८९ ॥
[1]अर्थशास्त्रार्थतत्त्वज्ञो ह्यनुरक्तः कुले वृतः ।
देशवित् कालविच्चैव भवेत् सेनापतिर्गुणैः ॥ ९० ॥
[1]कुलीना बुद्धिसम्पन्नाः श्रुतिनीतिविशारदाः ।
स्वदेश्याश्चानुरक्ताश्च शुचयो धार्मिकास्तथा ।
[2]पुरोधोमन्त्रिणश्चैव गुणैरेतैर्भवन्ति हि ॥ ९१ ॥

84 (C 69b 70a, B XXIV 76, K XXIV 62, H 63) [1]BC बलवान् [2]C मति°, B धृति°, H श्रुति° [3]KH धृतिमान् 85 (C 70b 71a, B XXIV 77, K XXIV 63, H 64) [1]B प्रियवाङ् मृदु, KH प्रियवागपि [2]KH शूरो धीर क्षमान्वित 86 (C 71b, B XXIV 78a, K XXIV 64, H 65) [1]HC वृद्ध सुव्यर्थं° [2]BC om 86b, K नानानाट्यप्रचार° 87 (C 72, B XXIV 78b, 79a, K XXIV 65 H 66) [1]CHMN परदोषे (H °भावे, °MN °भावे)ऽङ्गिताभिज्ञ (°ङ्गितज्ञ) [2]HK षाड्गुण्यानाप्यलङ्कृत [3]BC ऊहापोहविचारी च [4]KHB °शिल्पप्रयोजक 88 (C 73a, B XXIV 79b 80a, K XXIV 66, H 67) [1]KH om 88a, B नीतिशास्त्रार्थकुशल° [2]C गुणैरेभिर्भवेन्नृप [3]C om 88bc, H om 88b [4]B धर्मज्ञोऽव्यसनी दैव [5]BHK गुणैरेतै° 89 90 (B XXIV 82b 84a, K XXXIV 67-68, H 68 69) [1]C om 89 90 91 (B XXIV 80b 82a, K XXIV 69 70a, H 70 71a) [1]C om 91 B reads as follows कुलीना बुद्धिसम्पन्ना नानाशास्त्रविपश्चित ॥ स्निग्धा परैरहार्याश्च न प्रमत्ताश्च देशजा । अनुब्धाश्च विनीताश्च शुचयो धार्मिकास्तथा ॥ पुरोधोमन्त्रिणश्चैवं गुणैर्भवन्ति हि । [2]KH अमात्या for पुरोधो

[1]बुद्धिमान् [2]नीतिसम्पन्नो विक्रान्तः स्यात् प्रियवद ।
अर्थशास्त्रे च कुशलो ह्यनुरक्त प्रजासु च ॥ ९२ ॥
[1]यो धार्मिकस्तथामात्य कर्तव्यो भूमिपैः सदा ।
व्यवहारार्थनत्त्वज्ञा बुद्धिमन्तो बहुश्रुता ॥ ९३ ॥
मध्यस्था [1]धार्मिका धीरा [2]कार्याकार्यविचक्षणाः ।
[3]क्षान्ता दान्ता जितक्रोधा नोद्धता समदर्शिन ॥ ९४ ॥
ईदृशा प्राड्विवाकाश्च स्थाप्या [4]धर्मासनेष्वथ ।
उत्थिताश्चाप्रमत्ताश्च त्यक्तालस्या [1]जितश्रमा ॥ ९५ ॥
स्निग्धा क्षान्ता विनीताश्च मध्यस्था निपुणास्तथा ।
नयज्ञा विनयज्ञाश्च [1]ऊहापोहविचक्षणा ॥ ९६ ॥
सर्वशास्त्रार्थसम्पन्ना [1]कामाद्यविकृतास्तथा ।
[2]क्रमायाता हि [या] सक्ता कुमाराधिकृतस्तथा ।
[4]नानारूपैः समायुक्ता गुणैरेतैर्भवन्ति हि ॥ ९७ ॥
[1]बृहस्पतिमतादेषा [2]गुणाश्चाप्यभिलक्ष[यन्] ।
विज्ञेय [3]चापि कर्मज्ञे [4]सभास्तारादिकल्पनम् ॥ ९८ ॥
[1]इत्येतत् यो मया प्रोक्त [2]सर्वप्रकृतिलक्षणम् ।
अत ऊर्ध्वं प्रवक्ष्यामि [3]लक्षण भूमिकास्वपि ॥ ९९ ॥

इति भारतीये नाट्यशास्त्रे प्रकृतिविचारो नाम चतुस्त्रिंशोऽध्यायः ॥

92 (C 73b-74a, B XXIV 82b) [1]HK om 92 [2]B °स्वजनाद्याक्रम्य° 93 (C 74b 75a, B XXIV 84b K XXIV 70b H 71b) [1]KH om 93a 94 (C 75b 76a, B XXIV 85, K XXIV 71 H 72) [1]C धार्मिकविप KH धार्मिका रता [2]B °कार्यविवेकिन [3]BK शान्ता [4]C स्वंवं 95 (C 76b-77a, B XXIV 86 K XXIV 72, H 73) [1]B दिश for °ष्वत [2]KH जितक्रमा 96 (C 77b-78a B XXIV 87 K XXIV 73, H 74) [1]C ऊहापोहविषाग्दा 97 (C 78b, B XXIV 88a f n 1 K XXIV 74a H 75a) [1]B om कामाद्यविकृतस्तथा [2]B om क्रमायाता हि या सक्ता [4]BC om 97c 98(C 79ab, B XXIV 88b 89a, K XXIV 74b 75a, H 75b 76a) [1]C °मता-देतान् K °मतादेशाद [2]HK गुणाना प्रविभावकम् C °भिलघदेत्, B °भिकाघदेन [3]K वाचि कमज्ञे H चापि कर्मने N चातधाये, C चापधुरे, B चोपदाये [4]K सभासारादिकल्पनम् H सभास्तारादिकल्पनम 99 (C 79c, B XXIV 89b-90a) [1]C om 99a B इत्येष [2]B प्राड्विवाक विनिर्णय, *ma* सर्वप्रकृतिलक्षणम् [3]B चिता-भिवयन प्रति

# पंचत्रिंशोऽध्यायः

[1]विभागं भूमिकानां तु सम्प्रवक्ष्यामि नाटके ।
[2]यादृशैरेव कर्तव्या पुरुषैर्भूमिकास्तथा ॥ १ ॥
[1]गतिवागङ्गचेष्टाभिः [2]सत्त्वशीलैः समासतः ।
[3]परीक्ष्य पात्रं तज्ज्ञास्तु [4]युञ्ज्याद् भूमिनिवेशने ॥ २ ॥
[1]तस्मादन्विष्य हि गुणान् कार्यः पात्रसमाश्रयः ।
न खेदजननं बुद्धेराचार्यस्य भविष्यति ॥ ३ ॥
[1]आधायोप[ग]मर्जांश्च [2]गुणान् [तज्ज्ञ] स्वभावजान् ।
[3]ततः कुर्याद् यथायोगं नृणां भूमिनिवेशनम् ॥ ४ ॥
अङ्गप्रत्यङ्गसंयुक्तमहीनाङ्गं वयोन्वितम् ।
न स्थूलं न कृशं चैव न दीर्घं न च मन्थरम् ॥ ५ ॥
श्लिष्टाङ्गं द्युतिमन्तं च सुस्वरं प्रियदर्शनम् ।
एतैर्गुणैस्तु संयुक्तं देवभूमिषु योजयेत् ॥ ६ ॥
स्थूलं प्रांशुं बृहद्देहं मेघगम्भीरनिस्वनम् ।
रौद्रस्वभावनेत्रं च स्वभावभ्रुकुटीमुखम् ॥ ७ ॥
रक्षोदानवदैत्यानां भूमिकासु प्रयोजयेत् ।
पुरुषाणां प्रयोगस्तु तथाङ्गक्रिययान्वितः ॥ ८ ॥
सुनेत्राः सुभ्रुवः स्वङ्गाः सुललाटाः सुनासिकाः ।
स्वोष्ठाः सुगण्डाः सुमुखाः सुकण्ठाः सुशिरोधराः ॥ ९ ॥
स्वङ्गप्रत्यङ्गसंयुक्ता दीर्घाश्च मदमन्थराः ।
न स्थूला न कृशाश्चैव स्वभावेन व्यवस्थिताः ॥ १० ॥
सुशीला ज्ञानवन्तश्च तथा च प्रियदर्शनाः ।
कुमारराजभूमिषु प्रयोज्या भरतोत्तमाः ॥ ११ ॥
अङ्गैरविकलैर्वीरं स्फुटं वचनकर्मणि ।
न दीर्घं नैव च स्थूलमूहापोहविचक्षणम् ॥ १२ ॥

1 (C 1, K 1) [1]C भूभागं, N विभाग, K विभाग [2]K यादृशो यस्य कर्तव्या विन्यासे भूमिकास्तत 2 (C 2a, K 2) [1]K गतिर्वागङ्ग दैर्घ्ये भि [2]C सत्त्वयोग° MN सत्त्वभावसुशीलित [3]C om 2b [4]K युञ्ज्याद् भि° 3 (K 3) 4 (K 4) [1]K आधायो यमजार्द्देव [2]K गुणानज्ञान् स्वभावजान् 5 12 (K 5 12)

[1]अ[द्री]नं च प्रगल्भं च [2]प्रत्यु[त्पन्न]विनिश्चयम् ।
सेनापतेरमात्यानां भूमिकासु प्रयोजयेत् ॥ १३ ॥
पिङ्गाक्षं दीर्घनासं च ह्रस्वमुखमथापि वा ।
कञ्चुकीश्रोत्रीयादीनां भूमिकासु नियोजयेत् ॥ १४ ॥
एवमन्येष्वपि तथा नाट्यध[र्मो] प्र[शस्यते] ।
देशावस्थानुरूपेण पात्रं युञ्ज्यात् स्वभूमिषु ॥ १५ ॥
मन्थरं वामनं कुब्जं विकृतं विकृताननम् ।
[1]चिपिटनेत्रं काणाक्षं स्थूलं चिपिटनासिकम् ॥ १६ ॥
[1]दुर्वेषं तु स्वभावं च विकृताकारमेव च ।
[2]दासभूमौ प्रयुञ्जीत युक्तो दासा[ङ्क]संयुतम् ॥ १७ ॥
[1]प्रकृत्या तु कृशं क्षामं तत्र श्रान्तेषु योजयेत् ।
तथा च पुरुषं [3]स्थूलमरोगेषु प्रयोजयेत् ॥ १८ ॥
यदि वा नेदृशाः सन्ति प्रकृत्या पुरुषा द्विजाः ।
आचार्यबुद्ध्या योक्तव्या [2]भावचेष्टास्वभावतः ॥ १९ ॥
या यस्य सदृशी चेष्टा [1]स्वभावं कर्म वा तथा ।
सा [2]तथाचार्ययोगेन नियम्या भावभाविनी ॥ २० ॥
[3]एवमन्येष्वपि तथा नाट्यधर्मो प्रशस्यते ।
देशवेषानुरूपेण पात्रं योज्यं हि भूमिषु ॥ २१ ॥
[1]बहुबाहवो बहुमुखास्तथा च विकृताननाः ।
[2]पशुश्वापदवक्त्राश्च [3]खरोष्ट्रा वारणास्तथा ॥ २२ ॥

13-15 (K 13-15) [1]K धनेन [2]K प्रत्युत्पन्नविनिश्चयम् [3]K ०धर्मप्रवेशने
16 (C 2b-3a, K 16) [1]C विपट नेत्रकाणाक्षा N विपटप्रेक्षकाण K निष्ठव नेत्र
17 (C 3b-4a, K 17) [1]MN दुर्वेष C दुर्वेषि K दुर्गम [2]N मग [3]KC दासाङ्ग०
18 (C 4b-5a, K 18) [1]MN प्रकृत्या [2]N तत्र श्रान्तेषु, K तपश्रान्तेषु [3]K स्थूलमुपयोगेषु C स्थूल धर्मगेषु 19 (C 5b-6a, K 19) [1]N न दृश्य० [2]M चन्य० and N चय० for भाव 20 (C 6b-7b, K 20ab) [1]K ग्राम्यमाधममध्यमा C has here K 20a as its 7a [2]N तदा यास्ययोगेन C तथा चान्ययोगेन [3]N एव०
21 (C 8) 22 (C 9, B XXVI 3, K XXVI 13b-14a) [1]K बहुवाही, C बहवाहो बहुमुखस्तथा च विकृतानन [2]C ०श्वापदमिदाय [3]K खरोष्ट्राश्चाननास्तथा

एते चान्ये च बहवो नानारूपा भवन्ति ये ।
[1]आहार्ययुक्त्या कर्तव्या मृत्काष्ठजतुचर्मभिः ॥ २३ ॥
[1]स्वाभाविकेण रूपेण [2][न]विशेद् [3]रङ्गमण्डलम् ।
[3]आत्मरूपमवच्छा[द्य] वर्णकैर्भूषणैरपि ॥ २४ ॥
यादृशं यस्य यद्रूपं प्रकृत्या तस्य तादृशम् ।
वयोवेषानुरूपेण [1]प्रयोज्यं नाट्यकर्मणि ॥ २५ ॥
यथा [1]जन्तुः स्वभावं हि परित्यज्यान्यदैहिकम् ।
[2]परभावं प्रकुरुते [3]परदेहं समाश्रितः ॥ २६ ॥
एवं बुधः परं भावं सोऽस्मीति मनसा स्मरन् ।
[1]वेषवागङ्गलीलाभिश्चेष्टाभिश्च समाचरेत् ॥ २७ ॥
अनुरूपा [1]विरूपा च [2]तथा रूपानुसारिणी ।
[3]त्रिप्रकारा [4]भवेन्नाट्ये प्रकृतिस्तु विभाविता ॥ २८ ॥
[1]स्त्रियस्तु स्त्रीगते भावे पुरुषाः पौरुषे यथा ।
[2]यथावयस्तथा तस्मिन्ननुरूपेति सा स्मृता[3] ॥ २९ ॥
यो बालः स्थाविरीं भूमिं वृद्धो वा बालभूमिकाम् ।
तद्भावं कुरुते [1]नाट्ये सा विरूपेति कीर्तिता ॥ ३० ॥
पुरुषः स्त्रीगतं भावं [1]यत्र प्रकुरुते पुनः ।
[2]रूपानुसारिणी ज्ञेया प्रयोगे [3]भरतोत्तमैः ॥ ३१ ॥

23 (C 11, B XXVI 4, K XXVI 14b 15a) [1]K आहार्ययुक्ता कार्यास्ते, C आचार्ययुक्त्या, B आचार्येण तु ते कार्या 24 (C 10, K XXVI 15b 16a, B XXVI 5) [1]N स्वाभाविके तु रूपेण C स्वाभाविकेन भावेन [2]BCK प्रवि° [3]C रङ्गमण्डपम्, K रङ्गमण्डले [3]CB °मनवच्छाद्य K समाच्छाद्य 25 (C 12, B XXVI 6, K XXVI 16b-17a) [1]MN प्रयोज्य C प्रयुक्त 26 (C 13, B XXVI 7 K XXVI 17b 18a) [1]K जीवस्स्वभावश्च, B जीवत्स्वभाव हि [2]N परभाव, C परभाव [3]B परभाव 27 (C 14, B XXVI 8 K XXVI 18b 19a) [1]N वेषाङ्गगतिलीलाभि C वागङ्गगतिलीलाभि B वेषा वागगत्नीलाभि 28 (C 15, BK XXVI 1) [1]K स्वरूपा [2]K चविरूपानुरूपिणी [3]C °कारा भवेन् नृणाम्, B त्रिप्रकारेह पात्राणां [4]C प्रकृतिस्त्वपि भाविता, K प्रकृतिस्तु विभूषिता 29 (C 17, B XXVI 13b 14a, K XXVI 2) [1]K स्त्रियास्तु स्त्रीकृती भाव पौरुष पुरुषस्य च B स्त्रियो हि स्त्रीगतो भाव etc [2]K यथावयस्तथा तस्मिन् अनुरूपा तु सा भवेत् यथाजातो यथावस्थम् etc 30 (C 18, K XXVI 3) [1]C नाट्य 31 (C 19, B XXVI 14b 15a, K XXVI 4) [1]K यो वा प्रकुरुते पुनः, [2]BK रूपानुरूपा सा B रूपात् प्रकुरुते तु य [3]K प्रकृतिस्तथा

छन्दत पौरुषी ¹कुर्यात् भूमिकां स्त्री प्रयोगत ।
न परस्परचेष्टाभि ²कुर्याता वृद्धबालिशौ ॥ ३२ ॥
¹उद्धता [चैव] पुरुषा शौर्यवीर्यसमन्विता ।
²पाठ्यप्रयोगे [ते योज्या स्त्रियो] गीते [च सर्वदा] ॥ ३३ ॥
¹प्राय प्रकृति स्त्रीणां [गीते] नृणा तु पाठ्यविधौ ।
स्त्रीणा स्वभावमधुर कण्ठ पुंसा तु बलवत्त्व ॥ ३४ ॥
यद्यपि पुरुषो विद्यात् गीतविधान च लक्षणोपेतम् ।
माधुर्यगुणविहीन शोभा जनयेन्न तद्गीतम् ॥ ३५ ॥
यत्र स्त्रीणां ¹पाठ्याद् गुणो¹ नराणा च कण्ठमाधुर्यम् ।
प्रकृतिविपर्ययजनितौ विज्ञेय तावलकारौ ॥ ३६ ॥
प्रायेण देवपार्थिवसेनापतिमुख्यपुरुषभवनेषु ।
स्त्रीजनकृता प्रयोगा भवन्ति पुरुषस्वभावेन ॥ ३७ ॥
¹भूयिष्ठ सुकुमारश्च नित्य स्त्रीभिरनुष्ठितम् ।
इत्यर्थ आनुपूर्व्याणान्तु दिव्यमानुषयोस्तथा ॥ ३८ ॥
¹रम्भोर्वशीप्रभृतिषु स्वर्गे नाट्य प्रतिष्ठितम् ।
तथैव मानुषे लोके राज्ञामन्तपुरेष्विह ॥ ३९ ॥
उपदेष्टव्यमाचार्यै ¹शास्त्रबुद्ध्याङ्गनासु न ।
²न स्वय भूमिकाभ्यास बुध स्त्रीषु प्रयोजयेत ॥ ४० ॥
स्त्रीषु योज्य प्रयत्नेन प्रयोग पुरुषाश्रय ।
यस्मात् स्वभावोपगतो विलास स्त्रीषु दृश्यते ॥ ४१ ॥
तस्मात् स्वभावमधुरमङ्ग सुलभसौष्ठवम् ।
¹पौरुष ललित यत्तु सोऽलङ्कारोऽपरो भवेत् ॥ ४२ ॥

32 (C 20, B XXVI 15b 16a K XXVI 5) ¹B भूमि स्त्री स्वानुरूपत ²N कुर्वीता, C कुर्याणौ B कार्यौ स्थविर° 33 (C 20b B XXVI 32r 16b) ¹C उद्धता ये च ²C om 33b B पाठ्यप्रयोगे पुरुषा प्रयोक्तव्या स्त्रि गानके 34 (B XXVI 17a) ¹Ag (p 298) प्राय प्रकृति स्त्रीणा गेय नृणा etc 35 (B XXXV 17b 18a) 36 (B XXVI 18b 19a) ¹B दृष्टे 37 (B XXVI 19b 20a) 38 (C 21 K XXVI 7) ¹C भूमिक ²K इम ³C चल्यर्थे ⁴प्रकृतीना न 39 (C 22, B XXVI 20b 21a, K XXVI 6) ¹C प्रवर्तिषु ²K प्रवर्तते ³पार्थिवाना गहेषु च 40 (C 23a 26a B XXVI 21b 22a K XXVI 8a 10a) ¹B प्रयत्नेनाङ्गनाजने ²C स्वय तु 41 (C 26b, 24b B XXVI 22b, 23a, K XXV 11b, 12a) 42 (C 25 B XXVI 23b 24a K XXVI 12b 13a) ¹B ललित सौष्ठवं

[1]तुल्यावस्थाक्रियोपेता [2]भूमिकाप्रकृतिस्तथा ।
[3]भृशमुद्द्योतयेन्नाट्य [4]स्वभावकरणाश्रयम् ॥ ४३ ॥
[1]सगीतमपरिक्लेशं नित्य प्रमदाजनस्य गुण एव ।
[2]यन्मधुरकर्कशत्व [3]भजते नाट्य प्रयोगेण ॥ ४४ ॥
[1]प्रमदा नाट्यविलासैर्लतेव कुसुमैर्विचित्रलावण्या ।
कामोपचारकुशला भवन्ति काम्ये विशेषज्ञाः ॥ ४५ [2] ॥
[1]योग्यासु च प्रयत्नः कर्तव्य सततमप्रमादेन ।
न हि योग्यां विना भवति भावरससौष्ठव किञ्चित् ॥ ४६ ॥
प्रयोगो [1]द्विविधश्चाय विज्ञेयो [2]नाट्यमाश्रितः ।
सुकुमारस्तथाविद्धो नानाभावरसाश्रयः ॥ ४७ ॥
नाटक [1]सप्रकरण भाणो वीथ्यङ्क एव च ।
ज्ञेयानि सुकुमाराणि मानुषैराश्रितानि तु ॥ ४८ ॥
[1]सुकुमारा प्रयोगा ये राज्ञामामोदकारकाः ।
शृङ्गाररसमासाद्य [2]तान्नारीष्वेव योजयेत् ॥ ४९ ॥
युद्धोद्धता वेगकृता [1]संरम्भबहुलाश्च ये ।
न ते स्त्रीभि प्रयोक्तव्या[2] प्रयोज्या पुरुषैर्हि ते ॥ ५० ॥
अनुकृष्टमसम्भ्रान्तमनाविद्धाङ्गचेष्टितम् ।
लयतालकलोपेत प्रमाणनियताक्षरम् ॥ ५१ ॥

43 (C 16, 26a B XXVI 2 K XXVI 10) [1]K तुल्यावस्थाक्रियोपेती, C तुल्योऽपि व्यापकोपेतो C नानाव्यापारापिता [2]C भूमिकाश्चाय इष्यते, C भूमिकादिकृता यथा. [3]C समुद्योतमयेन् ना [4]C स्वभावकरणाय या K °णाश्या 44 (C 27 K XXVI 9, B XXVI 33b 34a) [1]C सगीतकमपरिक्लेशो K सगीतमपरिक्लेशो, B सगीतपरिक्लेशो. [2]C om यत् [3]C भवति नाट्य B लभते नाट्य 45 (C 28, B XXVI 34bc) [1]K om 45 [2]B adds गीत ... (... ) सदा नाट्य प्रमाणमपरिक्लेश । ... धुता ॥ २५ ॥ ... मतिश्चैव धृतिर्मेधा तथैव च । एतानि षट् यो वेत्ति स ... प्रकीर्तितः ॥ २६ ॥ मेधा धृतिर्गुणश्लाघा राग ... एव च । ... षडेतान् ... गुणान् विदुः ॥ २७ ॥ एव कार्यं प्रयोगज्ञैर्नानाभूमिविकल्पनम् । अत ऊर्ध्वं प्रवक्ष्यामि सिद्धीनामपि लक्षणम् ॥ २८ ॥ B's order different in 3rd and 4th hem 46 (C 29) [1]BK om 46 47 (C 30, K XXVI 20, B XXVI 24b 25a) [1]K °धश्चैव [2]C नाट्यमन्वित 48 (C 31, K XXVI 21 B XXVI 25b 26a) [1]C च प्रकरण 49 (C 23b-24a, K XXVI 22, B XXVI 26b 27a) [1]BC सुकुमारप्रयोगस्य [2]K स्त्रीणां भाव प्रयोज्येत B स्त्रीणां तत्प्र° 50 (C 32, K 23, B XXVI 27b 28a) [1]B सरम्भबहुल 51 (K 24)

सुविभक्तपदालापममीष्टरस[वहु]लम्[1] ।
यदीदृशं भवेन्नाट्य नारीणा तु प्रयोजयेत् ॥ ५२ ॥
[1]यत्त्वाविद्धाङ्गहारान्त[2] छेद्यमेद्याऽहवात्मकम् ।
मायेन्द्रजालबहुल पुस्तनेपथ्यसयुतम् ॥ ५३ ॥
[1]पुरुषैर्बहुभिर्युक्तम् अल्पस्त्रीकमथोद्धतम्[2] ।
सात्वत्यारभटीयुक्त नाट्यमाविद्धसज्ञितम् ॥ ५४ ॥
डिम समवकारश्च व्यायोगेहामृगौ तथा ।
[1]एतान्याविद्धसज्ञानि विज्ञेयानि प्रयोक्तृभि ॥ ५५ ॥
एषा प्रयोग कर्तव्यो दैवदानवराक्षसै ।
एवं [1]प्रयोगे कर्तव्य भूमिकाना विकल्पनम् ।
अत्रोच्यते यथा [2]नाट्य आहार्यगुणसम्भव ॥ ५६ ॥
कथ राजगुणा॰ कार्या नरैरल्पपरिच्छदैः ।
अत्रोच्यते यथा लोके [1]नाट्यधर्मो प्रवर्तिता ॥ ५७ ॥
तदेव सर्वसम्पन्न नाट्यमेतन्मया कृतम् ।
[1]वर्णकैश्छादितस्तत्र भूषणैश्चाप्यलङ्कृत ॥ ५८ ॥
[1]गाम्भीर्यौदार्यसम्पन्नो राजचिह्नो भवेन्नट॰ ।
सप्तद्वीपाश्रयश्चैव एवमेको भवेन्नट ॥ ५९ ॥
[1]वर्णकैश्छादितेनेह काय [2]त्वङ्गविचेष्टितम् ।
आचार्यबुद्ध्या [3]ज्ञातस्तु सौष्ठवाङ्गपुरस्कृत ॥ ६० ॥
राजवद् भरतस्तस्मात् राजापि नटवद् भवेत् ।
यथा नटस्तथा राजा [1]यथा राजा तथा नट ॥ ६१ ॥
उभाभ्या भावनिष्पत्ति समलीलाङ्गसौष्ठवा ।
यथाचार्योपदेशेन रङ्गशोभी भवेन्नट ॥ ६२ ॥

52 (K 25) [1]K °रसकाढ्यम् 53 (C 33, B XXVI 28b 29a) [1]B यथाविद्धा°, [illegible] न चाविद्धाङ्गभावन्तु [2]C °ह्वात्मिकम [3]C नेपथ्यदीपिका 54 (C 34, B XXVI 29b 30a) [1]C पुरुषप्रायसचारम् [2]C °मनोद्धतम् 55 (C 35 B XXVI 30b 31a) [1]C एतान्या विद्धसज्ञानि 56 (C 36a 37, K XXIV 75b) [1]C प्रयोगे कर्तव्यो [2]C नाट्यमाहार्य° 57 (C 38 K XXIV 76) [1]C नाट्यधर्मिप्रवर्तिता 58 (C 39, K XXIV 77) [1]N वर्णकैश्छादित° 59 (C 40 K XXIV 78) [1]C गाम्भीर्यौदार्य° [2]C भवेन्नृप K नटो भवेत् 60 (C 41 K XXIV 79) [1]K वर्णकैश्छादितेनेह, C वर्णकैश्छादि तेनेह [2]K त्वङ्गविचेष्टितम् [3]K ज्ञातस्तु, C कर्तव्य 61 (C 42 K XXIV 80) [1]K तथा च नट उच्यते 62 (K XXIV 81)

एवं स्वभावतो राजा नित्यमेवज्ज्वलो भवेत् ।
¹दिव्यानां यः परीवारः पार्थिवानां स एव हि ।
नाटके संप्रयोक्तव्यो ²वेशभाषाचयोऽन्वितः ॥ ६३ ॥
यादृशं यस्य यद्रूपं प्रकृत्या तस्य तादृशम् ।
यथोनेपथ्यविधानेन कर्तव्यं प्रयुयुक्षुणा ॥ ६४ ॥
एष राजोपचारे तु कार्यः पुरुषसंश्रयः ।
अत ऊर्ध्वं प्रवक्ष्यामि प्रयोक्तॄणां तु तद्गुणान् ॥ ६५ ॥

तत्र सूत्रधारगुणान् वक्ष्यामः । ¹अस्खलित एव तालक्षणज्ञता ²अभिमतवाक्संस्कारस्तालविधानज्ञता स्वरवादित्रतत्त्ववेदकश्च³ ।

¹चतुरातोद्यकुशलः ²नानाकर्मसु निष्ठितः³ ।
नानापाषण्डकार्यज्ञो नीतिशास्त्रार्थतत्त्ववित् ॥ ६६ ॥
वेश्योपचारनिपुणः ¹कामशास्त्रविचक्षणः ।
²नानागतिप्रचारज्ञो रसभावविशारदः ॥ ६७ ॥
नाट्यप्रयोगकुशलो नानाशिल्पसमन्वितः ।
¹पदच्छन्दोविधानज्ञः सर्वशास्त्रविचक्षणः ॥ ६८ ॥
¹ग्रहनक्षत्रतत्त्वज्ञो ²देहव्यापारपण्डितः ।
पृथिवीद्वीपवर्षाणां पर्वतानां जनस्य च ॥ ६९ ॥
¹प्रमाणान्तरितज्ञश्च ²राजवंशप्रसूतिवित् ।
श्रोता ³शास्त्रार्थकार्याणां श्रुत्वा चैवावधारकः ॥ ७० ॥
अवधार्य ¹प्रयोक्ता च ²शासकश्चैवोद्देशने ।
एवंगुणस्तथाचार्यः सूत्रधारो विधीयते ॥ ७१ ॥

63 (C 43 K XXIV 82 83a) ¹C स्थाना ²K वेषभाषाक्रियान्वित, N देशभाषासमन्वित 64 (K XXIV 83b 84a) 65 (C 44, K XXIV 84b 85a) ¹C पुरुषाभिधानमेव तल्लक्षण ²K पठोक्ती वाक्संस्कार ³K गीतकालविधानज्ञता ⁴K °वादित्रतत्त्ववाद 66 (C 45, K XXIV 93) ¹K चतुर्थी नाट्याङ्गस्य ²K शास्त्र-नीति प्रतिष्ठित ³MN निष्ठित, C स्थित 67 (C 46, K XXIV 94) ¹K कामतन्त्र° ²C नानागीत° 68 (C 47, K XXIV 95) ¹C पादच्छन्दो, MN पदच्छन्दो 69 (C 48 K XXIV 96) ¹K छन्दोविधानतत्त्व°, ²K देहव्यापारतत्त्ववित् 70 (C 49, K XXIV 97) ¹K प्रमाणाचारत° ²C °प्रसूतिवान् ³C शास्त्राकार्याणां 71 (C 50, K XXIV 99) ¹K प्रवक्ता ²K शास्त्रार्थे°

स्वाभाविकान् गुणांश्चैव गदतो मे निबोधत ।
स्मृतिमान् मतिमान् धीर उदार [1]स्थितवाक् कविः ॥ ७२ ॥
अरोगो मधुरः क्षान्तो दान्तश्चैव प्रियंवदः ।
[1]मन्युदोषविनिर्मुक्तः सत्यवाग् दक्षिणः शुचिः ॥ ७३ ॥
[1]अलुब्धः प्रतिपत्तौ च स्वाभाविकगुणास्त्वमी ।
सूत्रधारगुणैश्चैव किंचिदूनैः समन्वितः ॥ ७४ ॥
मध्यमप्रकृतिस्तज्ज्ञैर्विज्ञेयः पारिपार्श्विकः ।
उज्ज्वलो रूपवांश्चैव [1]दृष्टोपकरणक्रियः ॥ ७५ ॥
मेधावी च निधानश्च स्वकर्मकुशलो [1]नटः ।
सूत्रधारगुणैर्युक्तः सर्वः एव प्रयोगे य ॥ ७६ ॥
वेश्योपचारकुशलो मधुरो दक्षिणः कविः ।
[1]शास्त्रार्थतत्त्ववेदी च निपुणो वैशिकेषु च ।
ऊहापोहक्षमो वाग्मी चतुरश्च विटो भवेत् ॥ ७७ ॥
उज्ज्वलवस्त्राभरणः [1]क्रुध्यत्यनिमित्ततः प्रसीदति च ।
अधमो मागधीभाषी भवति शकारो बहुविकारः ॥ ७८ ॥
वामनो दन्तुरः कुब्जो [1]द्विजिह्वो विकृताननः ।
[2]खलतिः पिङ्गलाक्षश्च स विधेयो विदूषकः ॥ ७९ ॥
[1]कलहप्रियो बहुकथो विरूपो [2][व]न्धसेवकः ।
मान्यामान्यविशेषज्ञश्चेटो ह्येवंविधः स्मृतः ॥ ८० ॥
कलाप्रयोगे [1]चाचार्यशुश्रूषाभिरता सदा ।
लीलया हावभावाभ्यां सत्त्वेन विनयेन च ॥ ८१ ॥

72 (C 51, K XXIV 99) [1]K स्थितवाक् शुचि 73 (C 52, K XXIV 100) [1]K सर्व°, [2]K दक्षिणस्तथा 74 (C 53ab K XXIV 101) [1]C चलक्ष्मप्रतिपत्ती, K चलुब्ध प्रतिमत्ता, N प्रतिवक्ता 75 (C 53c 54a K XXIV 102) [1]HC दृष्टोपकरण° 76 (C 54b 55a, K XXIV 103) [1]C नर, K दृष्ट [2]KC प्रयोगिण 77 (C 55bc, K XXIV 104, H XXXIV 105 106a) [1]CK om this hem 78 (C 56 K XXIV 105) [1]M क्रुध्यतिमानेन, N क्रुध्यत्यवमानित [2]N प्रमादी च 79 (C 57, K XXIV 106, H XXXIV 107b 108a) [1]HK द्विजन्मा [2]H खलद्गति पिङ्गलाच 80 (C 58 K XXIV 107, H 108b-109a) [1]KH कलहप्रियो [2]KCH गन्ध [3]C °देव 81 (C 59b 60a K XXIV 111, H XXXIV 112b 113a) [1]C चाचार्यैर्नोषिताभिरत

माधुर्येण च संयुक्ता चतुःषष्टिकलान्विता ।
[1]राजोपचारकुशला स्त्रीदोषैश्च विवर्जिता ॥ ८२ ॥
[1]प्रियवादी प्रियकथा [2]स्फुटा दक्षा जितश्रमा ।
एभिर्गुणैस्तु संयुक्ता गणिका परिकीर्तिता ॥ ८३ ॥
[1]रूपगुणशीलयौवनसुवर्णमाल्याभरणैः संपन्ना ।
विशदा स्निग्धा मधुरा [2]पेशलवचनशुभरक्तकण्ठी च ॥ ८४ ॥
[1]योग्यायामश्रुभिना लयतालज्ञा रसैश्च [2]सम्पन्ना ।
[3]सर्वाभरणसंयुक्ता गन्धमाल्योपशोभिता ॥ ८५ ॥
[1]एवंविधगुणैर्युक्ता कर्तव्या नायिका तज्ज्ञैः [2] ।
[3]अस्थानहासिनी रुक्षा आविद्धगतिचेष्टिता ॥ ८६ ॥
दीर्घरोषा [1]च दीना च [2]तथोद्धतोद्धटा सदर्पा
एवं विधा [4][त्व]कर्तव्या [5]प्रेक्षायां प्रकृतिर्बुधैः ॥ ८७ ॥
[1]एवमेता प्रकृतयो [2]ज्ञेया नाट्यप्रयोक्तृभिः ।
अत ऊर्ध्वं प्रवक्ष्यामि [3]भरतानां विकल्पनम् ॥ ८८ ॥

82 (C 60b 61a, K XXIV 112, H XXXIV 113b 114a) [1]H तथोपचार°, K कृतोपचार° 83 (C 61b-62a, K XXIV 113, H XXXIV 114b 115a) [1]C प्रियवादिनी [2]C प्रिय° 84 (C 62b 63a, K XXIV 114, H XXXIV 115b 116a) [1]K °यौवनसुवर्णमाधुर्य × × सम्पन्ना H °यौवनसुवर्णमाल्याभरणसम्पन्ना [2]C पेशल वचनाभिरक्तकण्ठी HK °पेशलशुभरक्तकण्ठी (H °कण्ठा) च 85 (C 63b 65a, K XXIV 115a, 118a, H XXXIV 116b, 119b) [1]K भाण्डादोषावभिता°, H भाण्डादोषवभिता [2]H °रसैःसम्पन्ना [3]K सर्वदोषाभित 86 (C 64, K XXIV 116b, 117a, H 119a, 120a) [1]HK एवंविधगुण° [2]KH add after 86a समास्तासु नारीषु वयोरूपवतीषु च । न दृश्यते गुणैर्युक्ता (नटविद्यासमायुता H) सदृशी यदि नर्तकी [3]C चान्दा- नरागिनि, N °स्थानकपिणी 87 (C 65a, K XXIV 117b 118b, H XXXIV 119a, 120a) [1]K श्यदीना [2]K तदा तु निश्चतोद्वटा, H तदा चाऽनिश्चतोद्वटा [3]This hem occurs in MN [4]KH तु [5]M प्रेक्षायां KH प्रकृत्याभिनये (प्रकृति H) बुधैः 88 (C 66, K XXIV 119a, K 20b, H XXXIV 120b 121) [1]K एतदेव मया प्रोक्तं प्राग् विथ्यीकादिनिर्णयम् [2]H विज्ञेया नाट्यमध्यगा [3]H वक्ष्ये भूमिकाम्यपि, K चित्राभिनयम् इति H also reads before 88b (its 121b) इत्येवाभिनयान्याय सर्वां एव प्रयोगिन

[1]भरताश्रयो भरतो [2]विदूषकस्तौरिपो नट ।
[3]सूत्रधारो नाट्यकारस्तथा मुकुटकारक ॥ ८९ ॥
[1]तथाभरणकृच्चैव मालाकारस्तथैव च ।
रजकश्चित्रकारश्च कारव शिल्पिनस्तथा [2] ।
[3]कुशीलवाश्च विज्ञेया ये चान्ये नामतो द्विजा ॥ ९० ॥
[1]धुर्यचदेको [2]यस्माद्दूरदनेकभूमिकायुक्त ।
भाण्डग्रहोपकरणैर्नाट्य भरतो भवेत्तस्मात् ॥ ९१ ॥
[1]लोकाह्लादाश्रयकृत [2]सर्वप्रकृतियदुपचारसंयुक्तम् ।
[3]नानाश्रय प्रकुरुते तथा च [4]नार्याश्रय चापि ॥ ९२ ॥
प्रत्युत्पन्नप्रतिभो [1]नर्मकृन्नर्मगर्भनिर्भेदै[श्च] ।
[3]छेको [4]विदूषितवचनो विदूषको नाम विज्ञेय ॥ ९३ ॥
[1]तूरपतिस्तूर्यमति सर्वातोद्यप्रवादने कुशल ।
[2]तूर्यपरिग्रहयुक्तो [3]विज्ञेयस्तौरिपो नाम ॥ ९४ ॥
[1]नटयति [2]धातयर्थोऽय भूयो नटयति च लोकवृत्तान्तम् ।
रसभावसत्त्वयुक्त यस्मात्तस्मान्नटो भवति ॥ ९५ ॥
[1]आशीर्वादयुक्तैर्मधुरैर्वाक्यैश्च [2]समङ्गलाचारै ।
सर्व स्तौति हि लोक [3]यस्मात्तस्माद् भवेन्नान्दी ॥ ९६ ॥

89 (C 67, K 21) [1]K भरताश्रयाश, C शिल्पकारोपकारी [2]CN च दूषक सौतिको (C [0]रिको) नट [3]C सूत्रधारो नाट्यकार तथा कुटकारक K, नर्मो समूत्रधारो नाटारको नायकश्चैव 90 (C 68 69a, K 22) [1]C तथाहरण[0] [2]K reads the couplet as follows मुकुटाभरणविकल्पैर्विर्ज्ञेयो माल्यवस्त्रविविधैश्च । कारककुशीलवाद्या विज्ञेया नामतश्चैव [3]C कुशीलवा[0] 91 (C 69bc, K 23) [1]MN नाधुर्यादिको (M [0]विटकै) [2]MN [0]दुरतरेनैक, K [0]दूरतरोऽनेक[0], C [0]दूरतरोऽनेक[0] [4]C भाण्डैरुपकरणै[0] 92 (C 70 K 24) [1]C लोके ह्लादाश्रयकृत MNK लोकाश्रयभावाश्रयकृत [2]C सर्वप्रकृतिप्रचार[0], K सर्वप्रकृतिप्रचारसयुक्ताम [3]K नानाश्रया [4]K नार्या च सतत, C नार्याश्रयोऽतिवापि 93 (C 71, K 25) [1]C प्रकृत्युत्पन्न[0] [2]CK नर्मकृता नर्मगर्भनिर्भेद (K [0]दै) N नर्मकृत[0] [3]K छेद[0], C यस्तु [4]C विभूषितवचनो, K विभूषितवदनो 94 (C 72 K 26) [1]MN तूरपतिस्तूर्यपति, K तूरपतिस्तूर्यमति [2]K तूरपतिग्रह[0] [3]MNC विज्ञेयस्तौतिको (C [0]य तौरिको) 95 (C 73 K 27) [1]C नाटयति [2]K धात्वर्थस्तु नाट इति लोक[0] 96 (C 74, K 28) [1]K स्तुत्याभिवादनकृतैर्मधुर[0] [2]C समङ्गला[0] [3]K [0]तस्मादिह वदधा,

न[न्दय]न् यो बहुधाऽस्मिन् नृणां वदति यतो नाट्ययोगे तु ।
[1]प्राकृतसंस्कृतपाठ्यैर्नान्दी नामैष विज्ञेयः ॥ ९७ ॥
गानस्य च वाद्यस्य पाठ्यस्याप्येकभावविहितस्य ।
[1]शिष्टोपदेशयोगात् सूत्रज्ञः सूत्रधारस्तु ॥ ९८ ॥
यस्माद् यथोपदिष्टान् [1]रसान् [स]भावान् यः सत्वसंयुक्तान् ।
[2]भूमिविकल्पान्नयति च [3]नाट्यकारस्तु कीर्तितस्तस्मात् ॥ ९९ ॥
[1]चतुरातोद्यविधानं प्रयोगशास्त्रार्थहेतुविहितस्य ।
[2]नाट्यस्य च प्रयोक्ता [य-] स नटो नाम विज्ञेयः ॥ १०० ॥
भाण्डकवाद्यजा या लयतालजा रसानुविद्धा च ।
सर्वाङ्गसुन्दरी चैव कर्तव्या नाटकीया सा तु ॥ १०१ ॥
नानाप्रकृतिसमुत्थं करोति यः शीर्षकं [1]मुकुटयोगे ।
विविधैर्वेषविशेषैः [2]स मुकुटकारस्तु विज्ञेयः ॥ १०२ ॥
[1]यस्त्वाभरणं कुर्यात् [2]बहुविधिविहितं स [3]चाभरणकृत् स्यात् ।
[4]यश्चोपकरणयोगः स तेन नाम्ना [5]समभिभाष्यः ॥ १०३ ॥
यो वै माल्यं कुरुते पञ्चविधं माल्यकृत् स विज्ञेयः ।
यश्चापि वेषयोगं स च वेषकारस्तु विज्ञेयः ॥ १०४ ॥
चित्रज्ञश्चित्रकरो वस्त्रस्य च रञ्जनाद् भवेद् रजकः ।
जत्वदमलोहकाष्ठैर्यः कर्ता कारकश्चैव ॥ १०५ ॥
नानातोद्यविधाने प्रयोगयुक्तः प्रवादने कुशलः ।
[1]कुशलातोद्यातोद्यविधिः यस्मात्तस्मात् कुशीलवः स्यात् ॥ १०६ ॥

97 (C 75, K 29) [1]C नान्दी बहुधा MN नानीद्धो बहुधा K तस्मिन × × × ह्यर्थो वदति नाट्यगीत [2]K °पाठ्या नान्दी स्मृतिः, C °वादैर्नान्दीन्दीव 98 (C 76, K 30) [1]MN शिष्योपदेश° CK स्थोपदेश° 99 (C 77 K 31) [1]K °रसभावांश्च सत्त्व° C तत्र भावांश्च सत्त्व° [2]C भूमि दक्षस्या स्मृतिः, K, भूमिविक्ष-स्येतियति [3]K °कारकीर्तित 100 (C 78 K 32) [1]K चतुरातोद्यविधायं सर्वत्र तु शास्त्रोक्तविहितस्य [2]K गच्छति यथादाट्यो तथाह वै न्यस्तो भवति 101 (C 79) 102 (C 80 K 33) [1]C मुकुटयोगे [2]K स च मुकुटकार, C स मुकुटकर° 103 (C 81, K 34) [1]K यश्चाभरणं [2]C बहुविधविहित [3]K स चाभरणम् (in the next line) कर्ता [4]KMN °करणयोगात् [5]K om [6]K विभाव्य 104 (C 82 K 35) 105 (C 83, K 36) 106 (C 84, K 37) [1]C कुशलातोद्यनर्तित K कालीतोद्यविद्दक्षो

[1]यद् यत् समाश्रयते शिल्पं वा [2]कर्म वा प्रयोगं वा ।
तत्तेनैवोपगतगुणो विज्ञेयो नामतः पुम्प ॥ १०७ ॥
एव तु नाटकविधौ [1]जातिर्नटसंज्ञिता बुधैर्ज्ञेया ।
[2]नानोपकरणयुक्ता [3]नाटकविकल्पप्रयोगे च ॥ १०८ ॥
उक्तोऽत्र भूमिकान्यास प्रयोक्तारश्च योगत ।
आदिष्ट नाट्यशास्त्र मुनयः किमिहोच्यताम् ॥ १०९ ॥

इति भारतीये नाट्यशास्त्रे भूमिकाविकल्पो नाम पञ्चत्रिंशोऽध्याय ॥

107 (C 85, K 38) [1]K यत्न समाचर्न्म [2]C क्रम [3]C नैनैवापगतगुणा, CN तत्तेनात्म (°नाप ° N) गतगुणो 108 (C 86 K 39) [1]K नटसंश्रया [2]K नाम्नी पकरणयुक्ता [3]N नाटकविकल्पयोगे K नानाशिल्प प्रयुक्ता 109 (C 87)

# षट्त्रिंशोऽध्यायः

[1]आत्रेयोऽथ [2]वसिष्ठश्च पुलस्त्यः पुलहः क्रतुः ।
अङ्गिरा गोतमोऽगस्त्यो [3]मनुरायुस्तथात्मवान् ॥ १ ॥
विश्वामित्रः स्थूलशिराः संवर्तः प्रतिमर्दनः ।
उशना बृहस्पतिर्वत्सश्च्यवनः काश्यपो ध्रुवः ॥ २ ॥
दुर्वासा जमदग्निश्च मार्कण्डेयोऽथ गालवः ।
भरद्वाजोऽथ रैभ्यश्च वाल्मीकिर्भगवांस्तथा ॥ ३ ॥
स्थूलाक्षः शङ्कुलाक्षश्च कण्वो मेधातिथिः क्रुशः ।
नारदः पर्वतश्चैव [1]सुशर्मा चैकधन्विनौ ॥ ४ ॥
निष्ठ्यूतिर्भवनो धौम्यः शतानन्दो कृतव्रणः ।
जामदग्न्यस्तथा रामो [1]जमदग्निश्च वामनः ॥ ५ ॥
एवं [1]ते मुनयः [2]प्रीताः सर्वज्ञं भरतं [3]तदा ।
पुनरूचुरिदं वाक्यं कुतूहलपुरोगमम् ॥ ६ ॥
यस्त्वया [1]गदितो ह्येष नाट्यवेदः पुरातनः ।
एकचित्तैः [2]सोऽस्माभिः सम्यक् समुपधारितः ॥ ७ ॥
[1]भगवन् संशयोऽस्माकं तन्नो व्याख्यातुमर्हसि ।
[2]को ह्यन्यो नाट्यवेदस्य निश्चयं [3]वेत्ति तत्त्वतः ॥ ८ ॥
न वयं [1]परिभावेन न विरोधेन नेर्ष्यया ।
[1]पृच्छामो भगवन् [2]नाट्यमुपदेशार्थमेव तु ॥ ९ ॥
अस्माभिश्च तदा नोक्तं [1]व्याछेदो [न] भवेदिति ।
[2]तत् सर्वं निखिलेनेह नाट्यं गुह्यं [3]निदर्शय ॥ १० ॥
लोकस्य चरितं नाट्यम् इत्यधोवः [1]यदीदृशम् ।
[2]तेषां नो लोकगुह्यानां निश्चयं वक्तुमर्हसि ॥ ११ ॥

1 (C 1) [1]K om 1 5 [2]MN वसिष्ठ, C वशिष्ठ [3]MN °श्यात्म° C °श्यात्म° 2 (C 2) 3 (C 3) 4 (C 4) [1]N सुधर्मा 5 (C 5) [1]N जमदग्नेय 6 (C 6, K 1) [1]K तु [2]K मुक्ता [3]C तदा 7 (C 7, K 2) [1]C कथितो [2]C सहास्माभि°, N सहास्माभि 8 (C 8, K 3) [1]C, भगवन् संशयो [illegible] यत्, K एकश्च संशयोऽस्माकं [2]K को वान्य यत्रि-दास्य [3]C वक्तुमर्हसि 9 (C 9, K 4) [1]K परिहासेन [2]K पृच्छामेन [3]C नाट्यमुपदेशाभिपूर्वकम् 10 (C 10, K 5) [1]CK सदा छेदो [2]K इदानीं कथयिषाथे [3]K प्रकाशय 11 (C 11, K 6) [1]CK °स्मोहमम् [2]K येषांनो

[1]देवस्य कस्य चरितं पूर्वरङ्गे द्विजर्षभ ।
किमर्थं [2]युज्यते [3]घोषप्रयुक्त किं करोति वा ॥ १२ ॥
[1]प्रीतं किं दैवतं तत्र [2]प्रीतं वा किं करोति च ।
[3]कस्मादेव पुन शौच शुचिश्चरति सत्वधृक् ॥ १३ ॥
कथमुर्वीतले नाट्यं स्वर्गान्निपतितं विभो ।
कथं [1]तवायं वंशश्च [2]नटसंज्ञ प्रतिष्ठित ।
[4]सर्वमेतद् यथातत्त्व कथयस्व महामुने ॥ १४ ॥
[1]तेषां तु वचनं श्रुत्वा मुनीनां भरतो मुनि ।
प्रत्युवाच पुनर्वाक्यं गुह्यार्थाभि[धानं] प्रति ॥ १५ ॥

भरत उवाच

[1]ब्रवीमि वो ह्यय विप्रा यन्मा पृच्छथ सुव्रता ।
[2]पूर्वरङ्गविधानस्य तच्च सम्यङ् निबोधत ॥ १६ ॥
प्रोक्तवानस्मि [1]यत्पूर्वमहं विघ्ननिबर्हणम् ।
तस्यानुबन्धेन मया पूर्वरङ्ग प्रकीर्तित ॥ १७ ॥
[1]शस्त्राणां [2]परिहारार्थं [3]शरीरावरणं यथा ।
[4]तथा सर्वगत पाप [5]हुतेनैव प्रशाम्यति ॥ १८ ॥
एवं [1]जप्यैश्च होमैश्च देवताभ्यर्चनेन च ।
स्तुत्याशीर्वचनै [2]शान्तै कर्मभावानुकीर्तनै ॥ १९ ॥
सर्वातोद्यनिनादैश्च [1]तथा गीतस्वनेन च ।
[2]मया च पापहरणे कृते विघ्ननिबर्हणे ॥ २० ॥

12 (C 12, K 7) [1]K कीकस्य [2]C पूज्यते [3]K घोषप्रयुक्त, C घोषप्र° 13 (C 13, K 8a) [1]C प्रीत, K om 13a [2]C प्रीति [3]K कस्माच्चैव [4]K सुनि [5]C श्रुत 14 (C 14 K 8b 9) [1]K तदाय [2]K नटसंज्ञ [3]C प्रकीर्तित [4]C om 14c 15 (K 10) [1]C om 15 [2]K °भिनयन [1]K om this 16 (C 15, K 11) [1]K कथयामि कथा गुह्या [2]C पूर्वरङ्ग-विधौ तस्य [3]K तां च मे सन्नि° 17 (C 16, K 12) [1]K पूर्वे प्रभ 18 (C 17, K 13) [1]C शास्त्राणां [2]K प्रतिकारार्थं [3]C शरीराचरण [4]K क्रियते हि यथा [5]C घृतेनैव 19 (C 18 K 14) [1]K जप्यैश्च हासैश्च [2]C युक्त [3]C, °भावानुकीर्तनात् 20 (C 19, K 15) [1]K तथा गतिस्वनेन च C यथा गीतस्वनानि च [2]K मयापापाप-करणे

[1]स्तुतिगीतादिसंहृष्टैः [2]देवैरभिहितोऽस्म्यहम् ।
[3]नितरां परितुष्टाः स्म प्रयोगेणामुना तव ॥ २१ ॥
[1]देवतासुरमानन्द्य यस्माल्लोकं च नन्दति ।
तस्मादयं प्रयोगस्तु नान्दी [2]नाम भविष्यति ॥ २२ ॥
[1]गीतवाद्यानुवादी च यत्र [2]काकुस्वरः शुभः ।
तस्मिन् देशे [3]तु पापघ्नो माङ्गल्यश्च भविष्यति ॥ २३ ॥
[1]याव[त्] पूरयेद् देशं [2]ध्वनिरातोद्यसंश्रयः ।
[3]न स्थास्यन्ति हि रक्षांसि [4]न च विघ्नविनायकाः ॥ २४ ॥
आवाहे च विवाहे च यज्ञे नृपतिमङ्गले ।
नान्दीशब्दम् उपश्रुत्य हिंस्रा नश्यन्ति [1]सर्वदा ॥ २५ ॥
[1]पा[ठ्य] श्रुत्वा [2]तथा चैव गानं [3]वादित्रमेव च ।
[4]वेदमन्त्रार्थवचनैः समं ह्येतद् भविष्यति ॥ २६ ॥
[1]श्रुतं मे देवदेवाच्च तत्त्वतः शङ्करादिह तम् ।
स्नानजप्यसहस्रेभ्यः [2]श्रेष्ठं मे गीतवादितम् ॥ २७ ॥
[1]यस्मिन्नातोद्यनाट्यं च [2]गीतवाद्यं च [3]नि[श्चितम्] ।
भविष्यत्यशुभं तस्मिन् देशे नैव कदाचन ॥ २८ ॥
एवं पूजाधिकारार्थं पूर्वरङ्गो कृतो मया ।
[1]नानास्तोत्रकृतैर्मन्त्रैर्देवताभ्यर्चनं प्रति[2] ॥ २९ ॥
यतोऽभिवादने क्लिष्टं [1]शिरस्तद् रङ्गमण्डले ।
[2]सूत्रधारस्य तच्छौर्वं विहितं तु द्विजोत्तमाः[3] ॥ ३० ॥

21 (C 20a, K 16) [1]C °संहृष्टा [2]C देवाश्च क्रियते शुभाय [3]C om 21b 22 (C 20b, K 17) [1]C om 22a [2]K °नामा 23 (C 21, K 18) [1]N °वाद्यानुवादी, C °वाद्यानुनादी K °वाद्यानु नान्दी हि [2]K काकुस्वरः, [3]K विपाप्मा भौ मङ्गल्यो च 24 (C 22, K 19) [1]C यावन्त, K यावत [2]K ध्वनिर्नाट्यसमाश्रयः [3]C तावत्तानो शुभं किञ्चित् [4]K न देशे न विनायकाः 25 (C 23, K 20) [1]K चैव हि 26 (C 24, K 21) [1]C वाद्यं श्रुत्वा K पाठ्यं श्रुत्वा [2]K तदा चैव चित्र, [3]C वादित्रमेव च [4]C lacuna for समं ह्येतद्, and सर्वेव for भविष्यति 27 (C 25, K 22) [1]K श्रुतं मया देवदेवात् भवतः शङ्करोदितम् C श्रुतं मया देवदेवात् तत्त्वतः शङ्करोदितम्, [2]K यत्र सगीतवादितम् 28 (C 26, K 23) [1]K °नातोद्यनाट्यश्च, C °नाट्यश्च [2]K गीतवाद्यध्वनि शुभ° C गीतवाद्यं नियत 29 (C 27, K 24) [1]K नानास्तुतिकृतैर्मन्त्रै° C यत्स्तोत्र° [2]K °दवताभ्यर्चनेन च 30 (C 28a, K 25) [1]C शिरसा K, शिरः तद [2]N सूत्रधारस्य, K ततस्तस्य हि [3]C om 30b

[1]शौचं कृत्वा यतो मन्त्रपूजनं-जर्जरस्य तु ।
उच्यते पूर्वरङ्गेऽस्मिन् तस्माच्छौचं प्रकीर्तितम् ॥ ३१ ॥
[1]यथावतारितश्चैव नाट्यमेतन्महीतले ।
[3]वक्तव्यं सर्वमेतद्धि [4]न शक्यं विनिगूहितुम् ॥ ३२ ॥

[1]ममैते तनया सर्वे नाट्यवेदसमन्विता ।
[3]सर्वलोक प्रहसनै[4]र्बाधन्तो हास्यसंश्रये ॥ ३३ ॥
कस्यचित्त्वथकालस्य [1]शिल्पकर्म समाश्य[श्यन्] ।
[2]ऋषीणां व्यङ्गकरणं कुर्वद्भिर्हास्यसंश्रयम् ॥ ३४ ॥
[1]अग्राह्यं तु दुराचारं ग्राम्यधर्मप्रवर्तितम् ।
निष्ठुरं [3]चाप्रशस्तं च काव्यं संसदि योजितम् ॥ ३५ ॥
तच्छ्रुत्वा मुनयः सर्वे [1]भामरोषा प्रकम्पिता ।
[3]ऊचुस्ते भरतान् सर्वान् निर्दहन्त इवाग्नय ॥ ३६ ॥
मा तावद् भो द्विजा युक्तमिदमस्मद् विडम्बनम् ।
को नामाथ परिभवः किं वा नास्मासु सम्मतम् ॥ ३७ ॥
[1]यस्मात् ज्ञानमदोन्मत्ता भव[न्तोऽ]विनयाश्रया ।
तस्मादेतद्धि भवतां कुज्ञानं नाशमेष्यति ॥ ३८ ॥
ऋषीणां ब्राह्मणानां च [1]समवायेऽथ सङ्गमे ।
[2]निर्ब्रह्माचरणो भूत्वा शूद्राचारा भविष्यथ ॥ ३९ ॥

31 (K 26) [1]C om 31    32 (C 28b, K 27) [1]C om 32a  N यथावतारितार्श्चैव K lacuna ending in चैव  [2]MN नाट्यमेतन्महीतले, K = × °नाट्यमेतन्महीतले  [3]C तथाविधिसमापव  [4]K न शक्य हि निगूहितुम्  33 (C 29 K 28) [1]K सर्वमेतस्था सर्वे [2]K नाट्यवेदसमन्विता  [3]KC सर्वलोकप्रहसनै°  [4]C °बाधन्ते, K °बाध ते नाट्यसंश्रये  34 (C 30, K 29) [1]K शिल्पकं ग्राम्यधर्मकम्  C शिल्पकम समाश्रयात्  [2]C ऋषीणामङ्गकरणं, [3]C कुर्वद्भिर्हास्यसंश्रयम्  35 (C 31, K 30) [1]K अग्राह्य  [2]K ग्राम्यधर्मप्रवर्तितम् [3]K चाप्रशस्त  [4]K संसदि नियोजितम्  36 (C 32 K 31) [1]K भीमरोषं  [2]K प्रकम्पिता [3]K ऊचुस्तान् भरता क्रुद्धा निर्दहन्त इवाग्नय  37 (C 33 K 32) [1]C नामाऽभिसम्मतम् K नाथाद्य सम्मते  38 (C 34 K 33) [1]C तस्मात्  [2]C भवतो विनयाश्रया, K न चेच्छा विनयान्विता  39 (C 35 K 34) [1]K समवायसमागमे  C समवायाऽथ सङ्गमे. [2]K निर्ब्रह्मण्यो निराभूत शूद्राचारो भविष्यति

[1]शूद्रास्तु केवलं भूत्वा तत्कर्म समवाप्स्यथ ।
यश्च [2]वो भवतां वंशः स [3]चाशौचो भविष्यति ॥ ४० ॥
[1]येऽत्रापि [2]वंशजास्तेऽपि भविष्यन्त्यथ नर्तकाः ।
[3]परोपस्थानवन्तश्च [4]सस्त्रीबालकुमारकाः ॥ ४१ ॥
[1]शापजन्म ततो ज्ञात्वा [2]सुतानां मे सुरास्तदा ।
सर्वे विमनसो भूत्वा तान् ऋषीन् समुपस्थिता ॥ ४२ ॥
[1]तावद्भिश्च तथा प्रोक्तं देवैः शक्रपुरोगमैः ।
इदानीं [2]दुःखमुत्पन्नं [3]नाट्यमेतद् विनङ्क्ष्यति ॥ ४३ ॥
ऋषीभिश्च ततः प्रोक्तं [1]न चैतद्धि विनश्यति ।
[2]शेषमन्यत् तु यत् प्रोक्तं सर्वमेतद् भविष्यति ॥ ४४ ॥
एतच्छ्रुत्वा तु वचनं मुनीनामुग्रतेजसाम् ।
विषण्णास्ते [1]सुताः सर्वे [2]पुनरात्मवधैषिण ॥ ४५ ॥
प्रोक्तवन्तस्तु [1]मां क्रुद्धा बहुशो नाशितास्त्वया ।
अनेन नाट्यदोषेण [2]शूद्राचारप्रियाः कृताः ॥ ४६ ॥
[1]मया च सान्त्वयित्वोक्ता मा [2]शोकं भजतानघाः ।
[3]कृतान्तविहितोऽस्माकं नूनमेष विधिः [4]स्मृतः ॥ ४७ ॥
मुनीनां न मृषा वाक्यं भविष्यति कदाचन ।
निधने तु मनो मा भूत् युष्माकमिति सान्त्विताः ॥ ४८ ॥
जानीध्वं तु तथा नाट्यं ब्रह्मणो सम्प्रकीर्तितम् ।
[1]शिष्येभ्यश्च तदन्येभ्यः [2]प्रयच्छध्वं प्रयोगतः ॥ ४९ ॥
मा वै प्रणश्यतामेतन्नाट्यं [1]दुःखात् प्रवर्तितम् ।
महाश्चर्यं महापुण्यं वेदाङ्गोपाङ्गसम्भूतम् ॥ ५० ॥

40 (C 36, K 35a) [1]K om 40a [2]C वो [3]C च शूद्रो 41 (C 37, K 35b 36a) [1]K ये च वो [2]C वंशजातास्ते [3]C ततोपस्थान° [4]K पुंस्त्रैणाश्चोपजीविनः 42 (C 38, K 36b-37a) [1]K श्राप इति [2]K सुतेभ्यो मे तदा सुराः 43 (C 39, K 37b 38a) [1]K यावन्मानैस्तत [2]C दुःखमुक्तञ्च [3]C सर्वमेतद् विनिष्टं तु 44 (C 40, K 38b-39a) [1]K न हि त्वं तद्धि नश्यति [2]K दैवमन्यत् 45 (C 41, K 39b-40a) [1]C सुता, K ततः [2]N °त्मकवधे° C °रात्मवधैर्षिण K दृष्ट्वा तं समुपस्थिताः 46 (C 42, K 40b 41a) [1]K मां पुत्रास्तदाहो [2]K °चारा हि वयं कृताः 47 (C 43, K 41b 42a) [1]K मयापि [2]K क्रोध [3]K कृतान्तु° [4]K कृता 48 (C 44, K 42bc) 49 (C 45, K 43) [1]K शिष्येभ्यश्च तदन्येभ्य [2]K प्रयच्छामः 50 (C 46, K 44) [1]K दुःख°

[1]अप्सरोभ्य इदं चैव [2]यथोक्त [य]न्मया श्रुतम् ।
नाट्य दत्वा तत सर्वे प्रायश्चित्त [3]चरिष्यथ ॥ ५१ ॥
[1]कस्यचित्त्वथ कालस्य नहुषो नाम पार्थिव ।
[2]प्राप्तवान् देवराज्यञ्च नयबुद्धिपराक्रमै ॥ ५२ ॥
प्रशशास तदा राज्य [1]दैवी व्युष्टिमवाप्नुयात् ।
गान्धर्वं चैव नाट्य च [2]दृष्ट्वा चिन्तामुपागत ॥ ५३ ॥
स चिन्तयित्वा मनसा कथमेष [2]गृहे मम ।
नाट्यप्रयोगोऽथ [3]भवेदिति देवगणै कृत ॥ ५४ ॥
कृताञ्जलि [1]प्रयोगार्थं [2]प्रोक्तवानमरान् नृप ।
[3]इदमप्सरसामित्थ नाट्यं भवतु नो गृहे ॥ ५५ ॥
[1]प्रत्युक्त स ततो दैवैर्बृहस्पतिपुरोगमै ।
[2]सुराङ्गनानां नोक्तोऽयं मानुषै सह [4]सङ्गम ॥ ५६ ॥
हित पथ्य च [1]वक्तव्य [1]भवान् स्वर्गाधिपो हि यत् ।
आचार्यस्तत्र गच्छतु गत्वा कुर्वंतु ते प्रियम् ॥ ५७ ॥
[1]प्रोक्तवांश्च ततो मा तु नृपति स कृताञ्जलि ।
इदमिच्छामि [2]भगवन् नाट्यमुर्व्यां प्रतिष्ठितम् ॥ ५८ ॥
[1]पूर्वमाचार्यक चैव भवतो हि प्रतिश्रुतम् ।
[2]व्यक्तभावास्त्विदं लब्ध्वा त्वत्सकाशाद्द्विजोत्तम[3] ॥ ५९ ॥
[1]पितामहगृहेऽस्माकमेतदन्त पुरे जने ।
[2]पितामहक्रियायुक्तमुर्वश्या सम्प्रवर्तितम् ॥ ६० ॥

51 (C 47 K 45) [1]C अप्सरोभ्यादश्चैव [2]K यथातत्त्व तथा स्तुतम MN यथोक्त तन्मया C यथोक्त न मया° [3]K चरिष्यति 52 (C 46, K XXXVII 1b 2a) [1]K reads before this × × × लिप्रयागार्थं प्रोक्तवान्नृ [2]K प्राप्त वा देवराज्य हि 53 (C 49 K XXXVII 2b 2a) [1]K देवैर्व्युष्टिम° [2]K दृष्ट्वा 54 (C 50, K XXXVII 3b 4a) [1]C °ऽयं चप्सना [2]K हि [3]K भवेद्दिवि देवर एव सम C भवेदिति ससभम 55 (C 51, K XXXVII 4b 5a) [1]K प्रयोगार्थे [2]K °वान् सुपुरान् [3]K अप्सरोभिरिद सार्धं 56 (C 52, K XXXVII 5b 6a) [1]C प्रयुक्त स [2]K दिव्याङ्गनाना [3]K नैवेह [4]K सङ्गति 57 (C 53 K XXXVII 6b-7a) [1]C भगवान स्वर्जयेत्वया [2]K om गत्वा कुर्वन्तु ते 58 (C 54, K XXXVII 7b 8a) [1]K प्रोक्तवांस्तु [2]K भगवन्नद्यमुर्व्यां प्रवर्तितम् 59 (C 55, K XXXVII 8b 9a) [1]CMN पूर्वमाकुञ्चित चैव द्रवीग्हि किल ( द्रवीयदकुश MN) व श्रुतम [2]K व्यक्ताभावास्त्विद लब्ध [3]C द्विजोत्तमा 60 (C 56, K XXXVII 9b 10a) [1]C °आभिरेतदन्त, [2]K °युक्त पूर्वस्यां, [3]C सम्प्रकीर्तितम्

39303

तस्याः प्रणाशशोकेन [1]उन्मादोपरते नृपे ।
विपन्नेऽन्तःपुरजने [2]पुनर्नाशमुपागतम् ॥ ६१ ॥
[1]प्रकाशमेतदिच्छामो भूतले सम्प्रकीर्तितम् ।
[2]तिथिरात्रक्रियास्वेव यथा स्यान्मङ्गलं शुभम् ॥ ६२ ॥
[1]तस्मात् मम गृहे वन्द्यं नानाप्रकृतिसम्भवम् ।
स्त्रीणां [2]ललितविन्यासैर्यशो च प्रथयिष्यति ॥ ६३ ॥
तथास्त्विति [1]मया प्रोक्तो नहुषः पार्थिवस्तदा ।
[2]सुतांश्चाहूय संप्रोक्ताः सामपूर्वं सुरैः सह ॥ ६४ ॥
अयं [1]तु नहुषो राजा याचते नः कृताञ्जलिः ।
गम्यतां [स्व]हितैर्भूमिं प्रयोक्तुं नाट्यमेव तु ॥ ६५ ॥
[1]करिष्यामि च शापान्तम् अस्मिन् सम्यक् प्रयोजिते ।
ब्राह्मणानां नृपाणां च न [2]भविष्यथ कुत्सिताः ॥ ६६ ॥
तत्र गत्वा [1]प्रयुञ्जध्वं [2]प्रयोगं वसुधातले ।
न शक्यश्चान्यथा कर्तुं वचनं पार्थिवस्य हि ॥ ६७ ॥
[1]युष्माकं चैव सर्वेषां नहुषस्य महात्मनः ।
[2]आप्तोपदेशसिद्धिश्च नाट्ये प्रोक्ता स्वयम्भुवा ॥ ६८ ॥
शेषमुत्तरतन्त्रेण [1]कोहलः कथयिष्यति ।
[2]प्रयोगः कारिकाश्चैव निरुक्तानि तथैव च ॥ ६९ ॥
अप्सरोभिरिदं [1]शास्त्रं क्रीडनीयकहेतुकम् ।
अधिष्ठितं मया [2]स्वर्गे स्वातिना नारदेन च ॥ ७० ॥

61 (C 57, K XXXVII 10b 11a) [1]C उन्मादापहृतेन वै [2]C °मुपागत
62 (C 58, K XXXVII 11b 12a) [1]K प्रकाशमे° [2]K तिथियज्ञक्रियासु तद्यथास्यात् मङ्गले शुभे 63 (C 59, K XXXVII 12b 13a) [1]K तस्मिन् मम गृहे च [2]K ललितविन्यास प्रथयी नाशयिष्यति 64 (C 60, K XXXVII 13b 14a) [1]C यदा, [2]K सुतायाहूय संप्रोक्ता समपूर्व सुरैः सह 65 (C 61, K XXXVII 14b 15a) [1]K हि [2]CK महीं 66 (C 62, K XXXVII 15b 16a) [1]K करिष्यामस्त°. [2]C भविष्यति 67 (C 63, K XXXVII 16b 17a) [1]K प्रयुज्यन्तां [2]K प्रयोगा
68 (C 64, K XXXVII 17b 18a) [1]K युष्माकं [2]K आप्तोपदेशसिद्धं च नाट्यं प्रोक्त
69 (C 65, K XXXVII 18b 19a) [1]K कोहलश्च कथयिष्यति [2]C प्रयोग कारिकार्थं,
70 (C 66, K XXXVII 19b 20a) [1]K °मिदं शास्त्रं क्रीडनीयकहेतुकम् [2]C सर्वे स्वातिना

[1]ततश्च वसुधां गत्वा नहुषस्य गृहे द्विजाः ।
स्त्रीणां प्रयोगं बहुधा [2]सृष्टवन्तो यथाक्रमम् ॥ ७१ ॥
[1]तत्र चोत्पाद्य ते पुत्रान् मानुषीभ्यो महात्मजाः ।
बद्धवन्तोऽधिकं सर्गं तेषां च विविधाश्रयम् ॥ ७२ ॥
पुत्रानुत्पाद्य बद्ध्वा च प्रयोगं [1]ते यथाक्रमम् ।
ब्रह्मणा समनुज्ञाताः प्राप्ताः स्वर्गं [2]पुनस्तदा ॥ ७३ ॥
एवमुर्वीतले नाट्यं शापात् [1]समवतारितम् ।
भरतानां च वंशोऽयं [2]भविष्यश्च प्रवर्तितः ॥ ७४ ॥
[1]कोहलादिभिरेवं तु [2]वात्स्यशाण्डिल्यधूर्तिलैः ।
[3]मर्त्यधर्मतया युक्तैः कञ्चित्कालमवस्थितैः [4] ॥ ७५ ॥
एतच्छास्त्रं [1]प्रयुक्तं तु नराणां बुद्धिवर्धनम् ।
त्रैलोक्यक्रिययोपेतं सर्वशास्त्रनिदर्शनम् ॥ ७६ ॥
[1]माङ्गल्यं ललितञ्चैव [2]ब्रह्मणो वदनोद्भवम् ।
सुपुण्यञ्च पवित्रञ्च शुभं पापविनाशनम् ॥ ७७ ॥
य इदं [1]शृणुयान्नित्यं प्रोक्तञ्चेदं स्वयम्भुवा ।
[2]प्रयोगं यश्च कुर्वीत प्रेक्षते चावधानवान् ॥ ७८ ॥
या गतिर्वेदविदुषां या गतिर्यज्ञकारिणः [1] ।
या गतिर्दानशीलानां तां गतिं [2]प्राप्नुयान्नरः ॥ ७९ ॥

71 (C 67, K XXXVII 20b-21a) [1]C ततश्च [2]K सृष्टवन्तो 72 (C 68, K XXXVII 21b-22a) [1]K तत्रोत्पाद्य ...तु [2]K बुद्धिमन्तोऽधिकां ... 73 (C 69, K XXXVII 22b-23a) [1]K च [2]K पुनः सुताः 74 (C 70, K XXXVII 23b-24a) [1]C समवधारितम् [2]C भविष्यश्च प्रकीर्तितम् [3]K भविष्य च प्रवर्तितः 75 (C 71, K XXXVII 24b-25a) [1]C °दिभिरेवैर्वा [2]K वत्सशाण्डिल्यधूर्तकैः [3]K मर्त्यधर्मक्रियायुक्तैः [4]K किञ्चित्कालमवस्थितैः 76 (C 72, K XXXVII 25b-26a) [1]K प्रणीतं हि [2]K त्रैलोक्यस्य क्रियोपेतं 77 (C 73, K XXXVII 26b) [1]C माङ्गल्यं ललितश्चैव K माङ्गल्यं [2]K om ब्रह्मणो वदनोद्भवम् [3]K om 77b 78 (C 74, K XXXVII 27) [1]C शृणुयात् प्रोक्तं नाट्यमेतत् [2]K कुर्यात् प्रयोगं यश्चैनम् यश्चैतत्वान्नरः । 79 (C 75, K XXXVII 28) [1]C यज्ञयाजिनः [2]K प्राप्नुयादि सः

[1]नृपधर्मेषु सर्वेषु [2]कीर्त्यतेऽस्य महाफलम्[3] ।
[4]प्रेक्षणीयप्रदानं तु सर्वदानेषु पूज्यते[5] ॥ ८० ॥
न तथा गन्धमाल्येन [1]देवास्तुष्यन्ति पूजिता ।
यथा [2]नाट्यप्रयोगस्थैस्तुष्यन्ति स्तुतिमङ्गलैः ॥ ८१ ॥
[1]गान्धर्वञ्चैव नाट्यञ्च [2]यः सम्यगनुपश्यति ।
[3]लभते सद्गतिं पुण्यां सम[4] ब्रह्मर्षिभिर्नरः ॥ ८२ ॥
एवं नाट्यप्रयोगे [1]बहुविधिविहितं कर्मशास्त्रप्रणीत
[2]न प्रोक्तं यच्च [3]लोकादनुकृतिकरणात् [4]संविभाव्य विधिज्ञैः ।
किञ्चान्यत् सस्यपूर्णा भवतु वसुमती [5]शाश्वतो नष्टरोगा
शान्तिर्गोब्राह्मणानां [6]नरपतिरवनिं पातु [7]चेमां समग्राम् ॥ ८३ ॥

[8]इति भारतीये नाट्यशास्त्रे [10]नाट्यावतारो नाम षट्त्रिंशोऽध्यायः ॥

॥ समाप्तश्चायं [11]ग्रन्थः ॥

80 (C 76, K XXXVII 29) [1]K दानधर्मं [2]K कीर्तनेषु [3]K महत् फलम् [4]KC प्रेक्षणीयप्रदान [5]K शस्यते 81 (C 77, K XXXVII 30) [1]K देवास्तुष्यन्ति [2]K नाट्यप्रयोगस्थैर्नित्य तुष्यति 82 (C 78, K XXXVII 31) [1]K °र्व च नाट्यञ्च [2]K य सम्यक् परिपालयेत् [3]K स ईश्वर गणेशानां लभते सद्गतिं पराम् [4]C सम 83 (C 72, K XXXVII 32) [1]C बहु बहु विहित [2]K प्रोक्त यच्च [3]C °दनुकृतिकरणं [4]C सवकार्ये [5]C सस्यपूर्णे, K. सस्यपूर्णा [6]K. नष्टदुर्भिक्षरोगा [7]K भवतु नरपति पातु [8]K पृथ्वी [9]K reads before this महापुण्य प्रयत्न च लोकानां नयनोत्सवम्। नाट्यशास्त्र समाप्तं च (?) भारतस्य यशोवहम् ॥ ६६ ॥ [10]K गुह्यविवक्षा नामाध्याय समाप्त [11]K नन्दिभरतसंगीतपुस्तकम्